CC-0. In Public Domain. Digitization by eGangotri

FJAB-05

फलितज्योतिषम्, आचार्यसेतुः

पञ्चमपत्रम्

मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

राष्ट्रियसंस्कृतसंस्थानम्

( मानितविश्वविद्यालयः )

# बृहत्संहिता

खण्डः

३

## शुक्रादिग्रहचारवर्णनम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

मुक्तस्वाध्यायपीठम्
(Institute of Distance Education)
राष्ट्रियसंस्कृतसंस्थानम्
( मानितविश्वविद्यालयः )

**FJAB-05**
**बृहत्संहिता**
**फलितज्योतिषाचार्यसेतुः**
**पञ्चमपत्रम्**

खण्डः

# ३

## शुक्रादिग्रहचारवर्णनम्

त्रयोदशः पाठः ०७-२१

चतुर्दशः पाठः २२-३८

पञ्चदशः पाठः ३९-५६

षोडशः पाठः ५७-७०

सप्तदशः पाठः ७१-८८

अष्टादशः पाठः ८९-१०८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

*प्रधानसम्पादकः*

**प्रो॰ ए. पी. सच्चिदानन्दः**
कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

*पाठलेखनम्*

**डॉ. रतनपाण्डेय**
अंशकालिक सहायकाचार्यः
राष्ट्रियसंस्कृतसंस्थानम् (मा.वि.वि.)
रणवीरपरिसरः (जम्मू)
(१३-१८ पाठाः)

*सम्पादनम्*

**प्रो. देवीप्रसाद त्रिपाठी**
आचार्य ज्योतिष विभाग
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत विद्यापीठ

*प्रबन्धसम्पादकः*

**डॉ. बिनोदकुमारसिंहः**
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

*पाठ्यक्रमसंयोजनम्*

**डा. श्यामदेवमिश्रः**
वरिष्ठसहायकाचार्यः, मु.स्वा.पीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

*प्रकाशनम्*

**प्रो. रमाकान्तपाण्डेयः**
निदेशकः, मुक्तस्वाध्यायपीठम्
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

प्रकाशनवर्षम् : २०१४, पुनर्मुद्रणम् : २०१५

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५
सर्वाधिकारः सुरक्षितः। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य लिखितरूपेणानुमतिम् अप्राप्य येन केनापि माध्यमेन अस्याः पाठ्यसाम्ग्याः कञ्चिदप्यंशं पुनः प्रस्तोतुम् अनुमतिः नास्ति।
प्रयुक्तकागदम् - Agro-based environment Friendly.

**पृष्ठविन्यासः**

**राजीवकुमारसिंहः**
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**श्री दीपककुमारमुदगलः**
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

## खण्डपरिचयः

ज्योतिषाचार्यसेतुपाठ्यक्रमस्य पञ्चमपत्रे तृतीयखण्डे भवतः स्वागतम्। यथा पत्रपरिचये भवता ज्ञातं यत् पत्रेऽस्मिन् षड् खण्डा वर्तन्ते। तेष्वयम् आदिमः खण्डः 'दैवज्ञलक्षणं रवि-चन्द्रचारश्च' इत्याख्यः। खण्डेऽस्मिन् पञ्च पाठाः वर्तन्ते।

प्रथमः पाठः = उपनयनाध्यायः

द्वितीयः पाठः = सांवत्सरलक्षणं पूर्वार्धम्

तृतीयः पाठः = सांवत्सरलक्षणं उत्तरार्धम्

चतुर्थः पाठः = सूर्यचारः

पञ्चमः पाठः = चन्द्रचारः

एतैः पाठैः स्फुटं भवति यत् खण्डेऽस्मिन् दैवज्ञस्य लक्षणं रविचन्द्रयोः चारश्च विशदतया परिचर्च्यते।

प्रथमः पाठ उपनयनाध्यायः ग्रन्थस्य आदिमः प्रास्ताविकसदृशो वर्तते। पाठेऽस्मिन् ग्रन्थस्य प्रयोजनं, ग्रन्थे निरूपितविषयाः इत्येतेषां विस्तरेण वर्णनमस्ति।

द्वितीयतृतीयपाठयोः सांवत्सरस्य लक्षणं निगद्यते। सांवत्सर अर्थात् यः संवत्सरं (कालं वा) जानाति सः सांवत्सरः कालज्ञः, दैवज्ञः, ज्योतिषी वा। तस्य सांवत्सरस्य स्वरूपं निर्विशेषम् उभयोः पाठयोः वर्ण्यते। सांवत्सरस्य स्वरूपं प्रकृतिः गुणाः दोषाश्च, सांवत्सरेण ज्ञातविषयाणां सामान्यपरिचयश्च अत्र उपस्थाप्यते। चतुर्थे सूर्यचार इत्याख्ये पाठे सूर्यग्रहस्य विविधनक्षत्र-राशिषु सञ्चरणवशात् तद्बिम्बस्वरूपवशात् यः प्रभावः पतति तस्य चर्चा विधीयते। पञ्चमे 'चन्द्रचार' इत्याख्ये पाठे चन्द्रस्य विविधनक्षत्र-राशिषु सञ्चरणवशात् तद्बिम्बस्वरूपवशात् यः प्रभावः पतति तस्य वर्णनम् अत्र उपस्थाप्यते।

इत्थम् अस्य खण्डस्य अध्ययनेन भवान् ग्रन्थेऽस्मिन् किं किं प्रतिपाद्यम् इत्यस्य ज्ञानेन सह सूर्य-चन्द्रसञ्चरणस्य फलमपि अवगमिष्यति।

—◆—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# त्रयोदशः पाठः – शुक्रचारः पूर्वार्द्धम्

## पाठसंरचना

१३.१ प्रस्तावना
१३.२ उद्देश्यम्
१३.३ शुक्रवीथीनां वर्णनम्
१३.४ वराहमिहिरमतेन शुक्रवीथिवर्णनम्
१३.५ शुक्रमार्गवर्णनम्
१३.५.१ मार्गवर्णने मतान्तराणि
१३.३.२ मतान्तरस्य प्रयोजनम्
१३.६ शुक्रवीथीनां फलानि
बोधप्रश्नाः
१३.७ शुक्रस्य षण्मण्डलानि
१३.७.१ प्रथमद्वितीयमण्डलफलम्
१३.७.२ तृतीयचतुर्थमण्डलफलम्
१३.७.३ पञ्चमषष्ठमण्डलफलम्
१३.८ मण्डलानां विशेषफलम्
१३.९ दिवादृष्टशुक्रफलम्
बोधप्रश्नाः
१३.१० सारांशः
१३.११ शब्दावली
१३.१२ सन्दर्भग्रन्थः
१३.१३ सहायकग्रन्थाः
१३.१४ बोधप्रश्नोत्तराणि
१३.१५ अभ्यासप्रश्नाः

## १३.१ प्रस्तावना

बृहत्संहितायाः शुक्रचाराध्यायस्य पाठे भवतः स्वागतं वर्तते। अध्यायस्यास्य पूर्वपाठे महाकार्तिकादीनां षष्ट्यब्दवर्षाणां संज्ञाज्ञानम्, गुरोः संचारवशात् कार्तिकादि वर्षाणां लक्षणं तत्फलम्, नक्षत्रेषु गुरोः संचारस्य विशिष्टफलम्, षष्ट्यब्दानयनप्रकारः, द्वादशयुगानां नामानि अधिपतयश्च, उत्तममध्यमाधमानि युगानि, प्रभवविभवादिसंवत्सराणां नामानि फलानि, गुरोः विम्बलक्षणं फलञ्च भवान् यथा क्रमेण अधीतवान्। शुक्रस्य नववीथयः सन्ति। एतेषां शुक्रवीथीनां वर्णनम्, शुक्रमार्गस्य वर्णनम्, मार्गवर्णने मतान्तराणि, मतान्तरवर्णने प्रयोजनसम्बन्धि -ज्ञानञ्चभवान् करिष्यति। बृहत्संहितायां वर्णितशुक्रवीथीनां फलम्, शुक्रस्य षण्मण्डलानि भवन्ति। इदानीं भवन्तः शुक्रमण्डलानामध्ययनम् करिष्यन्ति। पाठेऽस्मिन् यानि मण्डलानि प्रतिपादितानि तानि फलान्यपि निरुपितानि। एतेषां मण्डलानां विशेषफलम्, दिवादृष्टशुक्रफलञ्चापि भवान् पठिष्यति। अतोऽत्रोपर्युक्तान् विषयान् ध्यानेन भवान् पठतु।

## १३.२ उद्देश्यम्

अस्य पाठस्याध्ययनेन भवान् –

- शुक्रवीथीनां अध्ययनं करिष्यति।
- शुक्रमार्गस्य ज्ञानं करिष्यति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



- शुक्रवीथीनां फलानि ज्ञास्यति।
- शुक्रस्य षण्मण्डलानां ज्ञानं भविष्यति।
- मण्डलानां विशिष्टं फलं ज्ञास्यति।
- दिवादृष्टशुक्रस्य फलं ज्ञास्यति।

## १३.३ शुक्रवीथीनां वर्णनम्

भृगोरपत्यं पुमान् भार्गवः। अत्र भार्गवः शब्दः शुक्रस्य पर्यायो वर्तते। शुक्रचाराध्याये शुक्रगमनसम्बन्धिचर्चा वर्तते। चरः अर्थात् गमनं चलनं वेति। चार इति शब्दः चर् धातोः घञ् प्रत्यत्वात् निष्पद्यते। अध्यायेऽस्मिन् शुक्रस्य नववीथीनां चर्चा स्पष्टरूपेण कृतेति। शुक्रस्य त्रयो मार्गा उदङ्मध्यदक्षिणा वात-व्याडसर्ववैश्वानरास्त्रयो मार्गभेदास्तथा षड्मण्डलानि भवन्ति। सर्वप्रथमादौ परमतेन वीथीनामेव लक्षणं बृहत्संहितायां प्रतिपादितवान् वराहमिहिर इति।

**मूलपाठः**

**नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः।**
**अश्विन्याद्याः कैश्चित्त्रिभाः क्रमाद्वीथयः कथिताः॥**

**अन्वयः** – नागगजैरावतवृषभगोरद्गवमृगाजदहनाख्याः, कैश्चित् अश्विन्याद्यास्त्रिभाः क्रमाद्वीथयः कथिताः।

**प्रतिपदार्थः** – प्रथमा नागवीथी। द्वितीया गजवीथी। तृतीया ऐरावतवीथी। चतुर्थी वृषभवीथी। पञ्चमी गोवीथी। षष्ठी जरद्गववीथी। सप्तमी मृगवीथी। अष्टमी अजवीथी। नवमी दहनवीथी। अश्विनाद्याः = अश्विनीनक्षत्रतः रेवतीनक्षत्रं यावत्। कैश्चित् = आचार्यैः। त्रिभाः = त्रिभिर्त्रिभिर्नक्षत्रैः। क्रमात् = क्रमशः। एताः परिपाट्या वीथयः कथिताः = प्रोक्ताः।

**व्याख्या** – आचार्येवात्र परमतेन शुक्रस्य नववीथयः स्वीकृताः। प्रथमा शुक्रस्य नागनामकवीथी द्वितीया गजवीथी। तृतीया ऐरावतवीथी चतुर्थी वृषभवीथी पञ्चमी गोवीथी षष्ठी जरद्गववीथी सप्तमी मृगवीथी अष्टमी अजवीथी नवमी दहनवीथीति कथिता। याः वीथयः सन्ति ताः कैश्चिदाचार्यैः अश्विन्याद्यास्त्रिभिर्नक्षत्रैरेकावीथी कथिता। अनेन सप्तविंशतिनक्षत्रेषु नववीथयः भवन्ति। अश्विनीभरणीकृत्तिकानक्षत्राणां नागवीथी। रोहिणीमृगशिरार्द्रानक्षत्राणां गजवीथी। पुनर्वसुतिष्याश्लेषानक्षत्राणां ऐरावतवीथी। मघापूर्वाफाल्गुन्युत्तराफाल्गुनीनक्षत्राणां वृषभवीथी। हस्तचित्रास्वातीनक्षत्राणां गोवीथी। अनेन क्रमेण त्रिभिस्त्रिभिर्नक्षत्रैरन्या अपि ज्ञेयाः एवं एतासां वीथीनां मार्गः निर्धारितोऽस्ति।

अत्र नागादिनव वीथयः सौम्येमध्ये दक्षिणमार्गे च स्थिता सन्ति। यथा- नागगजेरावतवीथयः सौम्यमार्गे, वृषगोजरद्गववीथयः मध्यमार्गे तथा च मृगाजदहनवीथयः दक्षिणमार्गे विद्यन्ते। देवलः कथयति –

**अश्विन्यादित्रिभाः सर्वाः नागाद्या दहनान्तिकाः।**
**वीथयो भृगुपुत्रस्य नव प्रोक्ताः पुरातनैः॥**

भृगुनन्दनस्य वीथीविषये आचार्यकश्यपमहोदयेनापि कथितं यत् यदा शुक्रः अश्विनीभरणीकृतिकानक्षत्रेषु सञ्चरणं करोति तदा नागवीथी प्रथमेति एवं क्रमेण शुक्रस्य नववीथीनां सप्तविंशतिनक्षत्रेषु चर्चा कृतेत्यत्र। कश्यप आह यथा–

**त्रिष्वश्विन्यादिषु यदा चरति भृगनन्दनः।**
**नागवीथीति सा ज्ञेया प्रथमान्या निबोधत॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



रोहिण्यादिगजा ज्ञेयाऽदित्याद्यैरावती स्मृता।
मघाद्या वृषभा ज्ञेया हस्ताद्या गौः प्रकीर्तिता॥

जारद्गवी विशाखाद्या मूलाद्या मृगवीथिका।
अजवीथी विष्णुभाद्याऽजाद्या तु दहना स्मृता॥

## १३.४ वराहमिहिरमतेन शुक्रवीथिवर्णनम्

आचार्यवराहमिहिरमहोदयः शुक्रवीथिवर्णनम् अनेन प्रकारेण प्रतिपादितवानेति।

मूलपाठः

नागा तु पवनयाम्यानलानि पैतामहात्रिभास्तिस्रः।
गोवीथ्यामश्विन्यः पौष्णं द्वे चापि भद्रपदे॥

जारद्गव्यां श्रवणात्रिभं मृगाख्यात्रिभं तु मैत्राद्यम्।
हस्तविशाखात्वाष्ट्राण्यजेत्यषाढाद्वयं दहना॥

अन्वयः – नागा तु, पवनयाम्यानलानि पैतामहात्रिभास्तिस्रः गोविथ्यामश्विन्यः पौष्णं द्वे चापि भद्रपदे (भवन्ति)। श्रवणात्रिभं जारद्गव्याम्, मैत्राद्यं त्रिभं मृगाख्याः हस्तविशाखात्वाष्ट्राण्यजेति अषाढाद्वयं दहना (कथयन्ति)।

**प्रतिपदार्थः** – पवनः = स्वातिः। याम्यम् = भरणी। अनलः = कृतिका। नागः = नागवीथी। तु = तदा। पैतामहम् = रोहिणी। त्रिभाः = त्रीणि नक्षत्राणि। तिस्रः = त्रिस्रोः वीथयः भवन्ति। तद्यथा-रोदिणीमृगशिर आर्द्रा गजवीथी। पुनर्वसुदुष्यलेषा ऐरावतवीथी। मघा, पूर्वफाल्गुनी उत्तरफाल्गुनी चेती वृषभवीथि। गोविथ्याम्। अश्विनी = अश्विनीनक्षत्रम्। पौष्णम् = रेवती। द्वे भद्रपदे = पूर्वाभाद्रपद उत्तराभाद्रपदनक्षत्रे। जारद्गव्याम् = जारद्गववीथ्याम्। श्रवणात् = श्रवणनक्षत्रात्। त्रिभम् = नक्षत्रत्रयं श्रवणधनिष्ठा शतभिषगिति। मृगाख्याः त्रिभं तु मैत्राद्यम्। मैत्रम् = अनुराधाम्। त्रिभम् = नक्षत्रत्रितयम्। अनुराधा ज्येष्ठा मूलमिति मृगाख्याः। अत्र तु शब्दपादपूरणस्य कृते। हस्तः = हस्तनक्षत्रम्। विशाखा = विशाखाभम्। त्वाष्ट्रं = चित्राभम्। एतानि = नक्षत्राणि। अजेति = अजविथ्याम्। आषाढाद्वयम् = पूर्वाढोत्तराषाढ़भद्वयम्। दहना = दहनवीथी।

**व्याख्या** – आचार्यवराहमिहिरैः सप्तविंशतिनक्षत्राणां नव वीथयः कथिताः। सर्वप्रथमा नागवीथिः निरुपिता स्वरचितबृहत्संहितायाम्। अन्यमतानुसारेणात्र भिन्नता दृश्यते। यतो हि अन्यमतानुसारेण नागवीथ्याः गणना अश्विनीनक्षत्रात् भवति। बृहत्संहिताकारस्तु स्वकीयग्रन्थे नागवीथ्याः चर्चा भरणीनक्षत्रात् कृतवान्। भरणीकृतिकास्वातीभानां नागवीथी। रोहिणीमृगशिरस् आर्द्रानक्षत्राणां गजवीथी। पुनर्वसुपुष्यश्लेषाभानां ऐरावतवीथी। मघापूर्वाफाल्गुन्युत्तराफाल्गुनीभानां वृषभवीथी। अश्विनीपूर्वाभाद्रपदुत्तराभ्रादपद रेवतीभानां गोवीथी। श्रवणधनिष्ठाशतभिषक् नक्षत्राणां जरद्गववीथी। अनुराधाज्येष्ठामूलनक्षत्राणां मृगवीथी भवति। अत्र सप्तविंशतिनत्रक्षाणां क्रमेण नववीथीनां चर्चा गणना वा न कृतेति। गोवीथ्यां चत्वारि नक्षत्राणि प्राप्नुवन्ति। दहनवीथ्यां तु द्वे नक्षत्रे एव भवतः। अत्र वीथीज्ञाने वराहमिहिरेण अन्यतमस्यापेक्षया नक्षत्राणां संख्याः समानाः न स्वीकृत्य भिन्नाः अङ्गीकृता इति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## मतान्तरस्पष्टार्थचक्रम्

| वीथयः | नागः | गजः | ऐरावतः | वृषभः | गो | जरद्गवः | मृगः | अजः | दहनः |
|---|---|---|---|---|---|---|---|---|---|
| अन्यमतेन नक्षत्रम् | अ. | रो. | पुन. | मघा | ह. | वि. | मृ. | श्र. | पू.भा. |
| | भ. | मृ. | पु. | पू.फा. | चि. | अनु. | पू.षा. | ध. | उ.भा. |
| | कृ. | आ. | श्ले. | उ.फा. | स्वा. | ज्ये. | उ.षा. | श. | रेवती |
| स्वमतेन नक्षत्रम् | भ. | रो. | पुन. | म. | अ. | श्र. | अनु. | ह. | पू.षा. |
| | कृ. | मृ. | पु. | पू.फा. | पू.भा. | ध. | ज्ये. | चि. | उ.षा. |
| | स्वा. | आ. | श्ले. | उ.फा. | उ.फा. | श. | मृ. | वि. | |
| | | | | | रे | | | | |

## १३.५ शुक्रमार्गवर्णनम्

आचार्यवराहमिहिरः शुक्रस्य नववीथीनां मार्गस्य चर्चां कृतवानत्रेति।

**मूलपाठः**

**तिस्रस्तिस्रस्तासां क्रमादुदङ्मध्ययाम्यमार्गस्थाः।**
**तासामप्युत्तरमध्यदक्षिणेन स्थितैकैका॥**

**अन्वयः** – तासां क्रमात् तिस्रस्तिस्रो उदङ्मध्यमाम्यमार्गस्थाः। तासामयि उत्तरमध्यदक्षिणेन एकैका स्थिता।

**प्रतिपदार्थः** – तासाम् = नवानां वीथीनाम्। तिस्रस्तिस्रो वीथयः उदङ् = उत्तरमार्गे। मध्यः = मध्यममार्गे। याम्यः = दक्षिणमार्गे। मार्गस्थाः = मार्गे स्थिताः यास्ताः मार्गस्थाः भवन्ति। तासामपि = नागाद्यानां वीथीनामपि। उत्तरे = सौम्ये। मध्ये = मध्यमे। दक्षिणे = याम्ये एकैका = एकैकमिता। स्थिता = स्था।

**व्याख्या** – अत्र आचार्यकृतनागाद्यानां नवानां वीथीनां परिपाट्या याः तिस्रस्तिस्रो वीथयो भवन्ति। ताः वीथयः उदङ्-मध्य-याम्यमार्गे च स्थिताः दृश्यन्ते। यथा- नागगजैरावत्यवीथयः सौम्यमार्गे स्थिताः। वृषभगोजारद्गवयवीथयः मध्यमार्गे स्थास्तथा च मृगाजदहनवीथयः दक्षिणमार्गेस्थिताः भवन्ति। एतासां नवथीनां सौम्यमध्यमदक्षिणमार्गस्थानां सौम्यमध्ययाम्येनैकैका भवति। एतासु नववीथीषु प्रथमा नागा उत्तरोत्तरा भवति। गजा उत्तरमध्यमा। एरावती उत्तरदक्षिणा। तथा च वृषभा मध्योत्तरा। गोवीथी मध्यमध्या। जरद्गववीथी मध्यदक्षिणा। अनेन क्रमेण मृगवीथी दक्षिणोत्तरा। अजा दक्षिणमध्या। दहनवीथी च दक्षिणदक्षिणा भवति। प्रसङ्गेऽस्मिन् पराशरः कथयति –

अथ मार्गास्त्रयो भवन्त्युत्तरमध्यदक्षिणाः। पुनरेकैकशस्त्रिधा नव वीथय इत्याचक्षते। तत्रोत्तरे नागगजैरावत्यः। मध्ये वृषभगोजारद्गव्यः। दक्षिणे मृगाजदहनाः। तासां नागाऽग्नेययाम्यवायव्यानि। गजवीथी रोहिण्यादीनि त्रीणि। चत्वारि परमैरावती। वृषभा फाल्गुन्यौ यावीथी प्राक्प्रोष्ठपदादीनि चत्वारि। श्रवणधनष्ठावारूणानि जारद्गवी। मृगवीथी त्वाष्ट्रहस्तम्। आत्री मैत्तमिन्द्राग्न्यधिपमैन्द्रम्। मूलमषादाद्वयं च वैश्वानरीमितीच्छन्ति। नक्षत्रमार्गस्य यथा



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



स्थितिस्तथा वीथीमार्गस्य स्थितिः भिन्नरीत्या कथिता अन्यैः। आचार्यपराशरमहोदयेन नक्षत्रमार्गस्य व्यवस्थायाः अनुसारमेव वीथीमार्गस्य स्थिति अनेन प्रकारेण कथिता। यथा –

**नक्षत्राणां त्रयो मार्गा दक्षिणोत्तरमध्यमाः।**
**उदक्स्थास्तारकाः सौम्यो मध्यमो मध्यमाः स्मृतः॥**

**दक्षिणा दक्षिणो मार्गो नक्षत्रेषु प्रकीर्तितः।**
**नक्षत्रात् सौम्यगः सौम्यमार्गस्थो ग्रह उच्यते॥**

**दक्षिणे दक्षिणो मार्गो मध्ये मध्य इति स्मृतः।**

**पुनरपि मतानन्तरमाह**

**मूलपाठः**

**उत्तरमार्गो याम्यादि निगदितो मध्यमस्तु भाग्याद्यः।**
**दक्षिणमार्गोऽषाढादि कैश्चिदेव कृता मार्गाः।**

**अन्वयः** – कैश्चिद् याम्यादि उत्तरमार्गो भाग्याद्यः मध्यमस्तु निगदितः। दक्षिणमार्गो आषाढादिः कथितः। एवं मार्गाः कृताः।

**प्रतिपदार्थः** – कैश्चित् = आचार्यैः। याम्यादिः = भरण्यादिः। उत्तरमार्गः = सौम्यमार्गः भाग्यादिः = पूर्वाफाल्गुन्यादिः। यः = सः। मध्यमः = मध्यमार्गः। निगदितः = कथितः। दक्षिणमार्गः = याम्यमार्गः। आषाढादिः = पूर्वाषाढादिः एवम् = अनेन प्रकारेण। मार्गाः सौम्यमध्ययाम्यमार्गाः। कृताः = निरूपिताः।

**व्याख्याः** – केचन आचार्याः शुक्रवीथीमार्गानेवं प्रतिपादितवन्तः। सप्तविंशतिनक्षत्राणां त्रयो मार्गा कृताः। प्रथमः मार्गः सौम्यः, द्वितीयस्तु मध्यमार्गः तृतीयश्च याम्यमार्ग इति कथितः। याम्यादि अर्थात् भरणीकृतिकारोहिणी – मृगाशिरआर्द्रापुनर्वसुपुष्याश्लेषामघानक्षत्राणां सौम्यमार्गः। भाग्यादि अर्थात् पूर्वफाल्गुन्युत्तरफाल्गुनीहस्तचित्रास्वातीविशाखानुराधाज्येष्ठामूलानामिते मध्यममार्गः। अषाढादि अर्थात् पूर्वाषाढोत्तराषाढाश्रवणधनिष्ठाशतभिषक्पूर्वभाद्रपदोत्तरभाद्रपदारेवती अश्विनीभानां दक्षिणमार्ग इति कथितः। तथा च गर्गः –

**अश्वयुग्भोगपर्यन्तेऽषाढादौ नवके गणे।**
**वर्तमानः सदा क्रूरो दक्षिणे पथि वर्तते॥**

**शुक्रो निर्ऋत्रिपर्यन्ते भाग्यादौ नवके गणे।**
**वर्तमानश्च मध्यस्थो मध्यमे पथि वर्तते॥**

**भरण्यादौ मघान्ते च तृतीये नवके गणे।**
**वर्तमानः शुभो ज्ञेय उत्तरे पथि वर्तते॥**

## वीथीमार्गस्पष्टार्थचक्रम्

| वीथयः | नागा | गजा | ऐरावती | वृषभा | गो | जारद्गवी | मृग | अज | दहना |
|---|---|---|---|---|---|---|---|---|---|
| सूर्यसंचार मार्ग वीथीनां स्थिति. | उत्तरा | | | मध्यमा | | | दक्षिणा | | |
| | उत्तरा | मध्यमा | दक्षिणा | उत्तरा | मध्यमा | दक्षिणा | उत्तरा | मध्यमा | दक्षिणा |
| | उत्तरोत्तरा | उत्तरमध्यमा | उत्तरदक्षिणा | मध्योत्तरा | मध्यमध्या | मध्यदक्षिणा | दक्षिणोत्तरा | दक्षिणमध्या | दक्षिणदक्षिणा |



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



### १३.५.१ मार्गवर्णने मतान्तराणि

अत्र मार्गवर्णने मतान्तराणि वराहमिहिरेणैवं प्रतिपादितानि सन्ति।

**मूलपाठः**

**वीथीमार्गानपरे कथयन्ति यथा स्थितान् भमार्गस्य।**
**नक्षत्राणां तारा याम्योत्तरमध्यमास्तद्वत॥**

**अन्वयः** – अपरे भमार्गस्य यथास्थितान् वीथीमार्गान् कथयन्ति। नक्षत्राणां तारा याम्योत्तरमध्यमास्तद्वत् (ज्ञेयाः)।

**प्रतिपदार्थः** – अपरे = अन्याचार्याः। भमार्गस्य = नक्षत्रपथस्य। यथा = येन प्रकारेण। स्थितान् = व्यवस्थितान्। वीथीमार्गान् = वीथीपथः। कथयन्ति = प्रवदन्ति। नक्षत्राणाम् = भानाम्। तारा = योगतारकः। याम्यः = दक्षिणः। उत्तरा = सौम्या। मध्यमा = मध्यममार्गः। तद्वत् = तेनैव प्रकारेण ज्ञायते।

**व्याख्या** – आचार्यवराहमिहिरेण अन्येषां मतानामन्तरं प्रतिपादितं वर्तते। अन्येऽऽचार्याः नक्षत्रमार्गस्य येनैव प्रकारेण व्यवस्थितान् वीथीमार्गान् तेनैव प्रकारेण कथयन्ति। अत्र नक्षत्राणां योगताराऽपि प्रतिपादितेति। नक्षत्राणां योगतारा येन प्रकारेण दक्षिणे, उत्तरमिते मध्ये च स्थिता वर्तते तेनैव प्रकारेण तस्याः दिक् ज्ञेया। अर्थात् यदि नक्षत्रस्य योगतारा याम्ये स्थिता तदा याम्यदिक् भवति। सौम्ये स्थिता तदा सौम्यदिक् तथा च मध्ये स्थिता तदा मध्यदिक् इति कथ्यते अस्माभिर्गणकैः। अन्ये आचार्यजनाः यथा स्थितान् इति शब्दस्य प्रयोगः आचार्यगर्गमहोदयेनाक्तं यत् पूर्वाषाढ़नक्षत्रादश्विनीपर्यन्तं शुक्रः दक्षिणमार्गे भवेत् तदा सदैव क्रूरः भवति। पूर्वाफाल्गुनीनक्षत्रादारभ्य मूलनक्षत्रं यावत् शुक्रः मध्यममार्गे भवति। भरणीभात् मघानक्षत्रं यावत् शुक्रः सौम्यमार्गे भवति। तदा शुभफलं प्रददाति।

### १३.५.२ मतान्तरस्य प्रयोजनम्

वराहमिहिररचितबृहत्संहितायां मतान्तरस्य प्रयोजनम् अनेन प्रकारेण प्रतिपादितमिति।

**मूलपाठः**

**ज्यौतिषमागमशास्त्रं विप्रतिपत्तौ न योग्यमस्माकम्।**
**स्वमेव विकल्पयितुं किन्तु बहूनां मतं वक्ष्ये॥**

**अन्वयः** – ज्यौतिषमागमशास्त्रं विप्रतिपत्तौ स्वमेव विकल्पयितुं अस्माकं योग्यं न (वर्तते)। किन्तु बहूनां मतं वक्ष्ये।

**प्रतिपदार्थः** – ज्योतिषम् = ग्रहनक्षत्रादीनि तान्यधिकृत्य कृतं शास्त्रम्। आगमशास्त्रम् = वेदाङ्गशास्त्रम्। विप्रतिपत्तौ = सन्देहस्य विषये। स्वयमेव = आत्मनैव। विकल्पयितुम् = कल्पयितुम्। अस्माकम् = अस्मद् जनानाम्। न योग्यम् = न न्याय्यम्। किन्तु। बहूनाम् = प्रभूतानाम्। मतं वक्ष्ये = मतं कथयिष्ये।

**व्याख्या** – आकाशे ये ज्योतिर्मयपिण्डाः दृश्यन्ते ते ग्रहनक्षत्रतारादयः सन्ति। तेषां ग्रहनक्षत्रपिण्डानां निर्दिष्टं कृत्वा विरचितं शास्त्रं ज्योतिषशास्त्रमस्माभिराचार्यैः प्रोक्तमिति। शास्त्रमिदं आगमशास्त्ररुपेणापि ज्ञायते। आगमेन विना न ज्ञातुं शक्यते। अस्माकं सन्देहस्य विषये आत्मनैव कश्चिदस्य विकल्पस्य निर्णयः करणीयः न योग्योऽस्ति। अयमुचितो वर्तते चानुचितोऽयम्, अस्य विचारः स्वमेव करणीयो न।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



यतो हि अस्माकं महर्षयः त्रिकालद्रष्टाः सन्ति। न ज्ञायते कस्य मुनेः कीदृश आगमः। अतः अस्माकं विकल्पस्य परिकल्पना न्यायपूर्णा न भविष्यति। अतो वराहमिहिरमहोदयः सर्वान् मतानुपस्थापितवानत्रेति।

## १३.६ शुक्रवीथीनां फलानि

आचार्यवराहमिहिरमहोदयेन शुक्रवीथीनां शुभाशुभफलान्येवं प्रतिपादितानि स्वरचितबृहत्संहितायाम्।

**मूलपाठः**

**उत्तरवीथिषु शुक्रः सुभिक्षशिवकृद् गतोऽस्तमुदयं वा।**
**मध्यासु मध्यफलदः कष्टफलो दक्षिणस्थासु॥**

**अन्वयः** – शुक्रः उत्तरवीथिषु अस्तमुदयं वा गतः सुभिक्षशिवकृद (भवति)। मध्यासु मध्यफलदः, दक्षिणासु कष्टफलो (भवति)।

**प्रतिपदार्थः** – शुक्रः = भृगुपुत्रः। उत्तरवीथिषु = नागगजैरावताख्यासु। अस्तम् = अस्तमयम्। उदयम् = उदयमयम्। गतः = अगच्छत्। सुभिक्षम् = श्रेयः शिवकृत् = कल्याणकारकः। मध्यासु = ऋषभगोजारद्गवाख्यासु। मध्यफलदः = मध्यफलदायकः। दक्षिणासु = मृगजदहनाख्यासु। कष्टफलः = अनिष्टफलम्।

**व्याख्या** – भृगुपुत्रस्य नववीथयः सन्ति। तासां नववीथीनां त्रयः विभागाः कृताः। सौम्यमार्गे नागगजैरावताख्याः। मध्यमार्गे ऋषभगोजारद्गवाख्याः दक्षिणमार्गे च मृगाजदहनाख्या सन्ति। यदि शुक्रः उत्तरवीथिषु (नागगजैरावताख्यासु) स्थितो भूत्वा अस्तमयं। तस्मात् एवोदयं गतस्तदा तस्य फलं श्रेयः कल्याणकारकञ्च भवति। एवमेव शुक्रः ऋषभगोजारद्गवाख्यासु (मध्यमासु वीथिषु) अनुदितमुदितं वा भूत्वा मध्यफलदायको भवति। न शुभं नाप्यशुभं फलं करोति। तथा च यदि शुक्रः मृगाजदहनाख्यासु (दक्षिणस्थासुवीथिषु) स्थितो भवेत्तदा अनिष्टफलदायको भवति। आचार्यगर्ग आह यत् यदि शुक्रः उत्तर वीथीमार्गे उदयः अस्तमयो वा स्यात् तदा सुभिक्षं सुवृष्टिं योगक्षेमञ्च विनिर्दिशेत्। मध्यमार्गे उदयः अस्तमयो वा भवेत्तदा मध्यमफलदायको भवति। शुक्रः याम्यवीथिमार्गे उदयः अस्तमयो वा स्यात्तदा धान्यस्य संग्रहं कृत्वा केदारेषु तिलान् वपेत्।

**उदयास्तमयं कुर्यान्मार्गमुत्तरमाश्रितः।**
**सुभिक्षं च सुवृष्टिं च योगक्षेमं विनिर्दिशेत्॥**

**उदयास्तमयं कुर्यात् मध्यमं मार्गमाश्रितः।**
**मध्यमं चार्धसस्य च योगक्षेमं विनिर्दिशेत्॥**

**उदयास्तमयं कुर्याद्दक्षिणं मार्गमाश्रितः।**
**धान्यस्य संग्रहं कृत्वा केदारेषु तिलान् वपेत्॥**

आचार्यपराशरमहोदयेनापि शुक्रवीथीनां फलमेवं प्रतिपादितमिति। यदि शुक्रः नागवीथिषु अस्तमयः उदितो वा भवेत्तदा नागश्रितान् जनान् पीडयति। गजवीथ्यां भूत्वा गजकुलान् पीडयति तथा च ऐरावत्यां सति नृपतिबलविरोधो जायते। वृषभवीथ्यां वयोवित्तज्ञानवलाधिकान् पीडयति। गोवीथ्यां सस्यगोमतां हानिः भवति। जरद्गववीथ्यां शास्त्रविदां हानिः भवति। मृगवीथ्यां मृगव्याधिः सस्यतपस्विनामपि रोगोद्भवश्च कष्टो भवति। अजवीथ्यां सस्यवर्षब्रह्मचारिणामाधिक्यं भवति। दहनवीथ्यां सस्यविलयनमग्निपित्तव्याधिसम्भवश्च भवति।

**शुक्रवीथीनां विशेषफलमाह**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**मूलपाठः**

**अत्युत्तमोत्तमोनं सममध्यन्यूनमधमकष्टफलम्।**
**कष्टतरं सौम्याद्यासु वीथिषु यथा क्रमं ब्रूयात्॥**

**अव्वयः** – सौम्याद्यासु वीथिषु यथाक्रमं अत्युत्तमोत्तमोनम् सममध्यन्यूनमधम् कष्टफलम् कष्टतरं ब्रूयात्।

**प्रतिपदार्थः** – सौम्याद्यासु = उदगाशाद्यासु। वीथिषु = नागाद्यासु नवसु। यथाक्रमम् = अनेन प्रकारेण। अत्युत्तमम् = अतिशुभम्। उत्तमम् शुभफलम्। हीनम् = अशुभफलम्। समम् = समानफलम्। मध्यमं = मध्यमफलम्। न्यूनम् = ईषदशुभफलम्। अधम = अनिष्टफलम्। कष्टफलम् = अशुभफलम्। कष्टतरम् = अति कष्टप्रदायकम्। ब्रूयात् = वदेत्।

**व्याख्या** – आचार्यवराहमिहिरमहोदयेन शुक्रस्य नववीथीनां विशेषफलं यथा क्रमेण तथा प्रतिपादितं। सौम्यादिनववीथिषु क्रमेण फलमिदं ज्ञेयमिति। यदि शुक्रः नागवीथ्यां गतः स्यात्तदा शुभफलदायको भवति। गजवीथ्यां शुभफलस्यापेक्षा अल्पशुभफलदायक इति। ऐज्ञरावत्यां गतो भवेत्तदा किञ्चिद्न्यूनशुभफलदायको भवति। वृषभवीथ्यां सममध्यफलदायकः। गोवित्थ्यां मध्यफलसूचकः। जरद्गववीथ्यां किञ्चिद्शुभफलमिति। मृगवीथ्याम् अधमः अर्थात् अनिष्टफलदायकः। अजवीथ्याम् अशुभफलम्, दहनवीथ्याञ्चात्यन्तकष्टफलं प्रददातीति शुक्रः।

**बोधप्रश्नाः**

१. शुक्रस्य कति वीथयः सन्ति ?

२. शुक्रवीथीनां कति मार्गाः सन्ति ?

३. भृगु इति पदस्यार्थः कः ?

४. याम्य इति पदस्यार्थः कः ?

५. परमतानुसारेण एकस्यां वीथ्यां कियन्ति नक्षत्राणि भवन्ति?

६. वराहमिहिरदृष्टया यदि शुक्रः नागवीथ्यां गतस्तदा किं फलम्?

७. वराहमिहिरदृष्टया यदि शुक्रः अजवीथ्यां गतस्तदा किं फलमिति?

## १३.७ शुक्रस्य षण्मण्डलानि

शुक्रस्य मण्डलविषये वराहमिहिरमहोदयेन स्वरचितबृहत्संहितायां कथितं यत् शुक्रस्य षण्मण्डलानि भवन्ति। तैरेतेषां मण्डलानां लक्षणं फलञ्चैवं प्रतिपादितम्।

### १३.७.१ प्रथमद्वितीयमण्डलफलम्

**मूलपाठः**

**(क) प्रथममण्डलस्य फलम्**

**भरणीपूर्वं मण्डलमृक्षचतुष्कं सुभिक्षकरमाद्यम्।**
**वङ्गाङ्गमहिषवाह्लिककलिङ्ग देशेषु भयजननम्॥**

**अत्रोणदितमारोहेद् ग्रहोऽपरो यदि सितं ततो हन्यात्।**
**भद्राश्वशूरसेनकयौधेयकोटिवर्षनृपान्॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**अन्वयः** – आद्यं भरणीपूर्वं मण्डलमृक्षचतुष्कं सुभिक्षकरं बङ्गाङ्गमहिषवाह्लिक-कलिङ्गदेशेषु भयजननं करोति। यदि अत्रोदितं सितं ग्रहोऽपरो आरोहेद्, ततो भद्राश्वशूरसेनकयौधेयककोटिवर्षनृपान् हन्यात्।।

**प्रतिपदार्थः** – आद्यम् = प्रथममण्डलम्। भरणीपूर्वम् = भरणीपूर्वा प्रथमा यस्य नक्षत्र चतुष्कस्य तद्भरणीपूर्वकम्। मण्डलमृक्षचतुष्काम् = भरणी कृत्तिका-रोहिणी-मृगशिरस्नक्षत्राणां प्रथमं मण्डलमिति। सुभिक्षकरम् = सुभिक्षं (श्रेयः)। बङ्गः = बङ्गदेशः। अङ्गः = अङ्गदेशः। महिषः = महिषदेशः। बाह्लिकः = वाह्लिकदेशः। कलिङ्गः = कलिङ्गदेशः। भयजननम् = भयदायकम्। अत्र = अस्मिन् मण्डले। सितम् = शुक्रम्। उदितम् = रविमण्डलात् उद्गतम्। अपरः = अन्यः। ग्रहः = ज्योर्तिपिण्डः। आरोहेद् = उपरिपतेत्। यदि = चेत्। ततो = तदा। भद्राश्वः = भद्राश्वप्रदेशस्य जनाः। शूरसेनः = शूरसेनप्रदेशस्य जनाः। यौधेयकः = यौधेयकस्य जनाः। कोटिवर्षम् = यमकोटिवर्षम्। नृपान् = राज्ञः। हन्यात् = नाशयेत्।

**व्याख्या** – शुक्रस्य प्रथममण्डले चत्वारि नक्षत्राणि कथितानि सन्ति। अस्मिन् मण्डले नक्षत्रस्यारम्भः भरणीनक्षत्रात् भवति। भरणीनक्षत्रात् मृगशिरस् नक्षत्रं यावत् प्रथममण्डले गणना भवति। यदि शुक्रः प्रथमे मण्डले उदितो भवति तदा सुभिक्षकारकः इति। अन्येषां प्रदेशानां देशानां च कृते भीतिं जनयति। ये प्रदेशाः कथितास्ते बङ्गाङ्गमहिषवाह्लिककलिङ्गदेशाः सन्त्यत्रेति। अस्मिन् मण्डले शुक्रः उदितं भूत्वा सूर्यमण्डलात् बहिः आगत्य यद्यन्यैः ग्रहैः संयुक्तः स्यात् अर्थात् तैः ग्रहैः अग्रे स्थितो भवेत्तदा भद्राश्वप्रदेशस्य। शूरसेनस्य। यौधेयकस्य यमकोटिवर्षस्य ये राजानस्तान् नाशयेत्।

**(ख) द्वितीयमण्डलस्य फलमाह**

**भचतुष्टयमार्द्राद्यं द्वितीयममिताम्बुसस्यसम्पत्त्यै।**
**विप्राणामशुभकरं विशेषतः क्रूरचेष्टानाम्।।**

**अन्येनात्राक्रान्ते म्लेच्छाटविकश्वजीविगोमन्तान्।**
**गोनर्दनीचशूद्रान् वैदेहांश्चानयः स्पृशति।**

**अन्वयः** – आर्द्राद्यं भचतुष्टयं द्वितीयममिताम्बुसस्यसम्पत्त्यै विप्राणां अशुभकरं विशेषतः क्रूरचेष्टानाम्। अत्रान्येनाक्रान्ते म्लेच्छाटविकश्वजीविगोमन्तान् गोनर्दनीचशूद्रान् वैदेहांश्चानयः स्पृशति।

**प्रतिपदार्थः** – आर्द्रा = आर्दानक्षत्रम्। आद्यम् = प्रथमं। भचतुष्टयम् = नक्षत्रचतुष्टयम् (आर्द्रा-पुनर्वसु-पुष्य-श्लेषाः)। द्वितीयम् = द्वितीयमण्डलम्। अमितम् = अपरिमितम्। अम्बुः = जलम्। सस्य = धान्यस्य। सम्पत्त्यै = सम्पदम्। विप्राणाम् = ब्रह्मणानाम्। अशुभकरम् = अशुभफलदायकम्। विशेषतः = विशेषतया। क्रूरचेष्टानाम् = विषमस्वभावानाम्। अत्र= अस्मिन्। अन्येन = अपरेण ग्रहेण। आक्रान्ते = अवरुद्धे। म्लेच्छाः = म्लेच्छजनाः। आटविका = अरण्यवासिनः। श्वजीविनः = श्वभिर्ये जीवन्ति। गोमन्तः = विद्यमानगावः। गोनर्दाः = गोनर्दजनाः। नीचाः = अधमकर्मकराः। शूद्राः = शूद्रजनाः। वैदेहाः = वैदेहजनाः। अनयः = अनीतिः। स्पृशति = भवति।

**व्याख्या** – द्वितीयमण्डलस्यारम्भः आर्द्रातः भवति। आर्द्रानक्षत्रतः श्लेषानक्षत्रं यावत् द्वितीयमण्डलं भवति। यदि शुक्रः द्वितीयमण्डले भवेत्तदा अपरिमितजलं सस्यानां च सम्पदं करोति। मण्डलोऽयं ब्राह्मणां कृते अनिष्टफलदायको भवति। विषमस्वभावयुक्तजनानां कृते विशेषतया मण्डलोऽयं शुभकारको न भवति। मण्डलेऽस्मिन् चेदन्यैर्ग्रहैः शुक्रे आक्रान्ते



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



सति तदा म्लेच्छजनाः। अरण्यवासिनः श्वानोपजीविनः विद्यमानगावः गोनर्दजनाः अधमकर्मकराः शूद्रजनाः वैदेहजनाः अनीतिं स्पृशति। अनयोदेव तत्र सर्वानयस्तदा सोपद्रवा भवन्तीति।

### १३.७.२ तृतीयचतुर्थमण्डलफलम्

शुक्रस्य तृतीयचतुर्थमण्डलस्य फलमेवं प्रतिपादितं वराहमिहिरमहोदयेन वृहत्संहितायाम्।

#### (क) तृतीयमण्डलस्य फलमाह

**मूलपाठः**

**विचरन् मघादिपञ्चकमुदितः सस्यप्रणाशकृच्छुक्रः।**
**क्षुत्तस्करभयजननो नीचोन्नतिसङ्करकरश्च॥**

**पित्र्याद्येऽवष्टब्धो हन्त्यन्ये नाविकान् शबरशूद्रान्।**
**पुण्ड्रापरान्त्यशूलिकवनवासिद्रविडसामुद्रान्॥**

**अन्वयः** – मघादिपञ्चकं शुक्रः उदितः विचरन् सस्यप्रणाशकृत्, क्षुत्तस्करभयजननो नीचोन्नतिसंकरकरश्च। पित्र्याद्ये अन्येनावष्टब्धं अविकान् शबरशूद्रान् पुण्ड्रापरान्त्यशूलिकवनवासिद्रविऽसामुद्रान् हन्ति।

**प्रतिपदार्थः** – मघादिपञ्चकम् = मघापूर्वाफाल्गुन्युत्तराफाल्गुनीहस्तचित्रानक्षत्राणि। शुक्रः = भृगुपुत्रः। उदितः = सूर्यमण्डलादुद्गतः। विचरन् = तिष्ठन्। सस्यप्रणाशकृत् = सस्यानां प्रणाशं करोति। क्षुद् = दुर्भिक्षम्। तस्करः = चौरः। भयम् = भयप्रदायकम्। जनयति = उत्पादयति। नीचानाम् = कुपात्राणाम्। उन्नतिम् = प्राधान्यम्। सङ्करकरश्च = वर्णसङ्करश्चेति। पित्र्याद्ये = मघाद्ये। अन्येन = अपरेण। अवष्टब्धः = अवरुद्धः। अविकान् = अविसम्भूतान्। शबरान् = शबरजनान्। शूद्रान् = शूद्रजनान्। पुण्ड्राः = अपरान्त्याः। शूलिकाः = शूलिकजनाः। वनवासिनः = वनेचरजातयः। द्रविडाः = द्रविडजनाः। समुद्राः = समुद्रतीरवासिनः। हन्ति= घातयति।

**व्याख्या** – शुक्रस्य तृतीयमण्डले मघापूर्वाफाल्गुन्युत्तराफाल्गुनीहस्तचित्रा-नक्षत्राण्यागच्छन्ति। शुक्रश्चेत् मघादिपञ्चनक्षत्रेषु उदितः स्यात्तदा सस्यानां विनाशं करोति। अयं क्षुद्तस्कराभ्यामपि भयं प्रददाति। शुक्रस्य तृतीये मण्डले उदिते सति कुपात्राणां (नीचानाम्) उन्नतिं वर्णसङ्कश्य प्रवर्धते। यदि भृगुपुत्रः मघादिपञ्चनक्षत्रेषु कैश्चिदन्यग्रहैः अवरुद्धो भवेत्तदा आविकान् शबरजनान्, शूद्रजनान्, अपरान्त्यजनान्, शूलिकजनान्, वनेचरजातिजनान् द्रविडजनान्, समुद्रतटीयनिवासिनश्च हन्ति। अत्र उदितशब्दस्यार्थः कृतोऽस्त्याचार्येण यत् शुक्रः पियरंन् सूर्यमण्डलात् उद्गतः उदितो भवतीति।

#### (ख) चतुर्थमण्डलस्य फलमाह

**मूलपाठः**

**स्वात्याद्यं भत्रितयं मण्डलमेतच्चतुर्थमभयकरम्।**
**ब्रह्मक्षत्रसुभिक्षाभिवृद्धये मित्रभेदाय॥**

**अत्राक्रान्ते मृत्युः किरातभर्तुः पिनष्टि चेक्ष्वाकून्।**
**प्रत्यन्तावन्तिपुलिन्दतङ्गणान् शूरसेनांश्च॥**

**अन्वयः** – स्वात्याद्यं भत्रितयं एतच्चतुर्थमण्डलमभयकरं ब्रह्मक्षत्रसुभिक्षाभि-



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



बृद्धये मित्रभेदाय। अत्राक्रान्ते मृत्युः किरातभर्तुः चेक्ष्वाकून् प्रत्यन्तावन्तिपुलिन्दतङ्गणान् शूरसेनांश्च पिनष्टि।

**प्रतिपदार्थः** – स्वात्याद्यम् = स्वातिपूर्वकम्। भत्रितयम् = नक्षत्रत्रयम् (स्वाति, विशाखा अनुराधा च) चतुर्थमण्डलम् = स्वातीविशाखानुराधानक्षत्राणां चतुर्थमण्डलम्। एतत् = इदम्। अभयकरम् = अभयदायकं। ब्रह्म = विप्राणाम्। क्षत्र = क्षत्रियाणां। सुभिक्षम् = श्रेयः। अभिवृद्धये = वृद्धिकारकस्य कृते। मित्रभेदाम् = सुहृदप्रीतये अश्राक्रान्तेः = अस्मिनमण्डले अन्येन ग्रहेणाक्रान्ते सति। मृत्युः = मृत्युकारकः। किरातभर्तुः = किराताधिपस्य। चेक्ष्वाकून = इक्ष्वाकुजनान्। प्रत्यन्ताः = सीमान्तवासिनः। अवन्तयः =उज्जैनवासिनः। पुलिन्दाः = पुलिन्दजनाः। तङ्गणाः = तङ्गणजनाः। शूरसेनाः = शूरसेनजनाः। पिनष्टि = संचूर्णयति।

**व्याख्या** – शुक्रस्य चतुर्थमण्डले स्वातिविशाखाऽनुराधानक्षत्राणि आगच्छन्ति। यदि शुक्रः एतेषु नक्षत्रेषु उदितः स्यात्तदा रोगादितः भयं नोत्पादयति। अयं शुक्रोदितः विप्राणां क्षत्रिणां च सुभिक्षस्याभिवृद्धये भवति। एतेषां वृद्धिं करोति। मित्राणां परस्परं भेदमप्रीतिं (शत्रुता) जनयति। यदि चतुर्थमण्डलेऽस्मिन् केनचिदन्येन ग्रहेण शुक्रस्याक्रान्ते सति किराताधिपस्य अर्थात् किरातदेशस्याधिपस्य (स्वामिनः) मृत्युः भवति। एतादृशी स्थितिः इक्ष्वाकुजनानामपि भवति। एवमेव सीमान्तवासिनः, उज्जैनप्रान्तस्य जनान्, पुलिन्दप्रदेशस्य जनान्, तङ्गणप्रान्तस्य जनान् शूरसेनप्रान्तस्य जनानपि च संचूर्णयति अर्थात् नाशयति।

### १३.७.३ पञ्चमषष्ठमण्डलफलम्

स्वरचितवृहत्संहितायाम् आचार्यवराहमिहिरमहोदयेन शुक्रस्य पञ्चमषष्ठमण्डलस्य फलमनेन प्रकारेण प्रतिपादितं वर्तते।

**(क) पञ्चममण्डलस्य फलमाह**

**मूलपाठः**

**ज्येष्ठाद्यं पञ्चर्क्षं क्षुत्तस्कररोगदं प्रवाधयते।**
**काश्मीराश्मकमत्स्यान् सचारुदेवीनवन्तींश्च॥**

**अत्रारोहेद् द्रविडाभीराम्बष्ठत्रिगर्तसौराष्ट्रान्।**
**नाशयति सिन्धुसौवीरकांश्च काशीश्वरस्य वधः॥**

**अन्वयः** – ज्येष्ठाद्यं पञ्चर्क्षं क्षुत्तस्कररोगदं (भवति)। काश्मीराश्मकमत्स्यान् सचारुदेवीनवन्तींश्च प्रबाधयते। अत्रारोहेद् द्रविडाभीराम्बष्ठत्रिगर्तसौराष्ट्रान् सिन्धुसौत्रीरकांश्च नाशयति। काशीश्वरस्य वधः।

**प्रतिपदार्थः** – ज्येष्ठाद्यम् = ज्येष्ठापूर्वकम्। पञ्चर्क्षम् = पञ्चनक्षत्रम्। ज्येष्ठा-मूल-पूर्वाषाढ-उत्तराषाढ- श्रवणादयः भवन्ति पञ्चमण्डले। क्षुद् = दुर्भिक्षम् तस्कराः = चौराः। रोगदम् = रोगदायकम्। काश्मीरान् = काश्मीरस्य जनान्। अश्मकान् = अश्मकप्रदेशस्य जनान्। मत्स्यान् = मत्स्यप्रान्तस्य जनान्। चारुदेवीन् = चारुदेवनद्यस्तटवर्तीजनान्। अवन्तीन् = उज्जैनवासिनः प्रबाधयते = उपतापयति। अत्र = अस्मिन् मण्डले (पञ्चमे)। आरोहेद् = उपरिपतेत्। द्रविडान् = द्रविडप्रान्तस्य जनान्। आभीरान् = आभीरजनान् अम्बष्ठान् = अम्बष्ठवासिनः। त्रिगर्तान् = त्रिगर्तप्रान्तस्य जनान्। सौराष्ट्रान् = सौराष्ट्रप्रान्तस्य जनान्। सिन्धुसौवीरकांश्च जनान्। नाशयति = क्षयं करोति। काशीश्वरस्य = काशीराजस्य। वधः = मरणम्।

**व्याख्या** – यदि भृगुपुत्रः ज्येष्ठा-मूल-पूर्वाषाढ़-उत्तराषाढ-श्रवणनक्षत्रेषु



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



स्थितो भवेत्तदा दुर्भिक्षं, चौरान् रोगञ्च प्रददाति। शुक्रोऽयं कांश्चित् देशान् उपतापयति। यथा काश्मीरस्य जनान् अश्मकजनान् मत्स्यजनान् चारुदेवनद्यस्तटवर्ती जनान् उज्जैनवासिनः एतेषां प्रान्तानां जनान् उपतापयति। मण्डलेऽस्मिन् यद्यपरः कोऽपि ग्रहः शुक्रमाक्रान्तं करोति तदा द्रविडप्रान्तस्य जनान् नाशयति। अन्यानपि देशान् नाशयति यथा- आभीरजनान् अम्बष्ठजनान् त्रिगर्तप्रान्तस्य जनान् सौराष्ट्रप्रान्तस्य जनान एतान् सर्वान् नाशयति। तेन प्रकारेणैव सिन्धुप्रान्तस्य जनान् सौवीरकप्रान्तस्य जनांश्च विनाशयति। अस्मिन् मण्डले काशीप्रान्तस्य राज्ञो वधः अर्थात् मरणं भवति।

**(ख) षष्ठमण्डलस्य फलमाह**

**मूलपाठः**

**षष्ठं षण्नक्षत्रं शुभमेतन्मण्डलं धनिष्ठाद्यम्।**
**भूरिधनगोकुलाकुलमनल्पधान्यं क्वचिद् सभयम्॥**

**अत्रारोहेच्छूलिकगान्धारावन्तयः प्रपीड्यन्ते।**
**वैदहवधः प्रत्यन्तयवनशकदासपरिवृद्धिः॥**

**अन्वयः** – धनिष्ठाद्यं षष्ठं मण्डलं षण्नक्षत्रं एतत् शुभं (भवति)। क्वचित् भूरिधनगोकुलाकुलमनल्पधान्यं सभयमिति। अत्रारोहेच्छूलिकगान्धारावन्तयः प्रपीड्यन्ते। वैदेहवधः प्रत्यन्तयवनशकदासपरिवृद्धिः (भवति)।

**प्रतिपदार्थः** – धनिष्ठाद्यं = धनिष्ठापूर्वकम्। षण्नक्षत्रम् = धनिष्ठा-शतभिषक्-पूर्वाभाद्रपदुत्तरभाद्रपदा- रेवती-अश्विनीनक्षत्रम्। षष्ठमण्डलम् = शुक्रस्य षष्ठमण्डलम्। एतत् = इदम्। शुभम् = शुभफलम्। क्वचित् = कुत्रचिद् स्थाने। भूरि = बहुलम्। धनम् = वित्तम्। गोकुलानि = गोवाटाः। अकुलम् = सोद्यमं व्याप्तम्। अनल्पधान्यम्= प्रचुरधान्यसंयुक्तम्। सभयम् = भयेन सह अर्थात् सभयम्। अत्र = मण्डलेऽस्मिन् आरोहेत् = उपरि पतेत्। शूलिकाः = शूलिकप्रान्तस्य जनाः। गान्धाराः गान्धारप्रान्तस्य जनाः। अवन्तयः = उज्जैनवासिनः। प्रपीड्यन्ते = कष्टं प्रददति। वैदेहः = वैदेहजनानाम्। वधः = मरणम्। प्रत्यन्ताः = गह्वरजनाः। यवनाः = यवनदेशस्य जनाः। शकाः= शकजनाः। दासाः = भृत्यजनाः। परिवृद्धिः = समृद्धिः।

**व्याख्या** – शुक्रस्य षष्ठमण्डले धनिष्ठा-शतभिषक-पूर्वाभाद्रपदोत्तर-भाद्रपदा-रेवतीनक्षत्राणि भवति। यदि शुक्रः षष्ठमण्डले स्थितो भवेत्तदा प्रचुरधनं प्राप्नोति तथा च गोवंशस्य विस्तृतिः भवति। प्रचुरधान्यस्य प्राप्तिस्तथा कुत्रचिद् स्थाने भयस्य स्थितिः दृश्यते। मण्डलेऽस्मिन् अन्यैः ग्रहैः सहः शुक्रः आक्रान्तः सति तदा शूलिकस्य जनाः गान्धारप्रान्तस्य जनाः अवन्तीवासिनः पीड्यन्ते। यदि शुक्रस्य एतादृशी स्थितिरत्र भवेत् तदा वैदेहप्रान्तस्य जनानां मरणं तथा सीमान्तवासिनः, यवनजनाः, शकजनाः भृत्यजनाश्चेति। एतेषां जनानां समृद्धिर्भवति।

## १३.८ मण्डलानां विशेषफलम्

आचार्यवराहमिहिरवर्णितषण्मडलानां लक्षणं फलञ्च पूर्वमेव कथितमिति। एतेषां मण्डलानां विशेषं फलम् अनेन प्रकारेण प्रतिपादितम् स्वरचितवृहत्संहितायाम्।

**मूलपाठः**

**अपरस्यां स्वात्याद्यं ज्येष्ठाद्यं चापि मण्डलं शुभदम्।**
**पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफलदानि॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**अन्वयः** – स्वात्याद्यं ज्येष्ठाद्यमपरस्यां चापि मण्डलं शुभदं (भवति) पित्र्याद्यं पूर्वस्यां शेषाणि यथोक्तफलदानि (भवन्ति)।

**प्रतिपदार्थः** – स्वात्याद्यम् = स्वाती-विशाखा-अनुराधानक्षत्राणिति। ज्येष्ठाद्यम् = ज्येष्ठा-मूल-पूर्वाषाढ़-उत्तराषाढ़-श्रवणनक्षत्राणि। अपरस्याम् = पश्चिमायां दिशि। मण्डलम् = मण्डलद्वयम्। शुभदम् = शुभफलदायकम्। पित्र्याद्यम् = मघा-पूर्वाफाल्गुनी = उत्तराफाल्गुनी-हस्त-चित्रा नक्षत्राणि। पूर्वस्याम् = पूर्वस्यां दिशि। शेषाणि = भरणी-कृत्तिका-रोहिणी-मृगशिरा-आर्द्रा-पुनर्वसु-पुष्य-आश्लेषा-धनिष्ठा-शतभिषक्-पूर्वाभाद्रपद- उत्तराभाद्रपद-रेवती-अश्विनी नक्षत्राणि। यथा = येन प्रकारेण। उक्तानि = कथितानि। फलदानि= फलदायकानि।

**व्याख्या** – यदि स्वात्यादिनक्षत्रस्य मण्डले ज्येष्ठादिनक्षत्रस्य मण्डले च पश्चिमायां दिशि भृगुपुत्रः स्थितो भूत्वाऽस्तोदयं भवेत् तदा शुभफलदायको भवति। अनेन प्रकारेण मघादिपञ्चनक्षत्रेषु पूर्वस्यां दिशि भृगुपुत्रस्यास्तोदयं भवेद तदा शुभफलं भवतीति। 'शेषाणि' इति शब्दस्य प्रयोगः शेषमण्डलस्य कृते आगच्छति। अत्र। शुक्रोदयास्तं यदि शेषमण्डलेषु (प्रथमद्वितीयषष्ठमण्डलेषु) भवेत्तदा यथोक्तफलानि प्रददाति। आचार्यपराशरमहोदयेन षण्मण्डलानां नामानि यथा क्रमेण प्रतिपादितानि सन्ति। आद्य-रोहित-दारूण विरोचन-अर्ध्वदण्ड-तीक्ष्णान्येतानि षण्मण्डलानि भवन्ति शुक्रस्य। प्रत्येकमण्डलानां शुभाशुभफलानि अपि प्रतिपादितानि सन्ति। तथा च समासंहितायाम् –

**भरणीरौद्रमद्याऽनिलशक्रधनिष्ठादिसम्प्रवृत्तेषु।**
**चारोदयः शुभो मण्डलेषु हित्वैन्द्रयपित्र्याद्ये॥**

आत्राचार्य पराशरस्य आचार्यवराहमिहिरेण सह मतभेदो दृश्यते समासंहितायाम्। आचार्यमहोदयेन कथितषण्मण्डलेषु शुक्रस्य गमनं अस्तोदयञ्च शुभदायको भवति। किन्तु समासंहितायां भरणी-आर्द्रा-स्वाति-धनिष्ठादिमण्डलेषु शुक्रस्य अस्तोदयं यदि भवति तदा शुभफलं भवतीति कथितम्। ज्येष्ठादि-मघादिमण्डलयोः शुक्रोदस्यास्तं शुभफलं न प्रददाति।

## १३.९ दिवादृष्टशुक्रफलम्

आचार्यवराहमिहिरमहोदयेन दिवादृष्टस्य शुक्रस्य विशेषफलमेवं प्रतिपादितमिति।

**मूलपाठः**

**दृष्टोऽनस्तमितेऽर्के भयकृत् क्षुद्रोगकृत्समस्तमहः।**
**अर्द्धदिवसे च सेन्दुर्नृपबलपुरभेदकृच्छुक्रः॥**

**अन्वयः** – अनस्तमितेऽर्के शुक्रः दृष्टः भयकृत् (भवति)। समस्तमहः क्षुद्रोगकृत्। अर्द्धदिवसे च सेन्दुर्नृपबलपुरभेदकृत्॥

**प्रतिपदार्थ** – अनस्तमिते = नास्तमिते। अर्के = रवौ। शुक्रः= भृगोरपत्यं पुमान् भार्गवः। दृष्टः = अवलोकितः। भयकृद् = भयं करोति। समस्तमहः = सफलं दिनम्। क्षुद् = दुर्भिक्षम्। रोगान् = गदान्। अर्द्धदिवसे = मध्याह्नकाले। सेन्दुः =चन्द्रेण सह। नृपस्य = राज्ञः। बलस्य = सेनायाः। पुरस्य = नगरस्य। भेदकृत् = पृथग्भावं करोति।

**व्याख्या** – यदि भृगुपुत्रः सूर्यास्तस्य पूर्वे दिने दृष्टो भवेत्तदा भयम् प्रददाति। सम्पूर्णदिवसे शुक्रोऽयं यदि अवलोकितो स्यात्तदा दुर्भिक्षफलं प्रदाति। भृगुपुत्रोऽयं दुर्भिक्षफलेन सह रोगानपि प्रददाति। यदि मध्याह्नकाले शशिना सह शुक्रे दृष्टे सति तदा नृपसेनानगरेषु भेदं अर्थात् विखण्डनं करोति। तथा च पराशरः



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अहः सर्वं यदा शुक्रो दृश्यतेऽथ महाग्रहः।
तदा त्वागन्तुभिर्ग्रामा बाध्यन्ते नगराणि च॥

आचार्यपराशरमहोदयेन कथितं यत् यदा शुक्रः सम्पूर्णदिवसे दृष्टो भवति तदा बह्यागन्तुभिः ग्रामाः नगराणि च पीडितानि भवन्ति।

### बोधप्रश्नाः

८. शुक्रस्य कियन्मितानि मण्डलानि सन्ति?

९. शुक्रस्य प्रथममण्डले कति नक्षत्राणि भवन्ति?

१०. शुक्रस्य प्रथममण्डलं कस्मान्नक्षत्रादारब्धवान्?

११. शुक्रस्य चतुर्थमण्डले कति नक्षत्राणि भवन्ति?

१२. शुक्रश्चेद् द्वितीयमण्डले उदितस्तदा फलं किमिति?

१३. शुक्रस्य षष्ठमण्डले कति नक्षत्राणि भवन्ति?

१४. पञ्चममण्डले यदि शुक्र उदितः स्यातदा फलं किम्?

## १३.१०सारांशः

आचार्यवराहमिहिरेन शुक्रचाराध्याये सर्वप्रथमे शुक्रस्य नववीथयः त्रयो मार्गाः प्रतिपादिताः। नागगजैरावतवृषभगोजरद्गवमृगाजदहनाख्याः भवन्ति। सौम्यमध्ययाम्यमार्गा इति। अन्यमतानुसारेण सप्तविंशतिनक्षत्राणि नववीथिषु विभक्तानि सन्ति। प्रत्येकस्यां वीथ्यां त्रीणि नक्षत्राणि भवन्ति। नक्षत्रस्यारम्भः अश्विनीतो भवति परन्तु बृहत्संहिताकारः नक्षत्रस्यारम्भः भरणीनक्षत्रतः कृतवान्। एतासु वीथिषु सर्वप्रथमा नागवीथिः वर्तते। नागवीथ्यां भरणी-कृत्तिका-रोहिणीनक्षत्राणि भवन्ति। अन्येषामाचार्याणां मतान्तरएय प्रयोजनं किं वर्तते इत्यपि प्रतिपादितमाचार्यमिहिरेण। शुक्रवीथीनां शुभाशुभफलानि क्रमेण प्रतिपादितानि सन्ति। शुक्रस्य षण्मण्डलानि भवन्ति। तेषां मण्डलानां लक्षणं फलञ्च निरुपितं वर्तते। शुक्रः प्रथममण्डलतः षण्मण्डलं यावत् एतेषु मण्डलेषु उदितः स्यातदा कुत्रचिद् शुभफलं कुत्रचिच्च अशुभफलञ्च प्रददाति। तेषु मण्डलेषु स्थितशुक्रस्य फलं यथा क्रमेण ग्रन्थे आसीत् तथैव प्रतिपादितमत्रेति। स्वात्यादि-ज्येष्ठादिमण्डलयोरनयोश्चेत् पश्चिमायां दिशि शुक्रः उदितो स्यात्तदा शुभदायकं भवति। मघादिमण्डले पूर्वस्यां दिशि शुक्रे उदिते शुभफलं कथितमाचार्यवराहमिहिरेण। दिवसे दृष्टस्य भृगुपुत्रस्य फलमपि निरुपितमाचार्येण। अस्य पाठस्य सारांशोऽयं वर्तते।

## १३.११ शब्दावली

| | | | |
|---|---|---|---|
| १. | परमतेन | = | अन्यमतेन। |
| २. | पवनः | = | स्वातिः। |
| ३. | याम्यः | = | भरणी। |
| ४. | अनलः | = | कृत्तिका। |
| ५. | पैतामहः | = | रोहिणी। |



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



| | | | |
|---|---|---|---|
| ६. | पौष्णः | = | रेवती। |
| ७. | मैत्रम् | = | अनुराधा। |
| ८. | त्वाष्ट्रम् | = | चित्रा। |
| ९. | दहनः | = | अग्निः। |
| १०. | उदङ् | = | सौम्यः। |
| ११. | अपरे | = | अन्याचार्याः। |
| १२. | यथा | = | येन प्रकारेण। |
| १३. | अस्थितान् | = | व्यवस्थितान्। |
| १४. | भमार्गस्य | = | नक्षत्रमार्गस्य। |
| १५. | याम्यः | = | दक्षिणः। |
| १६. | भाग्यम् | = | पूर्वाफाल्गुनीम्। |
| १७. | मध्यमः | = | मध्यममार्गः। |
| १८. | आगमशास्त्रम् | = | वेदाङ्गशास्त्रम्। |
| १९. | विप्रतिपत्तौ | = | सन्देहस्य विषये। |
| २०. | वक्ष्ये | = | कथयिष्ये। |
| २१. | सुभिक्षम् | = | सुभिक्षम्। |
| २२. | शिवः | = | कल्याणः। |
| २३. | अस्तम् | = | अस्तमयम्। |
| २४. | उदयम् | = | उदितम्। |
| २५. | कष्टफलम् | = | अनिष्टफलम्। |
| २६. | न्यूनम् | = | अल्पम्। |
| २७. | अधमम् | = | अनिष्टम्। |
| २८. | ऋक्षम् | = | नक्षत्रम्। |
| २९. | भयम् | = | भयप्रदम्। |
| ३०. | सितम् | = | शुक्रम्। |
| ३१. | हन्यात् | = | नाशयति। |
| ३२. | भम् | = | नक्षत्रम्। |
| ३३. | आक्रान्तः | = | अवरुद्धः। |



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



३४. विचरन् = भ्रमन्।

३५. पिनष्टि = संचूर्णयति नाशयति वा।

३६. प्रत्यन्ताः = सीमान्तवासिनः।

३७. आरोहेत् = उपरि गच्छेत्।

## १३.१२ सन्दर्भग्रन्थः

१. बृहत्संहिता (भट्टोत्पलटीका), व्याख्याकारः - डॉ॰ सुरकान्त झा, चौखम्भा संस्कृत सीरिज आफिस, वाराणसी।

## १३.१३सहायकग्रन्थाः

१. संस्कृत-हिन्दी शब्दकोशः, ले. वामन शिवराम आप्टे, मोतीलाल बनारसीदास पब्लिशर्स प्रा.लि., दिल्ली।

२. बृहत्संहिता, व्याख्याकारः- डॉ. नागेन्द्रपाण्डेयः, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी।

३. बृहत्संहिता, व्याख्याकारः - डॉ. सुरेशचन्द्रमिश्रः, रंजन पब्लिकेशनस्य, 18 अंसारी रोड़, दरियागंज, दिल्ली।

## १३.१४ बोधप्रश्नोत्तराणि

१. नववीथयः।

२. त्रयो मार्गाः।

३. शुक्रः।

४. दक्षिणः।

५. त्रीणि।

६. सुभिक्षं श्रेयश्च (कल्याणः)।

७. अनिष्टफलम्।

८. षण्मण्डलानि।

९. चत्वारि।

१०. भरणीनक्षत्रतः।

११. त्रीणि।

१२. अपरिमितजलं सस्यसम्पत्तिञ्च प्रददाति।

१३. षण्नक्षत्राणि।

१४. क्षुत्तस्कररोगं च प्रददाति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १३.१५ अभ्यासप्रश्नाः

१ परमतानुसारेण नागगजैरावतवीथीनां लक्षणं लिखत।

२ आचार्यवराहकृतवीथीनां विभागः निरुपितः।

३ आचार्यवराहकथितवीथीनां फलं वर्णनीयम्।

४ शुक्रस्य प्रथममण्डलस्य लक्षणं निरूपणीयम्।

५ शुक्रस्य पञ्चममण्डलस्य लक्षणं फलञ्च विलेखनीयम्।

६ शुक्रस्य मण्डलानां विशेषं फलं प्रतिपादनीयम्।

७ दिवादृष्टस्य शुक्रस्य फलं लिखत।

© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# चतुर्दशः पाठः – शुक्रचारः (उत्तरार्धम्)

पाठ संरचना

१४.१ प्रस्तावना
१४.२ उद्देश्म्
१४.३ शुक्रस्य नक्षत्रभेदनफलम्
  १४.३.१ रोहिण्याः शकटभेदे फलम्
  १४.३.२ मृगशिरादिनक्षत्रभेदनफलानि
  १४.३.३ पूर्वोत्तरफल्गुन्यादिनक्षत्रभेदनफलानि
  १४.३.४ अनुराधाज्येष्ठादिनक्षत्रभेदनफलानि
१४.४ शुक्रस्य तिथिषु उदयास्तफलम्
  बोधप्रश्नाः
१४.५ परस्परं सप्तमराशिस्थयोः गुरुशुक्रयोः फलम्
१४.६ शुक्रस्य अग्रे स्थितानां ग्रहाणां फलम्
  १४.६.१ शनिभौमयोः अग्रतः स्थिते फलम्
  १४.६.२ बृहस्पतिबुधयोः अग्रतः स्थिते फलम्
१४.७ शुक्रबिम्बस्य अशुभफलानि
१४.८ शुक्रबिम्बस्य शुभफलानि
  बोधप्रश्नाः
१४.९ सारांशः
१४.१० शब्दावली
१४.११ सन्दर्भः
१४.१२ सहायकग्रन्थाः
१४.१३ बोधप्रश्नोत्तराणि
१४.१४ अभ्यासप्रश्नाः

## १४.१ प्रस्तावनाः

बृहत्संहिताया: शुक्रचाराध्यायस्य शुक्रचारपाठे भवतः स्वागतं वर्तते। अस्याध्यायस्य पूर्वपाठे परमतेन शुक्रवीथीनां वर्णनम्, आचार्यवराहमिहिरमतेन शुक्रवीथीवर्णनम्, शुक्रमार्गवर्णनम्, मार्गवर्णने मतान्तराणि मतान्तरवर्णने प्रयोजनम्, शुक्रवीथीनां फलानि च भवन्तोऽधितवन्तः क्रमेण। शुक्रस्य षण्मण्डलानि प्रथमद्वितीयमण्डलफलम्, तृतीयचतुर्थमण्डलफलम् पञ्चमषष्ठमण्डलफलम् मण्डलानां विशेषफलम् दिवादृष्टशुक्रफलमपि च भवन्तः पठितवन्तः। पाठेऽस्मिन् शुक्रस्य नक्षत्रभेदनफलम्, रोहिण्याः शकटभेदे फलम्, मृगशिरादिनक्षत्रभेदन फलानि अनुराधाज्येष्ठादिनक्षत्रभेदनफलानि च भवन्तः पठिष्यन्ति। अस्मिन् पाठे वर्णितपरस्परं सप्तमराशिस्थयोः गुरुशुक्रयोः फलम् शुक्रस्याग्रे स्थितानां ग्रहाणां फलम् शनिभौमयोः अग्रतः स्थिते फलम् वृहस्पतिवुधयो अग्रतः स्थिते फलम् शुक्रविम्वस्य अशुभफलानि शुक्रविम्बस्य शुभफलानि चापि भवन्तः पठिष्यन्ति। अतोऽत्रोपर्युक्त कथितान् विषयान् ध्यानेन भवन्तः पठन्तु।

## १४.२ उद्देश्यम्

अस्य पाठस्याध्ययनेन भवान् –

- शुक्रस्य नक्षत्रभेदफलस्य ज्ञानं करिष्यति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



- शुक्रस्य तिथिषु उदयास्तफलं ज्ञास्यति।
- शुक्रस्य अग्रतः स्थितानां ग्रहाणां फलं ज्ञास्यति।
- शुक्रविम्बस्य अशुभफलनामध्ययनं करिष्यति।
- शुक्रविम्बस्य शुभफलानामध्ययनं करिष्यति।

## १४.३ शुक्रस्य नक्षत्रभेदनफलम्

आचार्यवराहकृतबृहत्संहितायां नक्षत्राणां भेदनफलमेवं प्रतिपादितमिति।

**मूलपाठः**

**भिन्दन् गतोऽनलर्क्षं कूलातिक्रान्तवारिवाहाभिः।**
**अव्यक्ततुङ्गनिम्ना समा सरिद्भिर्भवति धात्री॥**

**अन्वयः** – अनलर्क्षं भिन्दन् गतः कूलातिक्रान्तवारिवाहाभिः। अव्यक्ततुङ्गनिम्ना सरिद्भिः समाधात्री भवति।

**प्रतिपदार्थः** – अनलर्क्षम् = कृत्तिकानक्षत्रम्। भिन्दन् = भित्वा। गतः = गतवान् कूलातिक्रान्तम् = कूलातिक्रमणम्। वारि = जलम्। वाहाभिः स्वसहजप्रवाहेण याः जलं वहन्ति। अव्यक्तम् = न व्यक्तम्। तुङ्गम् =उच्चम्। निम्नम् = नीचम्। समाः समानरुपा। धात्री = भूः।

**व्याख्या** – यदा भृगुपुत्रः कृत्तिकानक्षत्रं भिन्दन् गमनं करोति तदा नद्यः स्वकीयतटानां अतिक्रमणं कृत्वा जलं वहन्ति। अर्थात् आत्मीयं प्रवाहमतिक्रम्य = प्रभूतं जलं वहन्ति। एवं नदीनां जलेन उच्चा निम्ना धात्री समा भवति। अत्र तात्पर्यमिदं वर्तते यत् भूमेरुतुङ्गनिम्नभागाः अतिजलप्रवाहेन समा भवति।

### १३.३.१ रोहिण्याः शकटभेदे फलम्

आचार्यवराहमिहिरेण रोहिण्याः शकटभेदे फलं अनेन प्रकारेण निरुपितं वर्तते।

**मूलपाठः**

**प्राजापत्ये शकटे भिन्ने कृत्वेव पातकं वसुधा।**
**केशास्थिशकलशबला कापालमिव व्रतं धत्ते॥**

**अन्वयः** – प्राजापत्ये शकटे भिन्ने कृत्वेव वसुधा पातकं केशास्थिशकलशबला कापालमिवं व्रतं धत्ते।

**प्रतिपदार्थः** – प्राजापत्ये = रोहिण्याः। शकटे = शकटयाने भित्रे भेदने। कृत्वैव = कृत्य। पातकम् = ब्रह्महत्याम्। वसुधा = पृथिवी। केशैः = मूर्द्धजैः। अस्थिशकलैः = अस्थिखण्डैः। शबला = मिश्रितशुक्लकृष्णाविविधवर्णयुक्ता वा। कापामिव = कापालसदृशं व्रतं = प्रायश्चित्तम्। धत्ते = धारयति।

**व्याख्या** – यद्यत्र शुक्रः रोहिण्याः शकटभेदनं कृत्वा पृथिवी ब्रह्महत्यानिवृतये कापालिकं इव (पातकं) केशैः अस्थिखण्डैः मिश्रितशुक्लकृष्णा वर्णसदृशं रूपं धारयति अर्थात् इयं वसुधा कपालव्रतं धारयति। अत्र ब्रह्महत्यायाः कृते कपालव्रतं (प्रायश्चित्तं)



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



भवति। तथा च ब्रह्मसिद्धान्ते आह –

**विक्षेपोऽशद्वितयादधिको वृषभस्य सप्तदशभागे।**
**यस्य ग्रहस्य याम्यो भिनत्ति शकटं स रोहिण्याः।**

शुक्रस्य रोहिण्याः शकटभेदने यत् फलं भवति तत् फलं गणिज्ञैः प्रतिपादितं स्वकीयसिद्धान्तेषु यथा। ब्रह्मसिद्धान्ते आचार्यब्रह्मगुप्तेन निगदितं यद्यदि वृषराशेः सप्तदशांशे यस्य ग्रहस्य याम्यशरः अंशद्वयादधिको भवेत्तदा सः रोहिणीशकटस्य भेदनं करोति। तथा च भानुभट्टः कथितः।

**वृषस्यांशे सप्तदशे विक्षेपो यस्य दक्षिणः।**
**अंशद्वयाधिको भिन्द्याद्रोहिण्याः शकटं तु सः॥**

### १४.३.२ मृगशिरादिनक्षत्रभेदनफलानि

बृहत्संहिताकारेण मृगशिरादिनक्षत्रभेदफलानि प्रतिपादितानि एवमिति।

**मूलपाठः**

**सौम्योपगतो रससस्य-संक्षयायोशनाः समुदिष्टः।**
**आर्द्रागतस्तु कोशलकलिङ्गहा सलिलनिकरकरः॥**

**अन्वयः** – उशनाः सौम्योपगतो रससस्यसंक्षयाय समुदिष्टः। आर्द्रागतस्तु कोशलकलिङ्गहा सलिलनिकरकरः॥

**प्रतिपदार्थः** – उशनाः = शुक्रः। सौम्ये =मृगशिरसि। उपगतः = प्राप्तः। रसानाम् = मधुरादीनाम्। सस्यानाम् = धान्यानाम्। संक्षयाय = विनाशाय। समुदिष्टः = कथितः। आर्द्रायाम् = आर्द्रनक्षत्रे। गतः = प्राप्तः। तु = तदा। कोशलस्य = कोशलप्रदेशस्य। कालिङ्गस्य = कलिङ्गप्रदेशस्य। सलिलम् = जलम्। निकटम् = निवहम्।

**व्याख्या** – शुक्रः यदि मृगशिरानक्षत्रे गतो भवेत्तदा मधुरादीनां सस्यानां विनाशकः भवति। आर्द्रानक्षत्रे भृगुपुत्रे गते सति कौशलप्रदेशस्य जनान् कलिङ्गप्रान्तस्य जनांश्च हन्ति शुक्रोऽयम्। सलिलनिकरकरः अर्थात् जलस्य आधिक्यं करोति।

पुनर्वसुतिष्ययोः फलमाह–

**अश्मकवैदर्भाणां पुनर्वसुस्थे सित महाननयः।**
**पुष्ये पुष्टा वृष्टिर्विद्याधररणविमर्दश्च॥**

**अन्वयः** – सितः पुनर्वसुस्थे अश्मकवैदर्भाणां महाननयः (भवति)। पुष्ये पुष्टा वृष्टिर्विद्याधररणविमर्दश्चेति॥

**प्रतिपदार्थः** – सितः = भृगुपुत्रः। पुनर्वसु = पुर्नवसुनक्षत्रे। स्थे=स्थिते। अश्मकानाम् = अश्मकप्रदेशस्यजनानाम्। वैदर्भाणाम् = वैदर्भप्रान्तस्य जनानाम्। महान् = महत्। अननयः = उपद्रवः (भवति)। पुष्ये = तिष्ये। पुष्टा= बह्वी। वृष्टिः = वर्षकरः। विद्याधराणाम् = देवयोनीनाम्। रणे = संग्रामे। विमर्दः = संमर्दः।

**व्याख्या** – यदि शुक्रः पुनर्वसुनक्षत्रे स्थितो गतो वा भवेत्तदा अश्मकजनानां विदर्भजनानाञ्च कृते उपद्रवकारको भवत्ययम्। तिष्ये अर्थात् पुष्ये नक्षत्रे यदि शुक्रः स्थितो गतो वा स्यात्तदा वृष्टिः भवति। तथा विद्याधराणामर्थात् देवयोनीनां संग्रामे संमर्दो भवति। देवस्य योनौ ये समुत्तपन्नास्ते देवयोनयः कथ्यन्तेऽस्माभिराचार्यैः।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



आश्लेषामघयोः फलमाह

मूलपाठः

**आश्लेषासु भुजङ्गमदारुणपीडावहश्चरन् शुक्रः।**
**भिन्दन् मघां महामात्रदोषकृद् भूरिवृष्टिकरः॥**

**अन्वयः** – शुक्रः आश्लेषासु चरन् भुजङ्गमदारुणपीडावह इति। मघां भिन्दन् महामात्रदोषकृद् भूरिवृष्टिकरो (भवति)।

**प्रतिपदार्थः** – शुक्रः = भृगुपुत्रः। आश्लेषा = आश्लेषानक्षत्रे। चरन् = तिष्ठन्। भुजङ्गेभ्यः = सर्पेभ्यो। दारुणाम् = लोकानाम्। पीडाम् = कष्टम्। वहेत् = कुर्यात्। मघाम् = मघानक्षत्रम्। भिन्दन् = भित्वा अर्थात् भेदनं कुर्वन्। महामात्राणाम् = हस्तिसाधनपतीनाम्। दोषकृत् = दोषकारकः। भूरिः = प्रचुरः। वृष्टिकरो = वर्षकरः। इति।

**व्याख्या** – यदि भृगुपुत्र आश्लेषानक्षत्रे भेदनं करोति तदा सर्पेभ्यो लोकानां कृते तीव्रपीडादायको भवति। मघानक्षत्रे च भेदनं यदा शुक्रः करोति तदा महामात्राणां अर्थात् हस्तिसाधनपतीनां कृते दोषकारको भवति। शुक्रोऽयं मघायां स्थितो भवेत्तदा बहुवृष्टिकरो भवति। भेदलक्षणं गणितकारैरुक्तम्–

**छादयति योगतारां मानार्द्धोनाधिकाद् भविक्षेपात्।**
**स्फुटविक्षेपो यस्याधिकोनको भवति समदिक्स्थः।**

**विक्षेपेऽन्त्ये सौम्ये तृतीयतारां भिनत्ति पित्र्यस्य।**
**इन्दुर्भिनत्ति पुष्यं पौष्णं वारुणमविक्षिप्तः॥**

यदि भिन्नदिशि स्थितयोगतारायाः सौम्ययाम्यान्तरं यदा मानार्धेन अल्पो भवति तदा ग्रहः योगतारामाच्छादयति। यद्यत्र नक्षत्रशरात् मानार्धस्पष्टविक्षेपाधिकः न्यूनो वा भवेत्तथा चैकस्यां दिशि स्यातदा योगतारायाः अच्छादनं करोति। उत्तरविक्षेपे सति परमशरात् मघायाः तृतीयनक्षत्रं भिनत्ति। पुष्यरेवतीशतभिषकनक्षत्राणां चन्द्रे स्वल्पविक्षेपे सत्यपि भेदनं करोति।

### १४.३.३ पूर्वोत्तरफाल्गुन्यादिनक्षत्रभेदनफलानि

आचार्यवराहमिहिरः पूर्वोत्तरफाल्गुन्यादिनक्षत्राणां भेदनफलान्येवं प्रतिपादितवानत्रेति।

मूलपाठः

**भाग्येशबरपुलिन्दप्रध्वंसकरोऽम्बुनिबहमोक्षाय।**
**आर्यम्णे कुरुजाङ्गलपाञ्चालघ्नः सलिलदायी॥**

**अन्वयः** – भाग्ये शबरपुलिन्दप्रध्वंसकरोऽम्बुनिवहमोक्षाय। आर्यम्णे कुरुजाङ्गलपाञ्चालघ्नः सलिलदायी (भवति)।

**प्रतिपदार्थः** – भाग्ये = पूर्वाफाल्गुनीनक्षत्रे। शबरः = शबरप्रदेशः। पुलिन्दः = पुलिन्दप्रदेशः। प्रध्वंसकरः = विनाशकरः। अम्बुनः = जलस्य। निवहम् = वेगम्। मोक्षाय = नाशस्य कृते। आर्यम्णे = उत्तरफल्गुन्याम्। कुरुन् = कुरुजनान्। जाङ्गलम् = स्वल्पोदकस्थानम्। पाञ्चालान् = पाञ्चलप्रदेशस्य जनान्। घ्नः = हन्ति। सलिलं = जलं प्रददातीति सलिलदायी।

**व्याख्या** – शुक्रश्चेत् पूर्वाफाल्गुनीनक्षत्रे भेदितस्तदा शबरप्रान्तस्य जनान्



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



पुलिन्दप्रदेशस्य जनांश्च विनाशयति। अम्बुनिवहः अर्थात् जलस्य वेगं प्रवर्धते। आर्यम्णे अर्थात् उत्तराफाल्गुनीनक्षत्रे भृगुपुत्रश्चेत् भेदनं करोति तदा कुरुप्रदेशस्य जनान् विनाशयति। अयं शुक्रः जाङ्गलप्रदेशस्य निवासीनां पाञ्चालक्षेत्रनिवासीनाञ्च कृतेऽपि विनाशं करोति। तथा च अत्यधिकं जलं प्रददाति।

**हस्तचित्रयोः भेदनफलमाह**

**मूलपाठः**

**कौरवचित्रकराणां हस्ते पीडा जलस्य च विरोधः।**
**कूपकृदण्डजपीडा चित्रास्थे शोभना दृष्टिः॥**

**अन्वयः** – हस्ते कौरवचित्रकराणां पीडा जलस्य न विरोधः (भवति)। चित्रास्थे कूपकृद्दण्डजपीडा शोभना दृष्टिरिति।

**प्रतिपदार्थः** – हस्ते = हस्तनक्षत्रे। कोरवाः = कुरुक्षेत्रस्य जनाः। चित्रकराः = शिल्पिनः। चित्रस्य कार्यं करोति यः सः चित्रकारः। पीडा = कष्टम्। जलस्य = अम्बुनः। विरोधो = अवर्षणम्। चित्रास्थे = चित्रानक्षत्रे स्थिते। कूपकृताम् = कूपकराणाम्। अण्डजानाम् = पक्षिणाम्। पीडा = कष्टम्। वृष्टिः = वर्षकरः। शोभना = कालोपयोग्या भवति।

**व्याख्या** – शुक्रः यदि हस्ते नक्षत्रे भेदितः स्थितो वा स्यात्तदा कुरुक्षेत्रजनानां चित्रकाराणाञ्च कृते कष्टकारकस्तथा जलस्याभावो भवति। चित्रानक्षत्रस्थे शुक्रे सति कूपकर्तॄन् अण्डपक्षिणः। एतान् सर्वान् पीडयति। तथा वृष्टिश्च शोभना कालोपयोग्या भवति। कालोपयोग्या अर्थात् काले समये उपयोग्याः उचिताः शोभना शुभा वृष्टिः वर्षा भवतीति।

**स्वातीविशाखयोः भेदनफलमाह**

**मूलपाठः**

**स्वातौ प्रभूतवृष्टिर्दूतवणिग्नाविकान् स्पृशत्यनयः।**
**ऐन्द्राग्नेऽपि सुवृष्टिर्वणिजां च भयं विजानीयात्॥**

**अन्वयः** – स्वातौ प्रभूतवृष्टिर्दूतवणिग्नाविकान् स्पृशत्यनयः (भवति)। ऐन्द्राग्ने अपि सुवृष्टिर्वणिजां च भयं विजानीयात्।

**प्रतिपदार्थः** – स्वातौ = स्वातीनक्षत्रे। प्रभूता = बह्वी। वृष्टिः = वर्षकरः। दूताः = गमागमिनः वणिजः = क्रयविक्रयज्ञाः। नाविकाः = नौकर्णधाराः। अनयः = उपद्रवः। स्पृशति भवति। ऐन्द्राग्ने = विशाखाम्। सुवृष्टिः = शोभाना वृष्टिः। वणिजाम् = किरातानाम्। भयम् = भीतिम्। विजानीयाद् = विन्द्यात्।

**व्याख्या** – यदि शुक्रः स्वातौ नक्षत्रे भेदनं करोति तदा बह्वी वृष्टिर्भवति। तथा गमागमिनः क्रयविक्रयज्ञाः नौकर्णधाराः एते सर्वे उपद्रवग्रस्ताः भवन्ति। विशाखायां नक्षत्रे शुक्रे स्थिते सति वणिजामर्थात् किरातप्रदेशस्य क्रयविक्रयज्ञानां कृते भयदायको भवति। तथा शोभनां वृष्टिं प्रददाति।

### १४.३.४ अनुराधाज्येष्ठादिनक्षत्रभेदनफलानि

आचार्यवराहमिहिरमहादेयेन अनुधाराज्येष्ठादि नक्षत्राणां भेदनफलानि अनेन प्रकारेण प्रतिपादितान्यत्रेति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**मूलपाठः**

**मैत्रे क्षत्रविरोधो ज्येष्ठायां क्षत्रमुख्यसन्तापः।**
**मौलिकभिषजां मूले त्रिष्वपि चैतेष्वनावृष्टिः॥**

**अन्वयः** – मैत्रे = अनुराधायाम्। क्षत्रम् = क्षत्रियाणाम्। विरोधः= उपद्रवः। ज्येष्ठायाम् = ज्येष्ठानक्षत्रे। क्षत्रमुख्यानाम् = क्षत्रियप्रधानानाम्। सन्तापः = उपद्रवः। मूले = मूलनक्षत्रे। मौलिकानाम् = मूलद्रव्यविक्रयिणाम्। भिषजाम् = वैद्यानाम्। त्रिष्वपि = अनुराधाज्येष्ठामूलनक्षत्रेषु। अनावृष्टिम् = अवर्षणम्।

**व्याख्या** – यदि शुक्रः अनुराधायां नक्षत्रे स्थितो भवेत्तदा क्षत्रियाणां परस्परं विरोधो भवति। तथा ज्येष्ठानक्षत्रे शुक्रे स्थिते सति क्षत्रियप्रधानानां सन्तापो भवति। मूलनक्षत्रे स्थिते शुक्रे मूलद्रव्यविक्रयिणां वैद्यानाञ्च (चिकित्सकानाम्) कृते कष्टं भवति। एतेषु त्रिषु नक्षत्रेषु अवर्षणं भवति।

**पूर्वाषाढोत्तराषाढश्रवणधनिष्ठानक्षत्रेषु शुक्रस्य भेदनफलमाह**

**मूलपाठः**

**आप्ये सलिलजपीडा विश्वेशे व्याधयः प्रकुप्यन्ति।**
**श्रवणे श्रवणव्याधिः पाखण्डिभयं धनिष्ठासु॥**

**अन्वयः** – आप्ये सलिलजपीडा विश्वेशे व्याधयः प्रकुप्यन्ति। श्रवणे श्रवणव्याधिः धनिष्ठासु पाखण्डिभयं (भवति)।

**प्रतिपदार्थः** – आप्ये = पूर्वाषाढायाम्। सलिलजै= जलोद्भवैः। जलेन उद्भवः जलोद्भवः। प्राणिभिर्दव्यैश्च। पीडा = कष्टमिता। विश्वेशे = उत्तराषाढायाम् व्याधयः रोगाः। प्रकुप्यन्ति = प्रकोपाः भवन्ति। श्रवणे = श्रवणनक्षत्रे। श्रवणव्याधिः = कर्णरोगः। धनिष्ठासु = धनिष्ठानक्षत्रेषु। पाखण्डिनो = वेदवाह्याः भयम् = भीतिम् (भवति)।

**व्याख्या** – शुक्रोऽयं यदि पूर्वाषाढायां नक्षत्रे स्थितो भवेत्तदा जलीयजन्तूनां जलीयद्रव्यैः जीवित जनान् च पीडयति। केचिदाचार्याः कथयन्ति यत् स शुक्रः जलीयपदार्थानपि पीडयति। विश्वेशः अर्थात् उत्तराषाढनक्षत्रे शुक्रस्य स्थिते सति जनेषु रोगाणां प्रकोपो भवति। रोगस्य अधिकता अपि दृश्यते। श्रवणनक्षत्रे शुक्रः भेदनं यदा करोति तदा कर्णरोगः भवति। तथा धनिष्ठानक्षत्रे शुक्रे स्थिते सति पाखण्डीभिः भयो भवति।

**शतभिषक्पूर्वभद्रपदयोः भेदनफलमाह**

**मूलपाठः**

**शतभिषजि शौण्डिकानामजैकभे द्यूतजीविनां पीडाम्।**
**कुरुपाञ्चालानामपि करोति चास्मिन् सितः सलिलम्॥**

**अन्वयः** – सितः शतभिषजि शौण्डिकानामजैकभे द्यूतजीविनां पीडां करोति। चास्मिन् कुरुपाञ्चालानामपि सलिलं करोति।

**प्रतिपदार्थः** – सितः = शुक्रः। शतभिषजि = शतभिषक्नक्षत्रे। शौण्डिनाम् = मद्यपानप्रसक्तानाम्। अजैकभे = पूर्वभाद्रपदायाम्। द्यूतजीवानाम् = द्यूतेन ग्लहेन ये जीवन्ति ते द्यूतजीविनः। पीडाम् = कष्टकारकम्। कौरवाः = कुरुप्रान्ते ये निवसन्ति ते कौरवाः भवन्ति। पाञ्चालजनाः = पाञ्चालप्रान्तस्य निवासिनः। अस्मिन् नक्षत्रे। जलम् = सलिलम्। करोति = प्रददाति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्याख्या** – भृगुपुत्रश्चेत् शतभिषजि नक्षत्रे भेदनं करोति तदा मद्यपाने आसक्तजनानां कृते पीडादायको भवति। पूर्वाभाद्रपदि नक्षत्रे शुक्रे स्थिते सति द्युतेन आजीविकान् जनान् पीडयति। कुरुप्रान्तस्य जनान् पाञ्चालप्रान्तस्य जनान् चापि पीडयति। नक्षत्रेऽस्मिन् शुक्रः जलं प्रदायकं भवति।

**उत्तरभद्रपद्रेवत्यश्विनीभरणीनक्षत्राणां भेदनफलमाह**

**मूलपाठः**

**आहिर्बुध्न्ये फलमूलतापकृद्यापिनां च रेवत्याम्।**
**अश्विन्यां हयपानां याम्ये तु किरातयवनानाम्॥**

आहिर्बुध्न्ये मूलतापकृत्फलम् रेवत्याञ्च यायिनाम्। अश्विन्यां हयपानां याम्ये तु किरातयवनानां तापकरो भवति।

**प्रतिपदार्थः** – आहिर्बुध्न्ये = उत्तराभद्रपदि। फलानां मूलकानाञ्च। तापकृत् = पीडाकरः। रेवत्याम् = पौष्णे। यायिनां = पथिकानां। अश्विन्याम् = दस्रे। हयपानाम् = अश्वपतीनाम्। याम्ये = भरण्यां नक्षत्रे। किरातजनाः = किरातप्रान्तस्य जनाः। यवनानाम् = म्लेच्छानाम्।

**व्याख्या** – शुक्रः आहिर्बुध्न्ये स्थितः भेदितो वा स्यात्तदा फलानां मूलकानाञ्च कृते पीडाकरो भवति। रेवत्यां यदि स्थिते शुक्रे सति पथिकजनान् पीडयति। यदि अश्विनीनक्षत्रे शुक्रस्यैतादृशी स्थितिः भवेत्तदा अश्वपतीनां कृते पीडाकरः। तथा च भरणीनक्षत्रेऽपि भृगुपुत्रस्यैतादृशी स्थितिः स्यात् तदा म्लेच्छानां किरातप्रान्तस्य जनानाञ्च कृते सन्तापकरः भवति। आचार्यकश्यपेन सप्तविंशतिनक्षत्रेषु शुक्रश्च स्थितो भवेत्तदा तेषां नक्षत्राणां फलं प्रतिपादितं स्वरचितसंहितायाम्। पूर्वाफाल्गुनी उत्तराफाल्गुनी स्वाती ज्येष्ठा कृत्तिका उत्तराभाद्रपद आर्द्रा पुष्यनक्षत्रेषु गतः शुक्रः स्निग्धा रश्मिवान् वर्षकरोश्च भवति। यथाह कश्ययः –

**भेदयेत् कृत्तिकां शुक्रो बहुतोयं विमुञ्चति।**
**रोहिण्यां मरणं घोरं गृध्राकुलभयाकुलम्॥**

**मृगे तु सर्वसस्यानां क्षयं कुर्याद् भृगोः सुतः।**
**आर्द्रासु च कलिङ्गानां कोशलानां भयावहः।**

**पुनर्वसौ विदर्भाणां पीडयत्युशनास्तथा॥**
**पुष्ये पुष्टिं समायान्ति जनाः सस्यानि वृष्टयः॥** इत्यादयः

## १४.४ शुक्रस्य तिथिषु उदयास्तफलम्

आचार्यवराहमिहिरमहोदयेन तिथिषु शुक्रस्योदयास्तं भवेत्तदा तस्य फलमेवं प्रकारेण प्रतिपादितं वर्तते।

**मूलपाठः**

**चतुर्दशीं पञ्चदशीं तथाष्टमीं तमिस्रपक्षस्य तिथिं भृगोः सुतः।**
**यदा व्रजेद् दर्शनमस्तमेति वा तदा मही वारिमयीव लक्ष्यते॥**

**अन्वयः** – भृगोः सुतः तमिस्रपक्षस्य चतुर्दशीं पञ्चदशीं तथाष्टमीं तिथि यदा दर्शनमस्तमेति वा व्रजेद् तदा मही वारिमयीव लक्ष्यते।



**प्रतिपदार्थः** – भृगोः सुतः = भृगोरपत्यं पुमान् भार्गवः अर्थात् शुक्रः। तमिस्रपक्षस्य =

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



कृष्णपक्षस्य। चतुर्दशीम् = चतुर्दशीतिथिम्। पञ्चदर्शीं = अमावस्याम् (दर्शः)। अष्टमीं = अष्टमीतिथिम्। यदा = चेत्। दर्शनम् = उदयम्। अस्तम् = अनुदितम्। वा ब्रजेद् = गच्छेत्। मही = भूमिः। वारिमयीव = जलमयीव। लक्ष्यते = अवलोक्यते।

**व्याख्या** – यदा भृगुपुत्रः कृष्णपक्षस्य चतुर्दशीं अमावस्यां अष्टमीतिथिं च उदितोऽनुदितो वा भवेत्तदा भूमिः जलमयीव दृश्यते। आचार्यकश्यप महोदयेन कथितं यत् शुक्रः कृष्णपक्षस्यामावश्याचतुर्दश्याष्टमीतिथिषु उदितो भवेत् तदा वृष्टेः कारको भवति। यथा–

**कृष्णपक्षे ह्यमावस्याचतुर्दश्यष्टमीषु च।**
**उदयं भार्गवः कुर्यात्तदा वृष्टिं प्रमुञ्चति॥**

**बोधप्रश्नाः**

१. यदा शुक्रः मृगशिरानक्षत्रे भेदितस्तदा तस्य किं फलं भवति?

२. भुजङ्ग इति पदस्यार्थः कः?

३. आश्लेषानक्षत्रे शुक्रः भेदनं करोति तदा फलं किम्?

४. अनुराधानक्षत्रे शुक्रः स्थितस्तदा तस्य फलं किम्?

५. मूलनक्षत्रे शुक्रस्य किं फलं किम्?

६. 'सलिलम्' इति पदस्यार्थः कः?

७. रेवत्यां नक्षत्रे स्थिते शुक्रस्य फलं किम्?

८. याम्यनक्षत्रे स्थितशुक्रस्य फलं किम्?

## १४.५ परस्परं सप्तमराशिस्थयोः गुरुशुक्रयोः फलम्

अन्योन्यं सप्तमराशिस्थयोः गुरुशुक्रयोः फलमेवं प्रकारेण प्रतिपादितमाचार्यवराहमिहिरेण–

**मूलपाठः**

**गुरुर्भृगुश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगौ यदा।**
**तदा प्रजा रुग्भयशोकपीडिता न वारि पश्यन्ति पुरन्दरोज्झितम्॥**

**अन्वयः** – यदा गुरुर्भृगुरश्चापरपूर्वकाष्ठयोः परस्परं सप्तमराशिगयौ तदा प्रजा रुग्भयशोकपीडिता पुरन्दरोज्झितम् वारि न पश्यन्ति॥

**प्रतिपदार्थः** – यदा =चेत्। गुरुः= जीवः। भृगुः = शुक्रः। अपरा = पश्चिमा। पूर्वा = प्राची = काष्ठा = दिक्। परस्परम् = अन्योन्यम्। सप्तमराशिगः = सप्तमराशौ गतः स सप्तमराशिगः। शुक्रगुरू सप्तमराशिगौ। प्रजाः = जनाः। रोगः = रोगदः। भयम् = भीतिम्। शोकम् = दुःखम्। पीडिता = दुःखिता। पुरन्दरोज्झितम् = इन्द्रोत्सृष्टम्। वारि = जलम्। नाश्यन्ति = नावलोकयन्ति।

**व्याख्या** – यदा गुरुशुक्रौ परस्परमपरपूर्वदिशोः सप्तमराशिगौ स्यातां तदा जनान् रोगेन भयेन शोकेन च पीडयतः। इन्द्रोत्सृष्टं जलं नावलोकयन्ति। कदाचिद् पूर्वदिग्गतः शुक्रोऽपरकाष्ठा-गतो गुरुः। कदाचिद् पूर्वकाष्ठा-गतो गुरुरपरकाष्ठा-गतः शुक्रः। नन्वत्रपर-पूर्वकाष्ठयोरित्यनेनैव सिद्धे सप्तमग्रहणं किमर्थम्? यदि सप्तमराशिग्रहणं न क्रियते तदापरपूर्वस्थावन्येनापि प्रकारेण भवतः। एकः प्राक्कपाले स्थितोऽपरोऽपरकपालस्थः।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



तदापरपूर्वकाष्ठास्थौ भवतः इत्यतः सप्तमराशिग्रहणं कृतम्। यथोदयास्तयो रेखासक्तयोरयं योगो भवति नान्यथा।

**आचार्यपराशरोक्तं स्वरचितसंहितायाम् –**

**उदयास्तमयस्थौ तु यदा शुक्रवृहस्पती।**
**पूर्वसन्ध्यागतौ स्यातां जनयेतां तदा भयम्॥**

यदा गुरुशुक्रौ पूर्वापरकाष्ठयोः उदयास्तमयौ गतौ स्यातां तदा भयं जनयेताम्। गर्गसंहितायां अपि कथितं यत् यदि गुरुशुक्रौ पूर्वापरदिशोः अन्योन्यं सप्तमस्थानगौ स्यातां तदा महद्भयं जनयेताम्।

**अन्योन्यमस्तसंस्थौ तु यदि शुक्रबृहस्पती।**
**पूर्वसन्ध्यागतौ घोरं जनयेतां महद्भयम्॥**

**तस्मात् साधूक्तं गुरुः शुक्रः पृष्ठतः पुरतो वेति।**

## १४.६ शुक्रस्याग्रे स्थितानां ग्रहाणां फलम्

शुक्रस्याग्रे स्थितानां ग्रहाणां फलमेवं प्रकारेण प्रतिपादितम् वर्तते।

**मूलपाठः**

**यदा स्थिता जीवबुधारसूर्यजाः सितस्य सर्वेऽग्रपथानुवर्तिनः।**
**नृनागविद्याधरसङ्गरास्तदा भवन्ति वाताश्च समुच्छ्रितान्तकाः॥**

**अन्वयः** – यदा सितस्य सर्वेऽग्रपथानुवर्तिनः जीवबुधारसूर्यजाः स्थिताः। तदा नृनागविद्याधरसङ्गराः वाताश्च समुच्छ्रितान्तकाः भवन्ति।

**प्रतिपदार्थः** – यदा = यस्मिन् काले। सितस्य = शुक्रस्य। सर्वे = निर्दिष्टाग्रहाः। अग्रपथानुवर्तिनः = अग्रिममार्गानुवर्तिनः। जीवः = बृहस्पतिः। बुधः = बुधग्रहः। आरः = भौमः। सूर्यजः = शनैश्चरः। स्थिताः–विद्यमानाः। तदा = तस्मिन् काले। नृणां = मनुष्याणाम्। नागानाम् = सर्पाणाम्। विद्याधाराणाम्–देवयोनीनाम्। सङ्गराः – संग्रामाः। वाताः = वायवः। समुच्छ्रितानाम् = उच्चपर्वतानां वृक्षानदीनाम् च । अन्तकाः = श्रृङ्गाग्रपातिनः। श्रृङ्गस्य = शिखरस्य अग्रः = अग्रभागः। भवतीति।

**व्याख्या** – यस्मिन् काले जीवबुधभौमशनैश्चरग्रहाः शुक्रस्याग्रिमराशौ स्थिताः स्युस्तस्मिन् काले मनुष्याणां सर्पाणां विद्याधराणामर्थात् देवयोनीनां च संग्रामाः भवन्ति तथा च तुङ्गपर्वतावासीनां वृक्षादीनाञ्चपि विनाशो भवति।

**मूलपाठः**

**न मित्रभावे सुहृदो व्यवस्थिताः क्रियासु सम्यग् न रता द्विजातयः।**
**न चाल्पमप्यम्बु ददाति वासवो भिनत्ति वज्रेण शिरांसि भुभृताम्॥**

**अन्वयः** – मित्रभावे सुहृदो व्यवस्थिता न, द्विजातयः क्रियासु सम्यग् न रताः (भवन्ति)। वासवः च चाल्पमप्यम्बु ददाति। भूभृतां वज्रेणशिरांसि भिनन्ति॥

**प्रतिपदार्थः** – मित्रभावे = सुहृदभावे। सुहृद् = मित्राणि। न व्यवस्थिताः = न संस्थिताः। द्विजातयः = ब्राह्मणाः। क्रियासु = अग्निहोत्राद्यासु। रताः = सक्ताः। न भवन्ति। वासवः = इन्द्रः। अल्पम् = स्तोकम्। अम्बुः = जलम्। न ददाति = न प्रयच्छति। भूभृताम् = पर्वतानाम्। वज्रेण = उल्कया। शिरांसि = मस्तकानि। भिनत्ति = विदारयति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्याख्या** – यदि मित्रग्रहाः मित्रभावे संस्थिताः न स्युस्तदा द्विजातय अर्थात् ब्राह्मणाः अग्निहोत्रादिक्रियासु आसक्तताः न भवन्ति। वासवः अर्थात् इन्द्रः अल्पं जलमपि न प्रददाति तथा च पर्वतानां मस्तकानि उलकापातेन विदारयति।

### १४.६.१ शनिभौमयोः अग्रतः स्थिते फलम्

शनिभौमयोः अग्रतः स्थिते फलमेवं प्रकारेण वराहमिहिरमहोदयेन वर्णितमिति–

**मूलपाठः**

**शनैश्चरे म्लेच्छविडालकुञ्जराः खरा महिष्योऽसितधान्यशूकराः।**
**पुलिन्दशूद्राश्च सदक्षिणापथाः क्षयं व्रजन्त्यक्षिमरुढगदोद्भवैः॥**

**अन्वयः** – शनैश्चरे म्लेच्छविडालकुञ्जराः खरा महिष्योऽस्तिधान्यशूकराः पुलिन्दशूद्राश्च सदक्षिणापथाः अक्षिमरुद् गदोद्भवैः क्षयं व्रजन्ति।

**प्रतिपदार्थः** – शनैश्चरे = शनिग्रहे। म्लेच्छाः = म्लेच्छजनाः अर्थात् यवनप्रदेशस्य जनाः। विडालाः = मार्जाराः। कुञ्जराः = गजाः। खराः = गर्दभाः। महिष्यः = महिषपशुप्रसिद्धाः। असितधान्यम्= कृष्णधान्यम्। शूकराः = वराहाः। पुलिन्दाः = निषादजनाः। शूद्राः= शूद्रकर्मणि ये रतास्ते शूद्राः भवन्ति। सदक्षिणापथाः = दक्षिणादिग्निवासिभिर्जनैः सहिताः। अक्षिषु = नेत्रेषु। गदाः = रोगाः। महता = वायुना। उद्भवैः = समुत्पन्नैः दोषैः। क्षयम् = विनाशम्। व्रजन्ति = कुर्वन्ति।

**व्याख्या** – यदि शुक्रग्रहात् शनिः अग्रगामी भवेत् तदा म्लेच्छजनाः, मार्जाराः गजाः गर्दभाः कृष्णधान्यम् वराहाः निषादजनाः शूद्रजनाः दक्षिणदिग्निवासिभिर्जनैः सहिताश्च एतान् सर्वान् विनाशयति। नेत्ररोगैः वायुनोत्पन्नरोगैः एतान् सर्वान् विनाशयन्ति।

**भौमेऽग्रतः स्थिते फलमाह**

**मूलपाठः**

**निहन्ति शुक्रः क्षितिजेऽग्रतः प्रजां हुताशशस्त्रक्षुदवृष्टितस्करैः।**
**चराचरं व्यक्तमथोत्तरापथं दिशोऽग्निविद्युद्रजसा च पीडयेत्॥**

**अन्वयः** – शुक्रः क्षितिजेऽग्रतः प्रजां निहन्ति, हुताशशस्त्रक्षुदवृष्टिस्करैः अर्थोत्तरापथं चराचारं व्यक्तं निहन्ति। दिशोऽग्निविद्युद्रसजा च पीडयेत्।।

**प्रतिपदार्थः** – शुक्रः =शुक्रग्रहः। क्षितिजः = क्षितेः जातः यः स एव क्षितिजः अर्थात् भौमः। अग्रतः =पुरतः। प्रजाम् = जनान्। निहन्ति = नाशयति। हुताशः = अग्निः। शस्त्रम् = आयुधम्। क्षुद् = दुर्भिक्षम्। अवृष्टिः= अवर्षणम्। तस्कराः = चौराः। अथ = अनन्तरम्। उत्तरापथम् = उत्तरदिशम्। चरम् = जङ्गमाख्यम्। अचरम् = स्थावराख्यम्। व्यक्तम् = निश्शेषम्। दिशः = आशाः। अग्निना = हुतावहेन। विद्युता = ताडिता। रजसा = पांशुना (धूलिकणेन)। पीडयेद् = उपतापयेत्।

**व्याख्या** – यद्यत्र भृगुपुत्रात् (शुक्रात्) भौमोऽग्रे गमनं कूर्यात् सति तदा अग्निशस्त्रदुर्भिक्षआवर्षण तस्करग्निशस्त्रदुर्भिक्षैः जनानां विनाशो भवति। अनेन सहैव उत्तरदिशि जङ्गमस्थावराणां विनाश शुक्रादग्रमनभौमः करोति। अग्निविधुत्धूलिभिः दिशां निहन्ति इयं ग्रहस्थितिः।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



### १४.६.२ वृहस्पतिबुधयोः अग्रतः स्थिते फलम्

शुक्राद् बृहस्पतिबुधयोः अग्रतः स्थिते फलं अनेन प्रकारेण प्रतिपादितमाचार्येण।

**मूलपाठः**

**बृहस्पतौ हन्ति पुरः स्थिते सितः सितं समस्तं द्विजगोसुरालयान्।**

**दिशं च पूर्वां करकासृजोऽम्बुदा गले गदा भूरि भवेच्च्यशारदम्॥**

**अन्वयः** – सितः वृहस्पतौ पुरः स्थिते सितं समस्तं द्विजगोसुरालयान् हन्ति। पूर्वां दिशं च करकासृजोऽम्बुदा गले गदा भूरि शारदञ्च भवेत्।

**प्रतिपदार्थः** – सितः = शुक्रग्रहः। बृहस्पतौ = गुरौ। पुरः स्थिते = अग्रे स्थिते सति। सितम् = श्वेतपदार्थम्। समस्तम् = सम्पूर्णम्। द्विजाः = द्विजकूले समुत्पन्नाः ये ते द्विजाः अर्थात् ब्राह्मणाः। गावः = पशुविशेषाः। सुराः = देवाः। आलयम् = गृहम् स्थानं वा। दिशम् = आशाम्। पूर्वाम् = ऐन्द्रीम्। अम्बुदा = मेघाः। करकासृजः = करकवृष्टिम्। गदाः = रोगाः। भूरिः = बहुः। शारदम् शरत्कलिकं धान्यम्। भवेदिति।

**व्याख्या** – यदि शुक्रस्याग्रे देवगुरुबृहस्पतौ सति तदा ये किञ्चिदपि श्वेत पदार्थाः सन्ति तान् सर्वान् सितपदार्थान् नाशयति। तथा ब्राह्माणानां, गवाम्, देवानाम् चैषामालयं स्थानं नाशयति। तथा च दिशं पूर्वामपि हन्ति। एतादृश्यां स्थितौ मेघाः करकवृष्टिं कुर्वन्ति। लोकानां कण्ठे रोगाः भवन्ति। शुक्रस्याग्रे देवगुरुवृहस्पतौ स्थिते सति तदा शरत्कालिकं ध ान्यमधिकं भवति।

**बुधे अग्रतः स्थिते फलमाह**

**मूलपाठः**

**सौम्योऽस्तोदययोः पुरो भृगुसुतस्यावस्थितस्तोयकृद्।**
**रोगान् पित्तजकामलांश्च कुरुते पुष्णाति च ग्रैष्मिकान्॥**

**हन्यात् प्रव्रजिताग्निहोत्रिकभिषग्रङ्गोपजीव्यान् हयान्।**
**वैश्यान् गाः सह वाहनैर्नरपतीन् पीतानि पश्चाद्दिशम्॥**

**अन्वयः** – भृगुसुतस्य सौम्योऽस्तोदययोः पुरोऽवस्थितस्तोयकृद् (भवति)। पित्तजकामलांश्च रोगान् कुरुते, गैष्मिकान् च पुष्णाति। प्रव्रजिताग्निहोत्रिकभिषग्रङ्गोपजीव्यान् हयान् हन्यात्। वैश्यान् गाः सह वाहनैर्नरपतीन् पीतानि पश्चाद्दिशम् नाशयति।

**प्रतिपदार्थः** – भृगुपत्रस्य = शुक्रस्य। सौम्यः = बुधग्रहः। अस्तः = अनुदितः। उदयः = उदितः। पुरः = अग्रतः। अवस्थितः = स्थितः। तोयकृद् = जलकारकः। पित्तजकामलांश्च = पित्तजै रोगैः सहिताः कामलाः पित्तजकामलास्तांश्च कुरुते। रोगान् = गदान्। ग्रैष्मिकान् = ग्रीष्मकाले समुत्पन्नः धान्यः गैष्मिको भवति द्वितीयविभक्तेः बहुवचनान्तेग्रैष्मिकानिति। पुष्णाति = पुष्टिं नयति। प्रव्रजितान् = वनस्थान्। अग्निहोत्रिकान् = अग्निहोत्रकर्मणि रताः जनाः। भिषजः = वैद्यान् (चिकित्सिकान्) रङ्गोपजीव्यान् = मल्लादीन्। हयान्-अश्वान्। वैश्यान् = वैश्यजातीयान्। गाः = अनडुहः (प्रसिद्ध पशुविशेषान्)। वाहनैः सह = अश्वादिभिश्च सह। नरपतीन् = नृपान्। पीतानि = पीतवर्णानि। पश्चाद् = पश्चिमदिशम्। दिशं = आशाम् नाशयेत्॥

**व्याख्या** – यदि शुक्रस्याग्रिमराशौ बुधग्रहे उदिते अस्ते वा सति तदा स जलकारको भवति तथा च पित्तजरोगान् कामलरोगांश्च कुरुते। ग्रीष्मकाले समुत्पन्नं धान्यं



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



सम्वर्द्धनं करोति। वनस्थान्, आग्निहोत्रिकान्, चिकित्सिकान्, मल्लादीन्, अश्वान् वैश्यजातीयान्, अश्वादिभिः सह नृपान् पीतवर्णानि द्रव्याणि पश्चिमदिशश्चैतान् सर्वान् नाशयति।

## १४.७ शुक्रविम्वस्याशुभफलानि

आचार्यवराहमिहिरमहोदयेन शुक्रविम्वस्याशुभफलानि अनेन प्रकारेण प्रतिपादितानि।

**मूलपाठः**

**शिखिभयमनलाभे शस्त्रकोपश्च रक्ते**
**कनकनिकषगौरे व्याधयो दैत्यपूज्ये।**

**हरितकपिलरुपे श्वासकासप्रकोपः**
**पतति न सलिलं खाद् भस्मरुक्षासिताभे॥**

**अन्वयः** – दैत्यपूज्ये शिखिभयमनलाभे रक्ते शस्त्रकोपश्च, कनकनिकषगौरे व्याधयः (भवन्ति)।

हरितकपिलरुपे श्वासकासप्रकोपः, भस्मरुक्षासिताभे खाद् सलिलं न पतति।

**प्रतिपदार्थः** – दैत्यपूज्ये = दैत्यानां यः पूजनीयः स एव दैत्यपूज्य अर्थात् शुक्रः। शिखिः = अग्निसदृशः वर्णः। भयम् = भीतिम्। अनलाभे = अग्निसदृशकान्तौ। रक्ते = लोहितवर्णे (लालवर्णः) शस्त्रकोपः = शस्त्रेण कोपः अर्थात् युद्धभयम्। कनकनिकषगौरे = कनकस्य सुवर्णस्य याऽसौ निकषरेखा तद्वद् गौरवर्णे श्वेतवर्णे। व्याधयः = रोगाः। हरितरुपे = शुकाभे। कपिलरूपे = रक्तपित्तवर्णसंयुक्ते। श्वासः = श्वासरोगः। कासः = कासरोगः। भस्मः = भस्मवर्णे। रुक्षाभे = स्नेहरहिते। असिताभे = कृष्ण कान्तौ। खाद् = अकाशात्। सलिलं = जलम्। न पतति = न भवति।

**व्याख्या** – यदि दैत्यपुज्यशुक्रस्याग्निसदृशः वर्णः स्यात् तदा अग्नेः भयं भवति। लोहितवर्णे सति यदि शुक्रस्य तदा संग्रामाः भवन्ति। सुवर्णस्य या रेखा तद्वद् गौरवर्णे सति तदा रोगाः (व्याधयः) भवन्ति। यदि हरितवर्णे कपिलवर्णे च सति तदा श्वासेन कासेन च जनानां पीडा भवति। यद्यत्र शुक्रस्य भस्मवर्णः, स्नेहरहितवर्णः कृष्णवर्णश्च भवेत्तदा जलं न पतति अर्थात् देवो न वर्षति।

## १४.८ शुक्रविम्बस्य शुभफलानि

शुक्रविम्बस्य शुभफलान्वेवं प्रकारेण प्रतिपादितानि आचार्यवराहमिहिरेरण।

**मूलपाठः**

**दधिकुमुदशशाङ्ककान्तिभृत् स्फुटविकसत्किरणो बृहत्तनुः।**
**सुगतिरविकृतो जयान्वितः कृतयुगरुपकरः सिताह्वयः॥**

**अन्वयः** – सिताह्वयः दधिकुमुदशशाङ्ककान्तिभृत् स्फुटविकसत्किरणो वृहत्तनुः सुगतिरविकृतो जयान्वितः कृतयुगरुपकरो भवति।

**प्रतिपदार्थः** – सिताह्वयः = सितनाम शुक्रः। दधिः = क्षीरविकारः। कुमुदः = पुष्पविशेषः। शशाङ्ककान्तिभृत् = चन्द्रसंदृशीं कान्तिमाभाम्। स्फुटः = स्पष्टः। विकसत् = विस्तीर्णः। किरणः = रश्मिः। सुगतिः = शोभनगतिः। अविकृतः = विकारवर्जितः। जयान्वितः = जययुक्तः। कृतयुगस्य = सतयुगस्य। रुपकरः = रुपं करोति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्याख्या** – यदि शुक्रस्य दधिसदृशः कुमुदपुष्पसदृशः च वर्णो भवेत्तदा जयान्वितो भवति। शशाङ्ककान्तिसंयुक्तः, स्फुटविस्तीर्णरश्मियुक्तः वृहद्बिम्वसहितः, शोभनगतिः, विकाररहितः सतयुगस्य रुपसहितश्च शुक्रो भवेत्तदा जययुक्तो भवति। आचार्यपराशरेणोक्तं स्वरचितसंहितायाम् यत् यदि शुक्रः सुवर्णः श्वेतयुक्तः कुमुदपुष्पसदृशः चन्द्रमसः वर्णयुक्तश्च भवेत्तदा राज्ञां कृते कल्याणकारकः शत्रुहानिः दुर्भिक्षं, आरोग्यः वृष्टिकारकश्च भवति। यथोक्तम् –

**कूटाकारनिभः स्निग्धो मार्गस्थो रजतप्रभः।**
**भार्गवो विस्तृतार्चिश्च प्रजाभावकरः स्मृतः॥**

**प्रावृषि शुक्रः प्राच्यां दिशि स्थितोऽल्पं जलं सृजति नित्यम्।**
**धान्यं च भूरि कुरुते तृणं च बहु जायते तत्र॥**

**अपरां निषेव्यमाणः काष्ठां शुक्रो जलं सृजति भूरि।**
**धान्यं कुरुते चाल्पं तृणं च बहुजायते तत्र॥**

**बोधप्रश्नाः**

९. अन्योन्यमिति पदस्यार्थः कः?

१०. शनिश्चेत् शुक्रादग्रिमोभवेत्तदा किं फलम्?

११. विद्याधर इति पदस्यार्थः कः?

१२. भौमः यदि शुक्रादग्रतो भवेत्तदा फलं किम्?

१३. शुक्राद् बृहस्पतौ अग्रतः स्थिते तदा पूर्वदिशः किम् फलम्?

१४. यदि शुक्रस्य अग्निवर्णो भवेत्तदा फलं किम्?

१५. शुक्रस्य यदि कुमुदपुष्पसदृशः श्वेतवर्णः स्यात् तदा किं फलमिति।

## १४.९ सारांशः

पाठेऽस्मिन् आचार्यवराहमिहिरेण शुक्रस्य भेदनात् फलं कथितम् एतेषां नक्षत्राणां भेदन येन क्रमेण भवति तेन क्रमेणैव प्रतिपादितम् वर्तते। रोहिणीनक्षत्रे शुक्रस्य भेदने सति तस्य भेदनस्य फलमपि वर्णितमिति। रोहिणीनक्षत्रभेदनेऽत्र शकटशब्दस्य प्रयोगो वर्तते। अर्थात् शुक्रस्य रोहिणीशकटभेदने सति तदा वसुधा मिश्रितशुक्लकृष्णा भवति तथा च कपालव्रतं धारयति। शुक्रोऽयं कृष्णपक्षस्य चतुर्दशीतिथिं, अमावस्यां अष्टमीतिथिञ्च दृश्यो भवेत् तदा वसुधा जलमयीव दृश्यते। अस्य फलमिदं कथितमाचार्येण वृहत्संहितायामिति। यदि शुक्रात् सर्वे ग्रहाः अग्रवर्तिताः स्थिताः स्युस्तदा तेषां ग्रहाणां फलं क्रमेण प्रतिपादितं पाठेऽस्मिन्। शुक्रविम्वस्य शुभाशुभफलमपि आचार्यवराहमिहिरेण कथितमत्रेति। यदि शुक्रस्याग्निसदृशवर्णः स्यात् तदा जनानां कृते अग्निप्रकोपं भवति। कुमुदसदृशः श्वेतवर्णः शुक्रस्य भवेत् तदा जनाः जययुक्ताः भवन्ति।

## १४.१० शब्दावली

१. अनलर्क्षम् = कृत्तिकानक्षत्रम्।

२. भिन्दन् = भित्वा।

३. सरित् = नदी।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



| | | | |
|---|---|---|---|
| ४. | वारि | = | जलम्। |
| ५. | धात्री | = | भूमिः। |
| ६. | तुङ्ग | = | उच्चः। |
| ७. | प्राजापत्ये | = | रोहिणीनक्षत्रे। |
| ८. | रसानाम् | = | मधुरादीनाम्। |
| ९. | संक्षयाय | = | विनाशाय। |
| १०. | निकटम् | = | निवहम्। |
| ११. | महाननयः | = | उपद्रवः। |
| १२. | विद्याधराणाम् | = | देवयोनीनाम्। |
| १३. | भूरिः | = | बहुः। |
| १४. | महामात्राणाम् | = | हस्तिसाधनपतीनाम्। |
| १५. | जाङ्गलम् | = | स्वल्पोदकस्थानम्। |
| १६. | अण्डजानाम् | = | पक्षीणाम्। |
| १७. | प्रभूता | = | वह्वी। |
| १८. | वणिजः | = | क्रयविक्रयज्ञाः। |
| १९. | भयम् | = | भीतिम्। |
| २०. | पाखण्डिनः | = | वेदबह्याः। |
| २१. | द्यूतेन | = | द्यूतक्रीडा। |
| २२. | किरातानाम् | = | यवनानाम्। |
| २३. | तमिस्रपक्षस्य | = | कृष्णपक्षस्य। |
| २४. | सङ्गराः | = | संग्रामाः। |
| २५. | अम्बुदाः | = | मघाः। |
| २६. | गदाः | = | रोगाः। |
| २७. | पीतानि | = | पीतवर्णानि। |
| २८. | दघ्नः | = | क्षीरविकारस्य। |
| २९. | विकसन्तः | = | विस्तीर्णाः। |
| ३०. | सुगतिः | = | शोभनगति। |

## १४.११ सन्दर्भग्रन्थः

१. बृहत्संहिता - आचार्यवराहमिहिरविरचिता।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १४.१२ सहायकग्रन्थाः


१. बृहत्संहिता-हिन्दीव्याख्याकारः आचार्यनागेन्द्रपाण्डेयः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी।

२. बृहत्संहिता-व्याख्याकारः - डॉ. सुरेशचन्द्रमिश्रः, मोतीलाल बनारसीदास, नईदिल्ली।

३. बृहत्संहिता-व्याख्याकारः - पं. श्रीअच्युतानन्द झा, चौखम्बा - संस्कृत प्रतिष्ठानम्, वाराणसी।

४. ज्योतिर्विज्ञानशब्दकोशः, लेखकः- डॉ. सुरकान्तझा, चौखम्बा सुरभारती प्रतिष्ठानम्, वाराणसी।


## १४.१३ बोधप्रश्नोत्तराणि

१. रसपदार्थानां सस्यानाञ्च विनाशको भवति।

२. सर्पः।

३. पीडां करोति।

४. क्षत्रियाणां विरोधः।

५. मूलद्रव्यविक्रयिणां वैद्यानाञ्च संतापः।

६. जलम्।

७. पथिकानां कृते पीडाकरो भवति।

८. किरातानां यवनानाञ्च तापकरो भवति।

९. परस्परम्

१०. म्लेच्छजनान् विनाशयति।

११. देवयोनिः

१२. प्रजां विनाशयति

१३. पूर्वदिशं हन्ति

१४. अग्नेः भयं भवति।

१५. जयान्वितो भवति।

## १४.१४ अभ्यास प्रश्नाः

१. शुक्रस्य नक्षत्रस्य भेदनफलं लिखत।

२. मृगशिर आद्रयोः स्थितस्य शुक्रस्य फलं निरुपणीयम्।

३. शुक्रस्य तिथिषु उदयास्तफलं लेख्यम्।

४. गुरुशुक्रयोरन्योन्यं सप्तमस्थयोः फलं विलेखनीयम्।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



५. भौमेऽग्रतः स्थिते फलं विवेचनीयम्।

६. बृहस्पतावग्रतः स्थिते फलं निरुपणीयम्।

७. बुधेऽग्रतः स्थिते फलं विवेचनीयम्।

८. शुक्रविम्बस्य शुभफलानि विलिखितानि।

—•—



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# पञ्चदशः पाठः "शनिचारः"

## पाठसंरचना

१५.१. प्रस्तावना
१५.२ उद्देश्यम्
१५.३ नक्षत्रावस्थितिवशात् शनेः सामान्यफलम्
१५.४ अश्विनीभरण्योः स्थितिवशात् शनेः विशिष्टं फलम्
१५.५ कृत्तिकारोहिण्योः स्थितिवशात् शनेः विशिष्टं फलम्
बोधप्रश्नाः
१५.६ मृगशिरस् आर्द्रयोः स्थितिवशात् शनेः विशिष्टफलम्
१५.७ पुनर्वसुतिष्ययोः स्थितिवशात् शनेः विशिष्टफलम्
१५.८ आश्लेषामघयोः स्थितिवशात् शनेः विशिष्टफलम्
बोधप्रश्नाः
१५.९ पूर्वाफाल्गुन्युत्तरफाल्गुन्योः स्थितिवशात् शनेः विशिष्टफलम्
१५.१० हस्ते स्थितिवशात् शनेः विशिष्टफलम्
१५.११ चित्रास्वात्योः स्थितिवशात् शनेः विशिष्टफलम्
१५.१२ विशाखायां स्थितिवशात् शनेः विशिष्टफलम्
बोधप्रश्नाः
१५.१३ अनुराधायां स्थितिवशात् शनेः विशिष्टफलम्
१५.१४ ज्येष्ठामूलयोः स्थितिवशात् शनेः विशिष्टफलम्
१५.१५ पूर्वाषाढायां स्थितिवशात् शनेः विशिष्टफलम्
१५.१६ उत्तराषाढायां स्थितिवशात् शनेः विशिष्टफलम्
१५.१७ श्रवणधनिष्ठयोः स्थितिवशात् शनेः विशिष्टफलम्
बोधप्रश्नाः
१५.१८ शतभिषक्पूर्वभाद्रोत्तरभाद्रपदासु स्थितिवशात् शनेः विशिष्टफलम्
१५.१९ रेवत्याम् स्थितिवशात् शनेः विशिष्टफलम्
१५.२० विशाखस्थगुरोः कृत्तिकस्थशनेः तथा तयोरेकर्क्षगतयोः फलम्
१५.२१ वर्णवशात् शनेः फलम्
बोधप्रश्नाः
१५.२२ सारांशः
१५.२३ सारावली
१५.२४ सन्दर्भग्रन्थः
१५.२५ सहायकग्रन्थाः
१५.२६ बोधप्रश्नोत्तराणि
१५.२७ अभ्यासप्रश्नाः

## १५.१ प्रस्तावना

बृहत्संहितायाः शनैश्चरचाराध्याये भवतः स्वागतं वर्तते। शुक्रचाराध्याये अश्विनीतः आरभ्य रेवतीनक्षत्रपर्यन्तम्, एतेषु नक्षत्रेषु शुक्रस्य स्थितिः भवेत् तेषां शुक्रयुतनक्षत्राणां फलानि क्रमेण आचार्यवराहमिहिरेण प्रतिपादितानि सन्ति। भवानपि शुक्रयुतनक्षत्राणां फलानि पठितवान्। यदि शुक्रस्य स्थितिः तिथीषु स्यात् तदा आचार्येण शुक्रयुततिथीनां शुभाशुभफलान्यपि निरूपितानि। अत्र शुभाशुभफलान्यपि भवान् अधितवान्। शनैश्चरचाराध्याये शनेः स्थितिः नक्षत्रे कीदृशी भवति? अर्थात् यदि शनेः सप्तविंशतिनक्षत्रेषु स्थितिः भवेत् तेषां नक्षत्राणां



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



स्थितिवशात् शनेः विशिष्टं फलं आचार्यवराहमिहिरेण प्रदत्तमिति। भवान् अश्विनीभरण्योः स्थितिवशात् शनेः विशिष्टं फलम्, कृत्तिकारोहिण्योः स्थितिवशात् विशिष्टं फलम्, मृगशिरस्-आर्द्रयोः स्थितिवशात् शनेः विशिष्टं फलम् पुनर्वसुतिष्ययोः स्थितिवशात् शनेः विशिष्टं फल, आश्लेषामघयोः स्थितिवशात् शनेः विशिष्टं फलम् पूर्वाफाल्गुन्युत्तरफाल्गुनेः स्थितिवशात् शनेः विशिष्टं फलम्, हस्ते स्थितिवशात् शनेः विशिष्टं फलञ्च पठिष्यति। अनन्तरञ्च चित्रास्वात्योः स्थितिवशात् शनेः विशिष्टं फलम्, विशाखायां स्थितिवशात् शनेः विशिष्टं फलम्, अनुराधायां स्थितिवशात् शनेः विशिष्टं फलम्, उत्तराषाढायां स्थितिवशात् शनेः विशिष्टं फलम्, श्रवणधनिष्ठयोः स्थितिवशात् शनेः विशिष्टं फल्, शतभिषक्पूर्वा-भाद्रोत्तरभाद्रपदासु स्थितशनेः विशिष्टं फलम् रेवत्यां स्थितशनेः विशिष्टं फलञ्च निगदितमत्राचार्येण। भवानपि तं विशिष्टं फलं पठिष्यति। यदि आकाशे शनिः विभिन्नवर्णेषु दृश्यो भवेत् तदा तस्य फलमपि प्रतिपादितं वर्तते। श्वेतवर्णात्मकः शनिः ब्राह्मणान्, रक्तः क्षत्रियान्, पीतः वैश्यान्, कृष्णः शूद्रान् च नाशयति। भवान् शनेः वर्णफलमपि पाठेऽस्मिन् पठिष्यति।

## १५.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- बृहत्संहितायां वर्णितशनैश्चरचारस्य अध्ययनं करिष्यति।
- नक्षत्रेषु स्थितिवशात् शनेः सामान्यफलं ज्ञास्यति।
- सर्वेषु नक्षत्रेषु स्थितिवशात् शनेः विशिष्टं फलं ज्ञास्यति।
- विशाखास्थगुरोः कृत्तिकास्थशनेः तथा तयोरेकर्क्षगतयोः फलं ज्ञास्यति।
- वर्णवशात् शनेः फलं ज्ञास्यति।

## १५.३ नक्षत्रावस्थितिवशात् शनेः सामान्यफलम्

शनैः शनैः चरतीति यः सः शनैश्चर इति पदेन उच्यते। शनिः गगने मन्दगत्या भ्रमणं करोति। यदि शनिः नक्षत्रेण सह संयुक्तः स्थितो वा भवेत् तदा तेषां स्थितनक्षत्राणां सामान्यफलं आचार्यवराहमिहिरेण प्रतिपादितं बृहत्संहितायाम्। शनैश्चरस्य चारः (गमनं चलनं वा) शनैश्चरचार इति समासपदयुक्तत्वाद्। अत्र शनैश्चरचाराध्याये शनैश्चरस्य चारसम्बन्धिविवेचनं वर्तते।

**मूलपाठः**

**श्रवणानिलहस्तार्द्राभरणीभाग्योपगः सुतोऽर्कस्य।**
**प्रचुरसलिलोपगुढां करोति धात्रीं यदि स्निग्धः॥**

**अहिवरुणपुरन्दरदैवतेषु सुक्षेमकृन्न चाति जलम्।**
**क्षुच्छस्त्रावृष्टिकरो मूले प्रत्येकमपि वक्ष्ये॥**

**अन्वयः** – अर्कस्य सुतः यदा श्रवणानिलहस्तार्द्राभरणीभाग्योपगः स्निग्धः भवति तदा धात्रीं प्रचुरसलिलोपगुढां करोति। अहिवरुणपुरन्दरदैवतेषु सुक्षेमकृत् चाति जलम् न (भवति)। मूले क्षुच्छस्त्रावृष्टिकरः इति। प्रत्येकमपि वक्ष्ये।

**प्रतिपदार्थः** – अर्कस्य = सूर्यस्य, सुतः = पुत्रः, यदा = तदा, श्रवणम् = श्रवणनक्षत्रम्, अनिलः = स्वाती, हस्तः = हस्तनक्षत्रम्, स्निग्धः = विमलमूर्तिः, धात्रीम् =



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



भूमिम्, प्रचुरेण = प्रभूतेन, सलिलेन = जलेन, उपगूढां = छन्नाम्, करोति = प्रददाति, अहिः = आश्लेषा, वरुणः = शतभिषः, पुरन्दरः = ज्येष्ठा, सुक्षेमम् = शोभनं क्षेमम्, नाति जलम् = अति जलरहितः, क्षुद् = दुर्भिक्षः, शस्त्रम् = युद्धम् , आवृष्टिकः = अनावृष्टिकरः, मूले = मूलनक्षत्रे, प्रत्येकम् = प्रत्येकं नक्षत्रम्, वक्ष्ये = कथयिष्ये।

**व्याख्या** – यदा शनिः श्रवण – स्वाती – हस्त– आर्द्रा– भरणी पूर्वाफाल्गुनी नक्षत्रेषु स्थितो भवेत् तदा सः निमर्लमूर्तियुक्तः भवति। सः शनिः धात्रीं प्रचुरमात्रेण सलिलोपगूढां प्रददाति। यदि शनिः आश्लेषा नक्षत्रे, शतभिष् नक्षत्रे ज्येष्ठानक्षत्रे च स्थितः स्यात् तदा सः सुभिक्षं अधिकजलञ्च न प्रदायको भवति। मूलनक्षत्रे यदि स्थितः शनैश्चरः स्यात् तदा सः दुर्भिक्षं युद्धं अनावृष्टिञ्च प्रददाति। आचार्योक्तमत्र यद् प्रत्येकनक्षत्रं निर्दिश्य फलमिदं कथिष्यामि। तथा च गर्गः –

**याम्यवायव्यसावित्ररौद्रश्रवणसंस्थितः।**
**भवेत् स्निग्धवपुः सौरो भाग्ये चैवातिवर्षदः॥**

आचार्यगर्गमहोदयेनापि कथितं वर्तते स्वरचितसंहितायां यच्चेत् शनिः श्रवण–स्वाती–हस्त–आर्द्रा –भरणी–पूर्वाफाल्गुन्यादि–नक्षत्रेषु स्थितः दृश्यो वा भवेत् तदा सः स्वच्छमूर्तियुक्तः शनिः भूमिं प्रभूतजलेनाच्छन्नं करोति।

## १५.४ अश्विनीभरण्योः स्थितिवशात् शनेः विशिष्टं फलम्

यदि शनेः अश्विनीभरणीनक्षत्रयोः अनयोः स्थितिर्भवेत् तदा तयोः नक्षत्रयोः विशिष्टं फलं वराहमिहिरमहोदयेनात्रेवं प्रतिपादितमिति।

**मूलपाठः**

**तुरगतुरगोपचारककविवैद्यामात्यहार्कजोऽश्विगतः।**
**याम्ये नर्तकवादकगेयज्ञक्षुद्रनैकृतिकान्॥**

**अन्वयः** – अर्कजोऽश्विगतः तुरगतुरगोपचारककविवैद्यामात्यान् हन्ति। याम्ये नर्तकवादकगेयज्ञ– क्षुद्रनैकृतिकान् (हन्ति)।

**प्रतिपदार्थः** – अर्कजः = शनैश्चरः, अश्विगतः = अश्विन्यामवस्थितः, तुरगः = अश्वः, उपचारकः = रक्षकः अर्थात् तुरगोपचारकान्, कवीन् = कविकुशलान्, वैद्यान् = कायचिकित्सकान्, आमात्यान् = मन्त्रिणः, हन्ति = नाशयति, याम्ये = भरण्याम्, नर्तनं शिल्पस्येति नर्तकः, वादनं शिल्पस्येति वादकः, गेयं जानातीति गेयज्ञः, क्षुद्रः = नीचजनः, नैकृतिको निषादः, एतान् सर्वान् हन्ति नाशयति वा।

**व्याख्या** – अर्कजः अर्थात् शनैश्चरः अश्विनीनक्षत्रे यदि स्थितः स्यात् तदा सः अश्वान्, अश्वरक्षकान्, कवीन्, वैद्यान् मन्त्रिणश्च हन्ति। भरणीनक्षत्रे शनैश्चरः स्थितः स्यात्तदा क्रमेण नर्तकान्, वादकान्, गेयांन्, क्षुद्रजनान् निषादान् च नाशयति।

## १५.५ कृत्तिकारोहिण्योः स्थितिवशात् शनेः विशिष्टं फलम्

अत्र कृत्तिकारोहिण्योः स्थितिवशात् शनेः विशिष्टं फलमेवं कथितमाचार्येण।

**मूलपाठः**

**बहुलास्थे पीड्यन्ते सौरेग्न्युपजीविनश्चमूपाश्च।**
**रोहिण्यां कोशलमद्रकाशिपाञ्चालशाकटिकाः॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**अन्वयः** – सौरे बहुलास्थे अग्न्युपजीविनश्चमूपाश्च पीड्यन्ते राहिण्यां कोशलमद्रकाशिपाञ्चाल शाकटिकाः (पीड्यन्ते)।

**प्रतिपदार्थः** – सौरे = शनौ, बहुलास्थे = कृत्तिकायां स्थिते, अग्न्युपजीवनः = अग्निवार्ताः, सुर्वणकारलोहकारायस्कारप्रभृतयः, चमूपाः = सेनापतयः, पीड्यन्ते = कष्टं दीयन्ते। राहिण्याम् = रोहिणीनक्षत्रेऽविस्थिते, कोशलाः = कोशलजनाः, मद्राः = मद्रदेशीयजनाः, काशयः = काशीजनाः, पाञ्चालाः = पाञ्चालप्रदेशीयजनाः, शाकटिकाः = शकटोपजीविनः एते पीड्यन्ते।

**व्याख्या** – सौरः अर्थात् शनैश्चर यदि कृत्तिकानक्षत्रेऽवस्थिते सति अग्न्युपजीविनः सुवर्णकारलोहकारायस्कारप्रभृतयः सेनापतयश्च पीडिताः भवन्ति। रोहिण्यां यदि सौरेऽवस्थिते सति कोशलजनाः, मद्रप्रदेशजनाः, काशीप्रदेशजनाः, पाञ्चालप्रदेशजनाः शकटोपजीविनश्च पीड्यन्ते। मद्रप्रदेशस्तु सम्प्रति तमिलनाडुप्रान्तेऽस्ति। काशी उत्तरप्रदेशप्रान्ते पाञ्चालप्रदेशः पंजाबप्रान्ते च सम्प्रति विद्यते। अस्माभिः दृश्यन्ते ते। शकटशब्दस्य प्रयोगोऽत्र कृतोऽस्ति शकटं अर्थात् वाहनम्। ये वाहनेन जीवोपार्जनं कुर्वन्ति ते शकटोजीविनः इति कथिताः सन्त्याचार्यवराहमिहिरेण।

**बोधप्रश्नाः**

१. 'अनिल' इति पदस्यार्थः कः?

२. 'अर्कसुतः' इति पदस्यार्थः कः?

३. यदि शनिः श्रवणे अवस्थिः तर्हि किं फलम्?

४. शनौ कस्मिन् नक्षत्रे अवस्थिते वैद्यान् हन्ति?

५. 'नैकृतिक' इति पदस्यार्थः कः?

६. भरणीनक्षत्रे यदि शनौ स्थिते सति तर्हि किं फलम्?

७. 'पाञ्चालप्रदेशः' सम्प्रति कस्मिन् प्रान्ते विद्यते?

८. 'मद्रजनपदः' सम्प्रति कस्मिन् प्रान्ते विद्यते?

## १५.६ मृगशिरस् आर्द्रयोः स्थितिवशात् शनेः विशिष्टं फलम्

बृहत्संहिताकारेणेवं मृगशिरस्-आर्द्रयोः स्थितिवशात् शनेः विशिष्टफलं प्रतिपादितमिति।

**मूलपाठः**

**मृगशिरसि वत्सयाजकयजमानार्यजनमध्यदेशाश्च।**
**रौद्रस्थे पारतरमठास्तैलिकरजकचौराश्च॥**

**अन्वयः** – मृगशिरसि वत्सयाजकयजमानार्यजनमध्यदेशाश्च। रौद्रस्थे पारतरमठास्तैलिक रजकचौराश्च (पीड्यन्ते)।

**प्रतिपदार्थः** – मृगशिरसि = मृगशिरानक्षत्रे, वत्सजनाः = वत्सराज्यस्य जनाः, याजकाः = यजन्तीति ऋत्विजः, यजमानाः = याज्ञिकाः, आर्यजनाः = प्रधानजनाः, मध्यदेशाः = मध्यप्रदेशजनाः प्रसिद्धाः, रौद्रस्थे = आर्द्रास्थे, पारतरः = सीमान्तप्रदेशजनाः, मठाः = मठजनाः, तैलिकाः = तैलिकनाम्ना प्रसिद्धाः जनाः, रजकाः = वस्त्ररागकृताः, चौराः = तस्कराः एते पीड्यन्ते।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्याख्या** – मृगशिरसि नक्षत्रे शनौऽवस्थिते सति वत्सराज्यस्य जनाः, याजका अर्थात् यजन्तीति ऋत्विजः, यज्ञकर्त्तारः, प्रधानजनाः मध्यप्रदेशे स्थिताः जनाः प्रसिद्धाश्च पीड्यन्ते। रौद्रास्थे अर्थात् आर्द्रास्थे अवस्थिते शनौ सति तदा एते सीमान्तप्रदेशजनाः मठजनाः, तैलिकनाम्नाप्रसिद्धाः तैलिकजनाः, वस्त्ररागकृताः चौरा अर्थात् तस्कराश्च पीड्यन्ते।

## १५.७ पुनर्वसुतिष्ययोः स्थितिवशात् शनेः विशिष्टं फलम्

आचार्यवराहमिहिरमहोदयेन अनयोः पुनर्वसुतिष्यनक्षत्रयोः स्थितिवशात् शनेः विशिष्टं फलमेवं निगदितमिति।

**मूलपाठः**

**आदित्ये पाञ्चनदप्रत्यन्तसुराष्ट्रसिन्धुसौवीराः।**
**पुष्ये घाण्टिकघौषिकयवनवणिक्कितवकुसुमानि॥**

**अन्वयः** – आदित्ये पाञ्चनदप्रत्यन्तसुराष्ट्रसिन्धुसौवीराः। पुष्ये घाण्टिकघौषिकयवन वणिक्कितवकुसमानि (पीडयन्ते)।

**प्रतिपदार्थः** – आदित्ये = पुनर्वसौ, पाञ्चनदाः = पाञ्चनदस्य ये निवासिनः सन्ति ते पाञ्चनद निवासिनः भवन्ति अर्थात् पाञ्चनदजनाः। प्रत्यन्ताः = गह्वरवासिनः अर्थात् गह्वरेऽस्मिन् ये निवसन्ति ते गह्वरवासिनः कथिताः सन्ति। सौराष्ट्राः = सौराष्ट्रजनाः, सैन्धवाः = सैन्ध वजनाः, सौवीराः = सौवीरस्य निवासिनः अर्थात् सौवीरजनाः एते पीड्यन्ते, पुष्ये = पुष्यनक्षत्रे, घाण्टिकाः = घण्टावादनं शिल्पस्येति। घोषः = शब्दोचारणं शिल्पमस्येति घौषिकाः श्रावकाः इत्यर्थः, यवनाः = यवनजातिजनाः, वणिकः = वणिकजनाः व्यापारे संलग्नाः जना ये ते वणिक्जनाः, कितवाः = द्यूतकराः, कुसुमानि = पुष्पाणि, एतानि पीडितानि भवन्ति।

**व्याख्या** – पुनवसौ नक्षत्रे शनौऽवस्थिते सति पाञ्चनदजनाः, गह्वरवासिनः अर्थात् गह्वरेऽस्मिन् ये निवसन्ति ते गह्वरवासिनः, सौराष्ट्रजनाः सैन्धवजनाश्च सन्ति एते सर्वे पीड्यते। यदा शनिः पुष्ये स्यात्तदा घण्टिकाः, घौषिकाः, यवनजातिजनाः, वणिक्जनाः अर्थात् व्यापारे संलग्नाः जनाः ये ते वणिक्जनाः द्यूतकराः अर्थात् द्यूतक्रीडायां रता जनास्ते द्यूतकराः पुष्पाणि चेति पीड्यन्ते।

## १५.८ आश्लेषामघयोः स्थितिवशात् शनेः विशिष्टं फलम्

आश्लेषामघयोः स्थितिवशात् शनेः विशिष्टं फलमेवमत्र प्रतिपादितमाचार्यवराहमिहिरेण।

**मूलपाठः**

**सार्पे जलरुहसर्पाः पित्र्ये वाह्लीकचीनगान्धाराः।**
**शूलिकपारतवैश्याः कोष्ठागाराणि वणिजश्च॥**

**अन्वयः** – सार्पे जलरुहसर्पाः (पीड्यन्ते)। पित्र्ये वाह्लीकचीनगान्धाराः शूलिक-पारतवैश्याः कोष्ठागाराणि वणिजश्च (पीड्यन्ते)।

**प्रतिपदार्थः** – सार्पे = आश्लेषानक्षत्रे, जलरुहाः = जले समुद्भवाः ये ते जलसमुद्भवाः प्राणिनः द्रव्याणि वा, सर्वाः = उरगाश्च पीड्यन्ते, पित्र्ये = मघायां नक्षत्रे, वाह्लीकाः = वाह्लीकस्य जनाः वह्लीकजनाः, चीनाः = चीनदेशस्य जनाः चीनजनाः, गान्धाराः = गान्धारप्रान्तस्य जनाः गान्धारजनाः, शूलिकाः = शूलिकक्षेत्रस्य जनाः शूलिकजनाः, पारताश्च = पारतक्षेत्रस्य जनाः पारतजनाः, वैश्याः = वैश्यवर्णजनाः, कोष्ठागाराणि = अविलयग्रामाः वणिजः = किरातजनाः, एते सर्वे पीड्यन्ते।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्याख्या** – शनौ आश्लेषायामवस्थिते सति तु जलसमुद्भवाः प्राणिनः सर्वाश्च हन्यन्ते। एवं मघानक्षत्रे शनौ अवस्थिते सति तर्हि बाह्लीकजनाः, चीनदेशस्य जनाः गान्धारप्रान्तस्य जनाः, शूलिकजनाः पारतक्षेत्रस्य जनाः, वैश्यवर्गजनाः, अविलयग्रामाः किरातजनाश्च पीड्यन्ते। तथा च गर्गः –

**भुजङ्गकच्छपग्राहनागमत्स्यसरीसृपान्।**
**हन्यादर्कसुतस्तिष्ठन्नक्षत्रे सर्पदैवते॥**

आचार्यगर्गेणोक्तं स्वरचितसंहितायां यत् यदि शनिः आश्लेषायामऽवस्थितो भवेत् तदा सः भुजङ्गकच्छपग्राहनागमत्स्यसरीसृपान् जन्तून् हन्यात्।

**बोधप्रश्नाः**

१०. 'रौद्रस्थ' इति पदस्यार्थः कः?

११. शनिः कस्मिन् नक्षत्रेऽवस्थितो भवेत्तदा चोरान् पीड्यति?

१२. 'सौराष्ट्रः' कस्मिन् प्रान्ते विद्यते सम्प्रति?

१३. 'आदित्य' इति पदस्यार्थः कः?

१४. 'सार्पः' इति कस्य नक्षत्रस्य पर्यायः?

१५. 'वणिक्' इति कस्य वर्णस्य पर्यायः?

१६. 'पित्र्यः' इति कस्य नक्षत्रस्य पर्यायः?

## १५.९ पूर्वाफाल्गुन्युत्तरफाल्गुन्योः स्थितिवशात् शनेः विशिष्टं फलम्

अत्र पूर्वाफाल्गुन्युत्तरफाल्गुन्योः स्थितिवशात् शनेः विशिष्टं फलमेवं आचार्यवराहमिहिरः प्रतिपादितवान् इति।

**मूलपाठः**

**भाग्ये रसविक्रयिणः पण्यस्त्रीकन्यकामहाराष्ट्राः।**
**आर्यम्णे नृपगुडलवणभिक्षुकाम्बूनि तक्षशिला॥**

**अन्वयः** – भाग्ये रसविक्रयिणः पण्यस्त्रीकन्यकामहाराष्ट्राः (पीड्यन्ते। आर्यम्णे नृपगुडलवणभिक्षुकाम्बूनि तक्षशिलाः (पीड्यन्ते)।

**प्रतिपदार्थः** – भाग्ये = पूर्वाफाल्गुन्यां नक्षत्रे, रसविक्रयिणः = षट् रसाः मधुराम्ललवणतिक्तकटुकषाया सन्त्येषां रसानां विक्रयकारिणस्ते एव रसविक्रयिणः भवन्ति। पण्यस्त्रियः = वेश्याः गणिकाः वा, कन्यकाः = कुमार्यः, महाराष्ट्राः = महाराष्टप्रदेशे ये निवसन्ति ते महाराष्ट्राः भवन्ति अर्थात् महाराष्ट्रजनाः। एते सर्वे एव पीड्यन्ते। आर्यम्णे = उत्तरफाल्गुन्यां नक्षत्रे। नृपाः = राजानः, गुडभिक्षुविकारः। लवणं प्रसिद्धम्, भिक्षुकाः = यतयः, अम्बु = जलम्, तक्षशिलाः = तक्षशिलाक्षेत्रस्य जनाः। एतेऽपि पीड्यन्ते।

**व्याख्या** – अत्र शनौ पूर्वाफाल्गुन्यां नक्षत्रेऽवस्थिते सति रसविक्रयिणः, वेश्याः, कुमार्यः, महाराष्ट्रदेशे ये जनाः निवसन्ति ते महाराष्ट्राश्चेते सर्वे पीड्यन्ते। तथा चोत्तरफाल्गुन्यां नक्षत्रे स्थिते सति शनौ राजानः, गुडभिक्षुकलवण जलैः स्वजीवनं मायन्ति ते तथा च तक्षशिलाक्षेत्रस्य जनाश्च एते सर्वे पीड्यन्ते।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १५.१० हस्ते स्थितिवशात् शनेः विशिष्टं फलम्

यदि हस्तनक्षत्रेऽवस्थितो शनिः भवेत्तस्य विशिष्टं फलमेवं प्रतिपादितमाचार्य-वराहमिहिरेणेति।

**मूलपाठः**

**हस्ते नापितचाक्रिकचौरभिषक्सूचिका द्विपग्राहाः।**
**बन्धक्यः कौशलका मालाकाराश्च पीड्यन्ते ॥**

**अन्वयः** – हस्ते नापितचाक्रिकचौरभिषक्सूचिका द्विपग्राहाः बन्धक्यः कौशलका मालाकाराश्च पीड्यन्ते।

**प्रतिपदार्थः** – हस्ते = हस्तनक्षत्रे, नापिताः = श्मश्रुकर्मविदः चौलकर्मनिपुणाः वा, चाक्रिकाः = चक्रेण चरन्ति चाक्रिकाः, कुम्भकारतैलिकाप्रभृतयः, चौराः = तस्कराः, भिषजः = वैद्याः चिकित्सकाः वा, सूचिकाः = शिल्पिनः प्रसिद्धाः, द्विपाः = हस्तिनः, ग्राहाः = बन्धकाः, बन्धक्यः = वैश्याः गणिका वा, कौशलकाः = कौशलप्रदेशस्य जनाः, मालाकाराः = पुष्पप्रदायकाः, पीड्यन्ते = पीडिताः भवन्ति।

**व्याख्या** – यदा शनौ हस्तनक्षत्रेऽवस्थिते सति तदा श्मश्रुकर्मविदः, कुम्भकारतैलिक-प्रभृतयः, वैद्याः चिकित्सकाः वा शिल्पिनः, हस्तिनः, बन्धकाः, वैश्याः गणिकाः वा, कौशल-प्रदेशस्य जनाः, पुष्पप्रदायकाश्च पीडिताः भवन्ति। भौगोलिकरूपेण कौशलजनपदोऽवध-राज्यमेव वर्तते। अत्रोत्तरप्रदेशस्य गोंडाफैजाबादबहराइचबलियाऽऽजमगढजनपदाः सम्मिलिताः आसन्। अस्य राज्यस्य राजधानी साकेतनगरी ( अयोध्या) समर्वतत्। केषुचित् समयेषु श्रावस्ती चाऽप्यस्य जनपदस्य राजधानी बभूव। दक्षिणकौशलस्याऽवस्थितिर्गङ्गातो दक्षिणवर्तिन्यासीत्।

## १५.११ चित्रास्वात्योः स्थितिवशात् शनेः विशिष्टं फलम्

अत्र चित्रास्वात्योः स्थितिवशात् शनेः विशिष्टं फलमेवं प्रतिपादितमाचार्येण।

**मूलपाठः**

**चित्रास्थे प्रमदाजनलेखकचित्रज्ञभाण्डानि।**
**स्वातौ मागधचरदूतसूतपोतप्लवनटाद्याः॥**

**अन्वयः** – चित्रास्थे प्रमदाजनलेखकचित्रज्ञभाण्डानि (पीड्यन्ते)। स्वातौ मागधचरदूतसूतपोतप्लवनटाद्याः (पीडिताः भवन्ति)।

**प्रतिपदार्थः** – चित्रास्थे = चित्रानक्षत्रेऽवस्थिते, प्रमदाजनः = स्त्रीजनाः, लेखकाः = लिपिज्ञाः, चित्रज्ञाः = चित्रकर्मविदः, चित्रभाण्डानि नानावर्णानि भाण्डानि। एतानि पीड्यन्ते। स्वातौ = स्वातीनक्षत्रे, मागधाः नाम श्रावकाः जना वा मगधप्रदेशस्य निवासिनः मगधवासिनः। चराः = गूढपुरुषाः, दूताः = गमागमकारिणः, सूताः = सारथयः कथाश्रावका वा, पोतप्लवाः = पोतः समुद्रो येनोत्तीर्यते तत्र ये प्लवन्ते पोतेन यान्ति। नटा = नृत्यज्ञाः, आदिपदादन्येऽपि ये गीतवाद्यज्ञास्ते सर्व एव पीड्यन्ते।

**व्याख्याः** – चित्रानक्षत्रेऽवस्थिते शनौ स्त्रीजनाः, लिपिज्ञाः चित्रकर्मविदः नानावर्णानिभाण्डानि चेतानि पीड्यन्ते। स्वातिनक्षत्रे शनौ अवस्थिते सति तदा मगधप्रदेशस्य निवासिनः, गूढपुरुषाः, गमागमकारिणः, कथाश्रावणाः, पोतप्लवाः, नृत्यज्ञाः आदि पदादन्येऽपि ये गीतवाद्यज्ञास्ते च सर्वे पीड्यन्ते। अत्र मगधजनपदस्य प्रयोगो वर्तते। मगधजनपदः गङ्गायाः



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



दक्षिणवर्तिषु भूभागेषु दक्षिणविहारेण परिचीयते। अत्र मुख्यरूपेण पटनागयाजनपदौ सम्मिलितौ स्तः।

## १५.१२ विशाखायां स्थितिवशात् शनेः विशिष्टफलम्

एवं विशाखायां स्थितिवशाद् शनेः विशिष्टं फलं प्रतिपादितमाचार्यवराहमिहिरेण बृहत्संहितायाम्।

**मूलपाठः**

**ऐन्द्राग्नाख्ये त्रैगर्तचीनकौलूतकुङ्कुमं लाक्षा।**
**सस्यान्यथ माञ्जिष्ठं कौसुम्भं च क्षयं याति॥**

**अन्वयः** – ऐन्द्राग्नाख्ये त्रैगर्तचीनकौलूतकुङ्कुमं लाक्षा सस्यान्यथ माञ्जिष्टं कौसुम्भं च क्षयं याति।

**प्रतिपदार्थः** – ऐन्द्राग्नाख्ये = विशाखायां नक्षत्रेऽवस्थिते शनौ, त्रैगर्ताः = त्रिगर्तदेशस्य जनाः, चीनाः = चीनदेशस्य निवासिनः, कौलूतजनपदस्यनिवासिनः = कौलूताः, कुङ्कुमम् = काश्मीरम्, लाक्षाः = ज्वलनपदार्थाः, सस्यानि = धान्यानि प्रसिद्धानि, माञ्जिष्ठम् = मञ्जीठा इति कौसुम्भम् अर्थात् पुष्पविशेषः कुसुमानि, क्षयं = विनष्टम्, याति = करोति।

**व्याख्या** – यदि शनिः विशाखायां अवस्थितो भवेत् तदा सः त्रिगर्तजनान्, चीननिवासिनः, कौलूतनिवासिनः, काश्मीरम्, ज्वलनपदार्थान्, धान्यानि, माञ्जिष्ठम्, कुसुमपुष्पाणि च नाशयति।

प्राचीनभारतीयसाहित्ये चीनदेशस्य वर्णनानि प्राचुर्येण सन्ति। चीनदेशस्य स्थितिर्भारतवर्षस्योत्तरस्यां हिमवतः परे पारे वर्तते। पूर्वदिशि चायं देशः प्रशान्तमहासागरपर्यन्तं विस्तृतोऽस्ति।

**बोधप्रश्नाः**

१७. 'बन्धक्यः' इति पदस्यार्थः कः?

१८. 'द्विपा' इति पदस्य पर्यायः कः?

१९. तस्कराः पीड्यन्ते कस्मिन् नक्षत्रेऽवस्थिते शनौ?

२०. 'आर्यम्णः' कस्य नक्षत्रस्य पर्यायः?

२१. 'पण्यस्त्री' इति पदस्यार्थः कः?

२२. यदि शनिः कस्मिन् नक्षत्रे स्थितः स्यात् तदा लेखकाः पीड्यन्ते?

२३. 'कुंसुमम्' इति पदस्यार्थः कः?

## १५.१३ अनुराधायां स्थितिवशात् शनेः विशिष्टं फलम्

अत्रैवं अनुराधायां स्थितिवशात् शनेः विशिष्टं फलं प्रतिपादितमाचार्येण इति।

**मूलपाठः**

**मैत्रे कुलूततङ्गणखसकाश्मीराः समन्त्रिचक्रचराः।**
**उपतापं यान्ति च घाण्टिका विभेदश्च मित्राणाम्॥**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**अन्वयः** – मैत्रे कुलूततङ्गणखसकाश्मीराः समन्त्रिचक्रचराः उपतापं यान्ति घाण्टिकाः मित्राणाञ्च विभेदो (भवति)।

**प्रतिपदार्थः** – मैत्रे = अनुराधायां नक्षत्रे सौरे स्थिते, कुलूताः = कुलुतदेशस्य जनाः, तङ्गणाः = तङ्गणक्षेत्रस्य जनाः, खसाः = पर्वतीयक्षेत्रे ये निवसन्ति ते पर्वतीयजनाः, काश्मीराः = काश्मीरप्रदेशस्य जनाः, मन्त्रिभिः सह चक्रचराः अर्थात् कुम्भकारप्रभृत्यादयः संहिताः समन्त्रिचक्रचराः, उपतापं = उपद्रवम्, यान्ति = प्राप्नुवन्ति, तथा घाण्टिकाः = घण्टावादिनः शिल्पिनस्तेऽप्युपतापं यान्ति, मित्राणां = सुहृदाम्, विभेदः = विश्लेषो (भवति)।

**व्याख्या** – यदि शनैश्चरः अनुराधायां नक्षत्रे स्थितो भवेत् तदा कुलुतदेशस्य जनाः, तङ्गण क्षेत्रस्य जनाः, पर्वतीयजनाः, काश्मीरप्रदेशस्य जनाः, समन्त्रिचक्रचरादयश्च एते सर्वे उपद्रवं प्राप्नुवन्ति। एवमेव घण्टावादिनः शिल्पिनश्च तेऽपि उपतापं प्राप्नुवन्ति। सुहृदां अन्योन्यं (परस्परम्) विभेदो भवति। कुलूतजनपदस्य प्रथम उल्लेखो महाभारते समुपलभ्यते कुलूताधिपो युधिष्ठरस्य राजसूययज्ञे उपहारानादाय समायात इन्द्रप्रस्थम्। वर्तमाने हिमाचलराज्यस्यैवैको भागोऽस्ति जनपदोऽयम्। कुलूतजनपदस्योत्तरीयभागादेव व्याससरित् प्रवहन्ती पञ्चनदप्रदेशं प्रविशति।

खसा अर्थात् पर्वतीयजनाः इति। प्राचीनसाहित्ये खसानामुल्लेखः प्रायशः समुपलभ्यन्ते। खसजाति जनानां मूलनिवासस्थानानि हिमालयस्य मध्यक्षेत्रा व्यासासन्निति सामान्यतो विदुषां मतं वर्तते। अस्मिन् सम्बन्धे कूर्माञ्चलप्रदेशस्य नेपालजनपदस्य च मध्यवर्तिनः क्षेत्रस्य गणना विधीयते।

**काश्मीरप्रदेशः**

भारतस्योत्तरवर्तिषु जनपदेषु काश्मीरजनपदस्य गणना विधीयते। काश्मीरराज्यमेव प्राचीनकालीनः काश्मीरजनपदोऽस्ति। परन्त्वत्र वर्तमानकालीन काश्मीरराजस्य सीमानः प्राचीनककाश्मीरजनपदापेक्षातोऽतिविस्तीर्णा सन्ति। ज्येष्ठामूलयोः स्थितिवशात् शनेः विशिष्टं फलमत्र वर्तते।

आचार्यवराहिमिहिरेण ज्येष्ठामूलयोः स्थितिवशात् शनेः विशिष्टं फलमत्र अनेन प्रकारेण प्रतिपादितमिति।

**मूलपाठः**

**ज्येष्ठासु नृपपुरोहितनृपसत्कृतशूरगणकुलश्रेण्यः।**
**मूले तु काशिकोशलपाञ्चालफलौषधीयोधाः॥**

**अन्वयः** – ज्येष्ठासु नृपपुरोहितनृपसत्कृतशूरगणकुलश्रेण्यः। मूले तु काशिकोशल-पाञ्चालफलोषधीयोधाः एते सर्वे उपतापं यान्ति।

**प्रतिपदार्थः** – ज्येष्ठासु = ज्येष्ठानक्षत्रे सौरे स्थिते, नृपाः = राजानः, पुरोहिताः = आचार्याः, नृपसत्कृताः = राजपूजिताः, शूराः = संग्रामवीराः, गणाः = समूहाः मठादयः, कुलानि = प्रधानकुलानि, श्रेण्यः = बहूनां समानजातीनां संघाः, मूले च स्थिते शनौ, काश्पः = काशीजनपदे ये निवसन्ति ते काशीजनाः भवन्ति। कौशलाः = कोशलपप्रदेशस्य जनाः कोशलजनाः पाञ्चालाः = पाञ्चलक्षेत्रस्य जनाः पाञ्चलजनाः। फलानि = आम्रादीनि, औषधयः = भैषजः प्रसिद्धाः योद्धाः = संग्रामे ये कुशलास्ते संग्रामकुशलाः भवन्ति। एते एवोपतापं यान्ति।

**व्याख्या** – यदा शनिः ज्येष्ठानक्षत्रे स्थितः स्यात् तदा राजानः, आचार्याः, राजपूजिताः,



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



संग्रामवीराः, मठादयः समूहाः, प्रधानकुलानि बहूनां समानजातीनां संघाश्चेति, एते सर्वे एवोपतापं यान्ति। मूले च शनौ स्थिते कोशलप्रदेशस्य जनाः, काशीजनपदे ये निवसन्ति ते काशीजनाः, पाञ्चालक्षेत्रस्य जनाः पाञ्चालजनाः आम्रादीनि फलानि, भिषजः प्रसिद्धाः संग्रामे ये कुशलास्ते संग्रामकुशलाश्च एते एवोपतापं यान्ति।

## १५.१५ पूर्वाषाढायां स्थितिवशात् शनेः विशिष्टं फलम्

एवं पूर्वाषाढायां स्थितिवशात् शनेः विशिष्टं फलं प्रतिपादितमाचार्यवराहमिहिरेण।

**मूलपाठः**

**आप्येऽङ्गवङ्गकौशलगिरिव्रजा मगधपुण्ड्रमिथिलाश्च।**
**उपतापं यान्ति जना वसन्ति ये ताम्रलिप्त्यां च॥**

**अन्वयः**

आप्येऽङ्गवङ्गकौशलगिरिव्रजा मगधपुण्ड्रमिथिलाश्च उपतापं यान्ति ताम्रलिप्त्यां च ये जना वसन्ति (ते संतापं प्राप्नुवन्ति)।

**प्रतिपदार्थः**

आप्ये = पूर्वाषाढायां नक्षत्रे स्थिते शनौ, अङ्गाः = अङ्गप्रदेशस्य जनाः, बङ्गाः = बङ्गप्रदेशे ये निवसन्ति ते बङ्गाः, कौशलाः = कौशलजनाः, गिरिव्रजाः = गिरिनिवासिनः, मगधाः = मगधस्य जनाः, पुण्ड्राः = पौण्ड्रप्रदेशस्य जनाः, मिथिलाश्च = मिथिलायां ये निवसन्ति ते मिथिलाः कथिताः, उपतापं = संतापम्, यान्ति = प्राप्नुवन्ति, ताम्रलिप्त्याम् = ताम्रलिप्त्यां नगर्य्यां, ये वसन्ति = निवसन्ति ते संतापं प्राप्नुवन्ति।

**व्याख्या**

पूर्वाषाढायां स्थिते शनौ अङ्गप्रदेशस्य जनाः, बङ्गप्रदेशे ये निवसन्ति ते बङ्गाः, कौशलजनाः, गिरिवासिनः, मगधजनपदस्य जनाः मगधाः, पौण्ड्रप्रदेशस्य जनाः पुण्ड्राः मिथिलायां ये निवसन्ति ते मिथिलाश्च एते एवोपतापं प्राप्नुवन्ति। ये जनाः तामलिप्त्यां नगर्य्यां निवसन्ति तेऽप्युपतापं प्राप्नुवन्ति।

## १५.१६ उत्तराषाढायां स्थितिवशाद् शनेः विशिष्टं फलम्

अत्रोत्तराषाढायां स्थितिवशात् शनेः विशिष्टं फलमेवं प्रतिपादितमाचार्यवराहमिहिरेण।

**मूलपाठः**

**विश्वेश्वरेऽर्कपुत्रश्चरन् दशार्णान्निहन्ति यवनांश्च।**
**उज्जयिनीं शबरान् पारियात्रिकान् कुन्तिभोजांश्च॥**

**अन्वयः** – विश्वेश्वरेऽर्कपुत्रश्चरन् दशार्णान् यवनांश्च निहन्ति। उज्जयिनीं शबरान् पारियात्रिकान् कुन्तिभोजांश्च (निहन्ति)।

**प्रतिपदार्थः** – विश्वेश्वरे = उत्तराषाढायां, अर्कपुत्रः = शनैश्चरः, चरन् = तिष्ठन्, दशार्णान् दशार्णप्रदेशे ये निवसन्ति ते दशार्णजनास्तान् दशार्णान्, यवनान् च = यवनजनांश्च। उज्जयिनीम् = उज्जयिनीं जनपदम्, शबरान् = शबरजनान्, पारियात्रिकान् पारियात्रे गिरौ ये निवसन्ति तान्, कुन्तिभोजांश्च = कुन्तिभोजराज्यस्य जनान् अर्थात् कुन्तिभोजजनांश्च, निहन्ति = नाशयति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्याख्या** – यदि शनेः स्थितिः उत्तराषाढायां नक्षत्रे भवेत् तदा जनाः बङ्गप्रदेशे ये निवसन्ति तान् दशार्णजनान्, यवनजनान्, उज्जयिनीं जनपदम्, शबरजनान्, पारियात्रे गिरौ ये निवसन्ति तान् पारियात्रिकान् कुन्तिभोजराज्यस्य जनांश्च नाशयति।

**उज्जयिनी** – भारतवर्षस्य संस्कृतसाहित्येस्येतिहासे उज्जयिनी नगरी विश्प्रसिद्धाः महत्त्वपूर्णा चासीत्। प्राचीनकालीना सम्मान्या सुप्रसिद्धा उज्जयिनी नगरी वर्तमानकालीनोज्जैन नगरे परिचीयते। शिप्रातटवर्तिन्यामस्यां पुर्यां शिप्रातीरे महाकालमन्दिरं शोभते। अत्र सिंहस्थस्थकुम्भमेलापकं प्रति प्रतिद्वादशवर्षं महता समारोहेण समायोजयते।

## १५.१७ श्रवणधनिष्ठयोः स्थितिवशात् शनेः विशिष्टं फलम्

शनेः स्थितिवशात् श्रवणधनिष्ठयोः विशिष्टं फलमेवं प्रतिपादितमाचार्येण बृहत्संहितयाम्।

**मूलपाठः**

**श्रवणे राजाधिकृतान् विप्राग्रयभिषक्पुरोहितकलिङ्गान्।**
**वसुभे मगधेशजयो वृद्धिश्च धनेष्वधिकृतानाम्।**

**अन्वयः** – श्रवणे राजाधिकृतान् विप्राग्रयभिषक्पुरोहतकलिङ्गान् निहन्ति। वसुभे मगधेशजयो धनेष्वधिकृतानाञ्च वृद्धिर्भवति।

**प्रतिपदार्थः** – श्रवणे = श्रवणनक्षत्रे स्थिते सौरे, राजाधिकृतान् = नृपेणाधिकारीपदे स्थापितान् नियोगिनः, विप्राग्रयान् = ब्राह्मणप्रधानान्, भिषजः = वैद्याः, पुरोहिताः = आचार्या कलिङ्गाः = कलिङ्गदेशे ये निवसन्ति ते कलिङ्गाः, वसुभे च = धनिष्ठानक्षत्रे स्थिते सौरे, मगधेशजयः = मगधदेशस्य अधिपतिस्तस्य कृते जयकारकः। धनेष्वधिकृतानाम् = वित्तरक्षणे विनियुक्तानां वृद्धिर्भवति।

**व्याख्या** – यदि शनिः श्रवणनक्षत्रे स्थितो भवेत् तदा राज्ञा अधिकारीपदे स्थापितान् नियोगिनः ब्राह्मणप्रधानान् वैद्याः, आचार्याः कलङ्गिदेशे ये निवसन्ति ते कलिङ्गाः। एतान् निहन्ति। वसुभे अर्थात् धनिष्ठायां स्थिते शनौ मगधाधिपतेः कृते जयकारकस्तथा वित्तरक्षणे विनियुक्तानां वृद्धिर्भवति।

**बोधप्रश्नाः**

२४. 'मैत्र' इतिपदस्यार्थः कः?

२५. 'खसः' इति पदस्यार्थः कः?

२६. यदि शनिः अनुराधायां स्थितो भवेत् तर्हि पर्वतीयजनानां किं फलम्?

२७. 'आप्यः' इति पदस्यार्थः कः?

२८. मिथिला कस्मिन् प्रान्ते विद्यते सम्प्रति?

२९. विश्वेश्वरः कस्य नक्षत्रस्य पर्यायः?

## १५.१८ शतभिषक्पूर्वभाद्रोत्तरभाद्रपदासु स्थितिवशात् शनेः विशिष्टफलम्

अत्र शतभिषक्पूर्वभाद्रोत्तरभाद्रपदासु स्थितिवशात् शनेः विशिष्टं फलमेवं प्रतिपादितमाचार्यवराहमिहिरेण।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**मूलपाठः**

**साजे शतभिषजि भिषक्कविशौण्डिकपण्यनीतिवृत्तीनाम्।**
**आहिर्बुध्न्ये नद्यो यानकराः स्त्रीहिरण्यं च॥**

**अन्वयः** – साजे शतभिषजि भिषक्कविशौण्डिकपण्यनीतिवृत्तीनाम् (पीड्यति)। अहिर्बुध्न्ये नद्यो यानकराः स्त्रीहिरण्यं च (पीड्यति)।

**प्रतिपदार्थः** – साजे = पूर्वाभद्रपदनक्षत्रे, शतभिषजि = शतभिषानक्षत्रे स्थिते सौरे, भिषजः = वैद्याः चिकित्सकाः वा, कवयः = काव्याः, शौण्डिकाः = मद्यपान-प्रसक्ताः, पण्यवृत्तयः = क्रयविक्रयजीविनः, नीतिवृत्तयः = नीतिशास्त्रज्ञाः, नाशयन्ति, आहिर्बुध्न्ये = उत्तरभद्रपदायाम् नक्षत्रे, नद्याः = सरितः, नदीतीरे ये निवसन्ति, यानकराः = रथाधिकारकाः शिल्पिनस्तक्षकाः, स्त्रियो = योषितः, हिरण्यम् = सुवर्णम्।

**व्याख्या** – पूर्वाभाद्रपदनक्षत्रे शतभिषनक्षत्रे च स्थिते शनौ वैद्याः चिकित्सकाः वा, काव्यज्ञाः, मद्यपानप्रसक्ताः, क्रयविक्रयजीविनः नीतिशास्त्रज्ञाः पीड्यन्ति। अहिर्बुध्न्ये अर्थात् उत्तराभाद्रपदनक्षत्रे यदि शनिः स्थितः स्यात् तदा सरितः, नदीतीरे ये निवसन्ति, रथाधिकारकाः, शिल्पिनस्तक्षकाः, योषितः सुवर्णादयश्चेत्येतान् पीड्यति शनिः।

## १५.१९ रेवत्यां स्थितिवशात् शनेः विशिष्टं फलम्

शनेः रेवत्यां स्थितिवशात् विशिष्टं फलं प्रतिपादितमाचार्यवराहमिहिरेण एवमिति।

**मूलपाठः**

**रेवत्यां राजभृताः क्रौञ्चद्वीपाश्रिताः शरत्सस्यम्।**
**शबराश्च निपीड्यन्ते यवनाश्च शनैश्चरे चरति॥**

**अन्वयः** – शनैश्चरे रेवत्यां चरति राजभृताः क्रौञ्चद्वीपाश्रिताः शरत्सस्यं शबराः यवनाश्च निपीड्यन्ते।

**प्रतिपदार्थः** – शनैश्चरे = अर्कसुते, रेवत्यां = रेवतीनक्षत्रे, चरति = संचरणे, राजभृताः = राज्ञा, भृताः = पोषिताः, नृपेण ये पोषिता धृता वा, क्रौञ्चदीपाश्रिताः = क्रौञ्चदीपे ये स्थिता ते क्रौञ्चदीपाश्रिताः, शरत्सस्यम् = शरत्कालस्य धान्यानि, शबराः = किरातस्य जनाः, यवनाः = म्लेच्छजातयः, निपीड्यन्ते = पीडिताः भवन्ति।

**व्याख्या** – रेवतीनक्षत्रे शनेः सञ्चरणे सति राजभृताः, क्रौञ्चदीपे स्थिताः ये ते क्रौञ्चदीपाश्रिताः, शरत्कालस्य धान्यानि, शबरजनाः म्लेच्छजातयश्चेते पीड्यन्ते। आचार्यपराशरेण शनेः कृत्तिकादिनक्षत्रेषु सञ्चरणे सति तेषां नक्षत्राणां विशिष्टं फलं प्रतिपादितं क्रमेणेति। तथा च पराशरः आग्नेये प्रविचरन्नग्निस्थूलशूरसेनाहिताग्निलोहकार धातुकाराङ्गनाशौण्डिकाग्न्युपजीविनः उपतापयति। प्राजापत्ये मद्रकपाञ्चालकाशिकोशलाङ्गशाकटिकाः कन्यकाश्चोपतप्यन्ते। सौम्ये यजमानयाजकार्यजनमध्यदेशवत्सजनपदाः। रौद्र पारतरमठतैलिकरजकदस्यवः। आदित्ये सुराष्ट्र-सिन्धुसौवीरपञ्चनदप्रत्यन्ता विधवाश्च। पुष्ये पुष्यमानकघाण्टिकघौषिकपोतयात्रिकयवन- वणिग्दूताः। आश्लेषासु सर्पाः सलिलजाश्च। मघासु शूलिकवाह्लिक तैलिकगान्धार- वैद्यपारतदरद-शिल्पिकोष्ठागाराणि। भाग्ये रसविक्रयिपण्यस्त्रीकन्यामहाराष्ट्राः। आर्यम्णे नृपनृपपत्नीसुतलवणगुड-भिक्षुककूपकूर्चधरतक्षशिलादर्शनिवासिनः। हस्ते हस्तिहस्तिग्राहकस्तेन भिषग्रजसूचिकनापितमाला-कारकसम्बन्धकोशलाः। त्वाष्ट्रे प्रमदालेखकचित्रकरचित्रभाण्डानि। स्वातौ दूतचरसूतमागध प्लवकनटनर्तकगायकवादकपोतयात्रिकाः। ऐन्द्राग्ने त्रैगर्तचीनकौलूतलाक्षाकुङ्कुम-



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



कुसुम्भमाञ्जिष्ठपीठकुसुमसस्यानि विग्रहकामाश्च। अनुराधासु खसतङ्कणकुलूतकाश्मीर-चक्रचरमन्त्रिघाण्टिकाः। अस्मिन् मित्रभेदं च विन्द्यात्।

ऐन्द्रे जातिगणकुलश्रेणीश्रेष्ठनृपनृपतिसत्कृतपुरोहितान्। मूले काशिकोशलपाञ्चाल-मूलफलौषधियोधान्। पूर्वाषाढास्वङ्गमगधबङ्गपुण्ड्रकौशलमिथिलागिरि- व्रजताम्रलिप्तिनिवासिनः। उत्तराषाढास्ववन्तिशब्दकुन्तिभोजदाशार्णेयपारियात्रिकान्। वैष्णवेऽग्निदेशकलिङ्गप्रदेशो विद्वद्विश्रमभिषग्राजाधिकृतपुरोहितान्। श्रविष्ठासु मगधाधिपतिविजयाय विविधवसुनिचयाय तदधिकृता नामर्थेशांश्च पीडयति। शतभिषजि भिषङ्मद्यसुरासवक्रयविक्रयवनितोपजीविदस्यु-पाखण्डिनिवासिनः। प्राक्प्रोष्ठपदायां द्रविडकर्णाटवर्तिचोलपाण्डयसिंहलमहेन्द्रनगरनिवासिनः। उत्तरभद्रपदायां स्त्रीहिरण्यनिचयतक्षकशमीधान्यनदनदीपान् युग्यकरान्। रेवत्यां शत्सस्य राजभृत-शबरवनवासिक्रौञ्चद्वीपनिवासिनः। अश्विन्यामश्वारोहाश्वपालवैद्यामात्यकविविनायकान्। भरणीषु वादकगायकनर्तकक्षुद्रनैकृतिकान् पीडयति।

## १५.२० विशाखास्थगुरोः कृत्तिकास्थशनेः तथा तयोरेकर्क्षगतयोः फलम्

आचार्यवराहमिहिरेण विशाखास्थगुरोः कृतिकास्थशनेः तथा तयोरेकर्क्षगतयोः फलमेवं प्रतिपादिममिति –

**मूलपाठः**

**यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातः।**
**तदा प्रजानामनयोऽतिघोरः पुरप्रभेदो गतयोर्भमेकम्॥**

**अन्वयः** – यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातस्तदा प्रजानामनयऽतिघोरः (भवति)। अनयः गतयोर्भमेकं पुरभेदो (भवति)।

**प्रतिपदार्थः** – विशाखासु = विशाखानक्षत्रे, महेन्द्रमन्त्री = देवगुरुबृहस्पतिः, भानोः = आदित्यस्य, सुतः = पुत्रः, दहनर्क्षे = कृत्तिकायाम्। यातः = प्राप्तः, प्रजानाम् = लोकानाम्, अनयः = दुर्नयः, अतिघोरः = भयावहः, तयोः = गुरुसौरयोः, भमेकम् = नक्षत्रमेकं गतयोः, पुरस्य = नगरस्य, प्रभेदो = विभाजनः।

**व्याख्या** – यदि बृहस्पतिः विशाखानक्षत्रेऽवस्थितस्तथा च शनिः कृत्तिकानक्षत्रे स्थितः स्यात् तदा तस्मिन् काले लोकानां दुर्नयः (दुराचारः) भयावहश्च भवति। तयोरेवगुरुसौरयोः एकस्मिन् नक्षत्रे गतयोः नगरस्य विभाजनं करोति। आचार्य देवलमहोदयेनापि प्रोक्तं यद गुरुशनीद्विस्वभावराशौ स्थितौ स्यात् तदा अपि लोकेऽनिष्ठंफलं प्रोक्तवन्तौ। तथा च देवलः–

**मीने धनुषि कन्यायां मिथने सगुरुः शनिः।**
**तिष्ठेद्यदा तदा घोरः प्रजानामनयो भवेत्॥**

**तथा च पराशरः**

**कृत्तिकासु शनैश्चारी विशाखासु बृहस्पति।**
**तिष्ठेद्यदा तदा घोरः प्रजानामनयो भवेत्॥**

**एकं नक्षत्रमासाद्य दृश्यते युगपद्यदि।**
**अन्योन्यभेदं जानीयात्तदा पुरनिवासिनाम्॥**

## १५.२१ वर्णवशात् शनेः फलम्



अत्र शनेः वर्णवशात् फलमेवं प्रतिपादितमाचार्यवराहमिहिरेण –

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



मूलपाठः

**अण्डजहा रविजो यदि चित्रः क्षुद्भयकृद्यति पीतमयूखः।**
**शस्त्रभयाय च रक्तसवर्णो भस्मनिभो बहुवैरकरश्च॥**

**अन्वयः** – यदि रविजः चित्रः अण्डजहा पीतमयूखः क्षुद्भयकृत (करोति)। रक्तसवर्णो शस्त्रभयाय च भस्मनिभो बहुवैरकरश्च भवति।

**प्रतिपदार्थः** – रविजः = शनिः, चित्रः = विचित्रवर्णः, अण्डजहा = अण्डजान् पक्षिणो हन्ति, यदि = चेत्, पीतमयूखः = पीतरश्मिः, क्षुद्भयकृद् = दुर्भिक्षम्, रक्तसर्वणः = रक्ताभः, शस्त्रभयाय = संग्रामाय, भस्मनिभः = भस्मसृदशक्रान्तिः, बहुवैरकरः शत्रूणां बाहुल्यता भवति।

**व्याख्या** – यदि शनेः विचित्रवर्णः स्यात् तदा अण्डजहा अर्थात् अण्डजान् पक्षिणो हन्ति। यदि च पीतवर्णस्य भवेत् तदा दुर्भिक्षं करोति। रक्तवर्णः स्यात् शनेस्तदा शस्त्रभयाय भवति। शनेः भस्मसदृशक्रान्तिवर्णश्चेत् तदा प्रजानां कृते शत्रुकारको भवति।

**वैदूर्यकान्तिविमलः शुभकृत् प्रजानां**
**बाणातसीकुसुमवर्णनिभश्च शस्तः।**
**यं चापि वर्णमुपगच्छति तत्सवर्णान्**
**सूर्यात्मजः क्षपयतीति मुनिप्रवादः॥**

**अन्वयः** – सूर्यात्मजः वैदूर्यकान्तिविमलः प्रजानां शुभकृत (भवति)। बाणातसीकुसुम-वर्णनिभश्च शस्तः। यं चापि वर्णमुपगच्छति तत्सवर्णान् क्षपयतीति मुनिप्रवादः।

**प्रतिपदार्थः** – सूर्यात्मजः = शनैश्चरः, वैदूर्यस्य = मणेः, कान्तिः = प्रभा, विमला = निर्मला, प्रजानाम् = लोकानाम्, शुभकृत् = श्रेयस्करः, बाणपुष्पाणामतिकृष्णवर्णानाम्, अतसीकुसुमानाम् = अतिनीलवर्णानाम्। वर्णनिभः = तत्सदृशकान्तिः, शस्तः = प्रशस्तः। यं चापि वर्णमुपगच्छति। यादृशं वर्णं सितं रक्तं पीतं कृष्णमुपगच्छति समाश्रयति। तत्सवर्णान् = तत्समानवर्णान्, द्विजादीन् क्षपयति = ब्राह्मणादीन् नाशयति, मुनीनाम् = गर्गादीनां, प्रवादः = वचनम्।

**व्याख्या** – यदि शनिः वैदूर्यमणेरिव निर्मलः स्यात् तदा लोककल्याणकारको भवति। यदा शनिः बाणपुष्पाणामतिकृष्णवर्णानामतसीकुसुमानामिवातिनीलवर्णानां सदृशकान्तिः भवेत् तदाश्रेयस्करो भवति। शनेः यादृशः वर्णः दृश्यते तादृशानां वर्णानां नाशयति। यदि शनेः श्वेतवर्णस्तदा ब्राह्मणान्नाशयति। रक्तः स्यात् तदा क्षत्रियान् नाशयति। यदि पीतवर्णः स्यात् शनेस्तदा वैश्यान् नाशयति। कृष्णवर्णश्चेत् भवेत् तदा शूद्रान् हन्ति। एवं वचनमिदं गर्गादिमुनीनां वर्तते। तथा च गर्गः –

**भवत्यर्कात्मजे रुक्षे श्यावपीतारुणप्रभे।**
**तदात्मकानां भावानां क्षुच्छस्त्राग्निकृतं भयम्॥**

आचार्यपराशरेणापि कथितं यद् शनैश्चरः पाण्डुवर्णः, स्निग्धः, निर्मलः, कृष्णवर्णः, विस्तृतार्चिः मार्गस्थश्च नक्षत्राणां दक्षिणभागे स्यात् तदा सः कल्याणकारको भवति। तथा च पराशरः –

**पाण्डुः स्निग्धोऽमलः श्यामो विस्तृतार्चिः शनैश्चरः।**
**मार्गस्थश्च प्रसव्यश्च नक्षत्राद्धित इष्यते॥**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## बोधप्रश्नाः

३०. 'साजः' इति पदस्यार्थः कः?

३१. 'शौण्डिकः' इति पदस्यार्थः कः?

३२'. नीतिशास्त्रज्ञान् हन्ति शनौ कस्मिन् नक्षत्रे सति?

३३. शरत्सस्यं इति पदस्यार्थः कः?

३४. शनैश्चरे कस्मिन् नक्षत्रे सति क्रौञ्चदीपाश्रिताः पीड्यन्ते?

३५. यदि शनेः रक्तवर्णः स्यात् तदा किं फलमिति?

३६. यदि शनेः श्वेतवर्णस्तदा कश्चित् हन्ति?

## मूलपाठः

श्रवणानिलहस्तार्द्राभरणीभाग्योपगः सुतोऽर्कस्य।
प्रचुरसलिलोपगुढां करोति धात्रीं यदि स्निग्धः॥

अहिवरुणपुरन्दरदैवतेषु सुक्षेमकृन्न चाति जलम्।
क्षुच्छस्त्रावृष्टिकरो मूले प्रत्येकमपि वक्ष्ये॥

तुरगतुरगोपचारककविवैद्यामात्यहार्कजोऽश्विगतः।
याम्ये नर्तकवादकगेयज्ञक्षुद्रनैकृतिकान्॥

मृगशिरसि वत्सयाजकयजमानार्यजनमध्यदेशाश्च।
रौद्रस्थे पारतरमठास्तैलिकरजकचौराश्च॥

आदित्ये पाञ्चनदप्रत्यन्तसुराष्ट्रसिन्धुसौवीराः।
पुष्ये घाण्टिकघौषिकयवनवणिक्कितवकुसुमानि॥

सार्पे जलरुहसर्पाः पित्र्ये वाह्लीकचीनगान्धाराः।
शूलिकपारतवैश्याः कोष्ठागाराणि वणिजश्च॥

भाग्ये रसविक्रयिणः पण्यस्त्रीकन्यकामहाराष्ट्राः।
आर्यम्णे नृपगुडलवणभिक्षुकाम्बूनि तक्षशिला॥

हस्ते नापितचाक्रिकचौरभिषक्सूचिका द्विपग्राहाः।
बन्धक्यः कौशलका मालाकाराश्च पीड्यन्ते॥

चित्रास्थे प्रमदाजनलेखकचित्रज्ञभाण्डानि।
स्वातौ मागधचरदूतसूतपोतप्लवनटाद्याः॥

ऐन्द्राग्नाख्ये त्रैगर्तचीनकौलूतकुङ्कुमं लाक्षा।
सस्यान्यथ माञ्जिष्ठं कौसुम्भं च क्षयं याति॥

मैत्रे कुलूततङ्गणखसकाश्मीराः समन्त्रिचक्रचराः।
उपतापं यान्ति च घाण्टिका विभेदश्च मित्राणाम्॥

ज्येष्ठासु नृपपुरोहितनृपसत्कृतशूरगणकुलश्रेण्यः।
मूले तु काशिकोशलपाञ्चालफलौषधीयोधाः॥



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



आप्येऽङ्गवङ्गकौशलगिरिव्रजा मगधपुण्ड्रमिथिलाश्च।
उपतापं यान्ति जना वसन्ति ये ताम्रलिप्त्यां च॥

विश्वेश्वरेऽर्कपुत्रश्चरन् दशार्णान्निहन्ति यवनांश्च।
उज्जयिनीं शबरान् पारियात्रिकान् कुन्तिभोजांश्च॥

श्रवणे राजाधिकृतान् विप्राग्रयभिषक्पुरोहितकलिङ्गान्।
वसुभे मगधेशजयो वृद्धिश्च धनेष्वधिकृतानाम्।

रेवत्यां राजभृताः क्रौञ्चद्वीपाश्रिताः शरत्सस्यम्।
शबराश्च निपीड्यन्ते यवनाश्च शनैश्चरे चरति॥

यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातः।
तदा प्रजानामनयोऽतिघोरः पुरप्रभेदो गतयोर्भमेकम्॥

अण्डजहा रविजो यदि चित्रः क्षुद्भयकृद्यति पीतमयूखः।
शस्त्रभयाय च रक्तसवर्णो भस्मनिभो बहुवैरकरश्च॥

## १५.२२ सारांशः

बृहत्संहितायाः दशमोऽध्याये शनैश्चराध्यायोऽत्र शनेः वर्णनमाचार्येण कृतम्। सप्त-विंशतिनक्षत्रेषु शनेः चारवशात् उत्पद्यमानानि फलानि निरुपितानि तान्येव भवता अस्मिन् पाठे विशतदया फलानि अधिगतानि। शनिः यदा श्रवण-स्वाती-आर्द्रा-हस्त-भरणी-पूर्वाफाल्गुनी इत्येतेषु नक्षत्रेषु स्थितः स्यात्तदा पर्याप्तमात्रे वृष्टिं जनयति। श्लेषा - शतभिषा-ज्येष्ठानक्षत्रेषु स्थितः शनिः सुभिक्षाकारकः भवति। किन्तु तदा प्रभूतं वर्षणं न करोति। मूलनक्षत्रे स्थिते दुर्भिक्षं युद्धं वृष्टेराभावं च जनयति। केषुचित् नक्षत्रेषु स्थितेन शनिना किं फलं उत्पद्यते इति? भवता अधिगतं ततः परम अश्विनीतः आरम्भः रेवतीपर्यन्तम् शनिचारस्य फलानि कीदृशानि स्युः इदमपि ज्ञातम्। अन्तिमे श्लोकद्वये वर्णानुसारेण शनेः फलानि विद्यन्ते। चित्रवर्णयुतः शनिः पक्षिणः हन्ति। पीतरश्मिसंयुतः दुर्भिक्षं विदधाति। रक्तवर्णान्वितः संग्रामकारकः भवति। भस्मतुल्यकान्तियुतः शत्रुवृद्धिः करोति। वैदूर्यमणिवत्दृश्यमाणः अर्थात् निर्मलः शनिः श्रेयः उत्पादयति। शनिः यादृशं वर्णं आश्रयति तादृशानां वर्णयुतानां नाशने करणीभूतः स्यात्। अनेनेदं ज्ञायते यत् श्वेतवर्णात्मकशनिः ब्राह्मणान् रक्तः क्षत्रियान्, पीतः वैश्यान् कृष्णः शूद्रान् इत्येवं प्रकारेण तत् तद् वर्णयुतान् जनान् शनिः नाशयतीति अस्य पाठस्य सारांशोऽयं वर्तते।

## १५.२३ शब्दावली

| | | | |
|---|---|---|---|
| १. | उपगूढाम् | = | छन्नाम्। |
| २. | सार्पे | = | आश्लेषायाम्। |
| ३. | वरुणदैवतम् | = | शतभिषक्। |
| ४. | पुरन्दरदैवतम् | = | ज्येष्ठा। |
| ५. | क्षुद् | = | दुर्भिक्षम्। |
| ६. | नैकृतिकः | = | निषादः। |
| ७. | चमूपाः | = | सेनापतयः। |



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



| | | | |
|---|---|---|---|
| ८. | कितवा | = | द्यूतकरा (जुआरी हिन्दीभाषायाम्)। |
| ९. | भिक्षुकाः | = | यतयः। |
| १०. | द्विपाः | = | हस्तिनः। |
| ११. | बन्धक्य | = | वैश्याः। |
| १२. | चित्रभाण्डानि | = | नानावर्णानि। |
| १३. | चराः | = | गूढपुरुषाः। |
| १४. | दूताः | = | गमागमकारिणः। |
| १५. | उपतापम् | = | उपद्रवम्। |
| १६. | नृपसत्कृताः | = | राजपूजिताः। |
| १७. | पारियात्रे | = | गिरौ। |
| १८. | यवनाः | = | म्लेच्छजातयः। |
| १९. | महेन्द्रमन्त्री | = | बृहस्पतिः। |
| २०. | दहनर्क्षः | = | कृत्तिकानक्षत्रम्। |
| २१. | अनयः | = | दुर्नयः (दुराचारः)। |
| २२. | चित्रवर्णः | = | नानाकारः। |
| २३. | भस्मनिभः | = | भस्मसदृशकान्तिः। |

## १५.२४ सन्दर्भग्रन्थः

१. **बृहत्संहिता (भट्टोत्तपलटीका) (आचार्यवराहमिहिरविरचिता),** व्याख्याकारः - डॉ. सुरकान्त झा, चौखम्भा संस्कृत सीरिज ऑफिस, वाराणसी।

## १५.२५ सहायकग्रन्थाः

१. **संस्कृत-हिन्दीशब्दकोशः,** ले. वामन शिवराम आप्टे, मोतलीलाल बनारसीदास पब्लिशर्स प्रा.लि. दिल्ली।

२. **बृहत्संहिता,** व्याख्याकारः - डॉ. नागोन्द्रपाण्डेयः, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी।

३. **बृहत्संहिता,** व्याख्याकारः - डॉ. सुरेशचन्द्रमिश्रः, रंजन पब्लिकेशन्स, १६ अंसारी रोड, दरियागंज, दिल्ली।

## १५.२९ बोधप्रश्नोत्तराणि

१. स्वातिः।

२. शनैश्चरः।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



३. पर्याप्तं जलं प्रददाति।

४. अश्विनीनक्षत्रे।

५. निषादः।

६. नर्तकवादकगेयान्–नैकृतिकान् नाशयति।

७. पंजाबप्रान्ते।

८. तमिलनाडुप्रान्ते।

१०. आर्द्रा।

११. आर्द्रायाम्।

१२. गुजरातप्रान्ते।

१३. पुनर्वसुनक्षत्रे।

१४. आश्लेषा।

१५. वैश्यः (वणिकः)।

१६. मघा।

१७. वैश्याः।

१८. हस्तिनः।

१९. हस्ते।

२०. उत्तराफाल्गुनी।

२२. वेश्याः स्त्रियः।

२२. चित्रानक्षत्रे।

२३. काश्मीरम्।

२४. अनुराधा।

२५. पर्वतीयः।

२६. उपद्रवं प्राप्नुवन्ति।

२७. पूर्वाषाढायाम्।

२८. बिहारप्रान्ते।

२९. उत्तराषाढा।

३०. पूर्वाभाद्रपदा।

३१. मद्यपानप्रसक्ताः।

३२. शतभिषनक्षत्रम्।

३३. धान्यानि।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



३४. रेवत्याम्।

३५. युद्धकारकः।

३६. ब्राह्मणान् हन्ति।

## १५.२७ अभ्यासप्रश्नाः

१. नक्षत्रेषु स्थितिवशात् शनेः सामान्यं फलं लिखत।

२. कृत्तिकायां स्थितशनेः विशिष्टं फलं निरुपणीयम्।

३. हस्ते स्थितशनेः विशिष्टं फलं लेखनीयम्।

४. अनुराधायां स्थितशनेः विशिष्टं फलं लेख्यम्।

५. पूर्वाषाढायां स्थितशनेः विशिष्टं फलं प्रदेयम्।

६. वर्णवशात् शनेः फलं निरुप्यताम्।

—•—



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

# षोडशः पाठः – केतुचारः ( केतोः उदयास्तात् ब्रह्मदण्डकेतुलक्षणं यावत् )



## पाठसंरचना


१६.१ प्रस्तावना
१६.२ उद्देश्यम्
१६.३ केतुविचारस्योपक्रमः
१६.४ केतोः उदयास्तलक्षणम्
  १६.४.१ दिव्येतरस्य केतोः लक्षणम्
  १६.४.२ दिव्यान्तरिक्षभौमकेतुलक्षणम्
  बोधप्रश्नाः
१६.५ केतूनां संख्या
१६.६ केतुदर्शनस्य फलपरिपाककालः
१६.७ शुभाशुभकेतुलक्षणं तत्फलञ्च
  १६.७.१ शुभकेतोः लक्षणम्
  १६.७.२ अशुभकेतोः लक्षणम्
  बोधप्रश्नाः
१६.८ सूर्यपुत्रादिकेतोः पृथक्-पृथक् लक्षणम्
  १६.८.१ सूर्यपुत्रस्य केतोः लक्षणम्
  १६.८.१ अग्निपुत्रकेतोः लक्षणम्
  १६.८.३ मृत्युपुत्रस्य केतोः लक्षणम्
  १६.८.४ भुमिपुत्रस्य केतोः लक्षणम्
  बोधप्रश्नाः
१६.९ चन्द्रपुत्रादिकेतोः लक्षणम्
  १६.९.१ चन्द्रपुत्रकेतोः लक्षणम्
  १६.९.१ ब्रह्मदण्डकेतोः लक्षणम्
  बोधप्रश्नाः
१६.१० मूलपाठः
१६.११ सारांशः
१६.१२ शब्दावली
१६.१३ सन्दर्भग्रन्थाः
१६.१४ सहायकग्रन्थाः
१६.१५ बोधप्रश्नोत्तराणि
१६.१६ अभ्यासप्रश्नाः


## १६.१ प्रस्तावना

बृहत्संहितायाः पञ्चमपाठे भवतः स्वागतं वर्तते। चतुर्थपाठे भवान् रेवत्यां शनेः फलम्, गुरोः शनेश्च संयुक्तफलं शनेः वर्णस्य फलञ्चाधितवान्। अनन्तरं सम्प्रति केतुचाराध्यायस्य पाठं पठिष्यति। अध्यायेऽस्मिन् केतोः चारविषयकज्ञानं वर्तते। चारशब्दस्य अर्थो गमनं भवति। अस्य गमनविषये गर्गपराशरादिमुनिना स्वमतं प्रतिपादितमिति। अत्र केतुशब्दस्य ज्ञानं धूमकेतूत्पातादिना कर्त्तव्यम्। सर्वेषां केतूनां उदयास्तज्ञानं करिष्यति। केतूनां उदयास्तज्ञानं गणितप्रक्रियया कर्त्तुं शक्यते। सिद्धान्तग्रन्थेषु अपि ग्रहाणां नक्षत्राणञ्च उदयास्तज्ञानं विद्यते।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अन्तरिक्षे भौमकेतूनां ज्ञानं केन प्रकरणे भवति? एतत् विषये प्रतिपादितवान् अत्र उत्पातकेतोः विषये लिखितवान् यद्यस्मिन् स्थाने चेत् अग्नेः उपस्थितिः न भवेत् तत्र (च) अग्नेः इव रूपस्य प्रतीतिः स्यात् तर्हि उत्पात्केतुः भवति। अनन्तरं दिव्यान्तरिक्षभौमकेतुलक्षणम्, केतोः कति संख्याः, केतुदर्शनस्य फलपरिपाककालः, शुभाशुभकेतुलक्षणं तत्फलञ्च पठिष्यति। केतोः भेदद्वयं वर्तते। शुभकेतुरशुभकेतुश्च। अत्र शुभकेतोः लक्षणमशुभकेतुलक्षणञ्च विद्यते। तदनन्तरं सूर्यपुत्रादिकेतोः पृथक् - पृथक् लक्षणं क्रमेण दत्तवान्। अनेन क्रमेण चन्द्रपुत्रादिकेतोः लक्षणमपि पठिष्यति भवान् अत्र।

## १६.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- आचार्यवराहमिहिरकृतबृहत्संहितायां वर्णितकेतुचारस्य अध्ययनं करिष्यति।
- केतोः उदयास्तज्ञानं प्राप्स्यति।
- दिव्यान्तरिक्षभौमकेतुलक्षणं ज्ञास्यति।
- केतोः कति सङ्ख्याः भवन्ति? तेषां ज्ञानं प्राप्स्यति।
- केतुदर्शनस्य फलपरिपाकालस्य ज्ञानं भविष्यति।
- शुभाशुभकेतुलक्षणं तत्फलञ्च ज्ञास्यति।
- सूर्यपुत्रादिकेतोः पृथक्-पृथक् लक्षणं ज्ञास्यति।
- चन्द्रपुत्रादिकेतोः लक्षणं ज्ञास्यति।

## १६.३ केतुविचारस्योपक्रमः

**गार्गीयं शिखिचारं पाराशरमसितदेवलकृतं च।**
**अन्यांश्च बहून् दृष्ट्वा क्रियतेऽयमनाकुलश्चारः॥**

**अन्वयः** – अत्र गार्गीयं शिखिचारं पाराशरसितदेवलकृतं अन्यांश्च बहूनं दृष्ट्वा अयं अनाकुलश्चारः क्रियते।

**प्रतिपदार्थः** – गार्गीयं = गर्गमुनिना प्रोक्तम्। शिखिचारम् = केतुचारम्। पाराशरम् = पाराशरेण विरचितम्। असितम् = असितमुनिना उक्तम्। देवलकृतम् = देवलविरचितं च। बहून् केतुचारान् दृष्ट्वा = विचार्य। अन्यान् = काश्यपऋषिपुत्रनारदादिविरचितान्। अयं = केतुचारः। अनाकुलः - निःसन्देहः। क्रियते - मया विरच्यते।

**व्याख्या** – गर्गमुनिना प्रणीतं शास्त्रम्, पाराशरेण भणितं शास्त्रं, असितदेवालादिभिः कथितं शास्त्रम् चेत्यादिना सह अन्येषां मुनीनां मतानां गवेषणं कृत्वा सर्वेषां मुनीनां समन्वितरूपेण केतोः गमनप्रक्रियायाः सन्देहरहितविचारः मया (वराहमिहिराचार्येण) प्रस्तुतः क्रियते।

## १६.४ केतोः उदयास्तलक्षणम्

**दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम्।**
**दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**अन्वयः** – दर्शनमस्तमयो वा गणितविधिनास्य न ज्ञातुं शक्यते, यस्मात् दिव्यान्तरिक्षभौमास्त्रिविधाः केतवः स्युः।

**प्रतिपदार्थः** – दर्शनमस्तमयोः = उदयादर्शनमयोः वा, गणितविधिना = गणितविधानेन न। ज्ञातुम् = वेदितुम्, शक्यते = विचार्यते। यस्मात् केतवस्त्रिविधाः = त्रिप्रकाराः दिव्यान्तरिक्षभौमाः। दिव्याकाशे भवाः दिव्याः। अन्तरिक्षे जाता आन्तरिक्षाः । ग्रहनक्षत्रस्थानं विहायान्यत्राऽऽकाशे ये दृश्यन्ते ते अन्तरिक्षाः। भूमौ भवाः भौमाः। स्युः = भवेयुः।

**व्याख्या** – अस्य केतोः दर्शनम् अर्थात् उदयः अथवा अस्तमयः अर्थात् अदर्शनम्, गणितविधिना नेदं ज्ञातुं शक्यते। यतो हि केतवस्त्रिप्रकाराः दिव्यान्तरिक्षभौमाः भवन्ति। आकाशे जातः दिव्यः, अन्तरिक्षे सञ्जातः अन्तरिक्षः , ग्रहाणां नक्षत्राणाञ्च स्थानं विहाय यः अन्तरिक्षे दृश्यमाणो भवति सः अन्तरिक्षः कथ्यते। भूमौ जातः भौम इति नाम्ना विधेयः। अस्मात् कारणा = दुत्पातरुपत्वादेषामुदयास्तमयौ न ज्ञायेते।

### १६.४.१ दिव्येतरस्य केतोः लक्षणम्।

**मूलपाठः**

**अहुताशेऽनलरुपं यस्मिंस्तत्केतुरुपमेवोक्तम्।**
**खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य॥**

**अन्वयः** – अत्र खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य अहुताशे यस्मिन् अनलरुपं तत्केतुरुपमेवोक्तमिति।

**प्रतिपदार्थः** – अहुताशे = अग्निवर्जिते यस्मिन् देशे , अनलरुपम् = अग्निरुपं दृश्यते। केतुरुपमुक्तम् तेन केतुरुपं कथितम्। खद्योतः = इन्दुगोपकः कृमिविशेषः। पिशाचालयो = यक्षनिवासस्थानम्। मणयः = चन्द्रकान्तप्रभृतयः। रत्नानि = मरकतप्रभृतीनि। आदिग्रहणादन्यान्यपि काचप्रभृतीनि तेजो रुपाणि। एतानि परित्यज्य – त्यक्त्वा। यत एतेषां स्वभावात् एव अनलरुपं दृश्यते। एतानि परित्यज्याऽन्यद्यदनलरुपमहुताशे दृश्यते तस्य केतोः स्वरुपमिति।

**व्याख्या** – केतुस्वरुपविषयेऽत्र उक्तं वर्तते यत् यस्मिन् देशे स्थाने वा अग्निः न स्यात् तत्स्थानं अग्निरहितं कथितम्। तत्स्थाने अग्नेः रुपं दृश्यमाणं भवेच्चेत् तत्केतुस्वरुपं कथ्यते। किन्त्वत्र इन्दगोपकः नामकः कीट-विशेषः खद्योतः। अत्र पिशाचालयः अर्थात् यक्षस्थानं स्वीकृतवान्। चन्द्रकान्तादिमणयः ये सन्ति ते प्रकाशयुक्ताः। रत्नादिशब्देन अन्ये ये प्रकाशयुक्ताः पदार्थास्तेऽत्र अपि समाहिताः सन्ति। एतान् सर्वान् परित्यज्य शेषाः केतवः भवन्ति। यतो हि ये प्राकृतिकरुपतया अग्ने इव अत्र प्रकाशमानाः भवन्ति। तान् सर्वान् विहाय येऽन्याग्निसदृशप्रकाशमानः स्त्युस्तदेव केतोः वास्तविकस्वरुपमस्ति। अत्र आचार्यवराहमिहिरमहोदयेनोक्तं यद् ये मणय सन्ति तेऽपि प्रकाशयुक्ताः। परन्तु अत्र न ग्राह्याः। अग्नेः सादृश्यं प्रकाशितं यत् तदेव केतोः स्वरुपमिति।

### १६.४.२ दिव्यान्तरिक्षभौमकेतुलक्षणम्

**ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वथान्तरिक्षास्ते।**
**दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः॥**

**अन्वयः** – अथ ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वान्तरिक्षास्ते केतवः भवन्ति। अतो नक्षत्रस्थाः दिव्याः तथा अन्यथा भौमाः शिखिनः स्युः।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**प्रतिपदार्थः** – ध्वजः = चिह्नम्। शस्त्रम् = आयुधम्। भवनम् = गृहम्, तरुः = वृक्षः, तुरगः = अश्वः, कुञ्जरो = हस्ती, आदिपदादन्येषु चतुष्पदादिषु दृश्यन्ते ते अनलरुपाः केतवः अन्तरिक्षाः भवन्ति। तथा च नक्षत्रवस्थाः = तारकाणां मध्ये ये विद्यमानाः केतवस्ते दिव्या इति अतोऽस्मादुक्ताद्, अन्यथा = अन्ये भूमौ दृश्यन्ते ते भौमाः शिखिनः कथ्यन्ते।

**व्याख्या** – ध्वजचिह्नयुक्तरचेत् शस्त्रम्, गृहम्, वृक्षम्, अश्वः, हस्ती आदिप्रभृतिषु चष्पदेषु अन्येषु अग्निरुपाः ये दृश्यन्ते तेऽऽन्तरिक्षाः केतवः भवन्ति। किन्तु तारकाणाञ्चेत् मध्ये (गगनमण्डले) ये दृश्यमाणाः केतवस्ते दिव्याः पदवाच्याः। आभ्यां दिव्यान्तरिक्षाभ्यां भिन्नकेतूनां भूमौ चेत् दृश्यन्ते ते भौमाः केतवः प्रोक्ता इति।

**बोधप्रश्नाः**

१. शिखिचार इति पदस्यार्थः कः?

२. केतोः कति प्रकाराः सन्ति?

३. अन्तरिक्षकेतोः का परिभाषा?

४. केतोः वास्तविकस्वरुपं कीदृशं वर्तते?

५. भौमकेतुः केन प्रकारेण निष्पद्यते?

## १६.५ केतूनां संख्या

**शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम्।**
**बहुरुपमेकमेव प्राह मुनिर्नारदः केतुम्॥**

**अन्वयः** – केतूनां एके शतमेकाधिकम्, सहस्रमपरे वदन्ति। मुनिर्नारदः बहुरुपमेकमेव केतुं प्राह।

**प्रतिपदार्थः** – एके = पराशरादयः मुनयः। शतमेकाधिकम् = एकाधिकशतम्। वदन्ति = कथयन्ति केतूनाम् = शिखीनाम्। अपरे – अन्ये गर्गादयः सहस्रं केतूनां निगदन्ति। अत्र नारदाख्यः मुनिरेकमेव केतुं प्राह = उक्तवान्। बहुरुपम् = बहूनि रुपाणि।

**व्याख्या** – अत्र पराशरादिमुनयः एकाधिकं शतं केतूनां संख्या कथयन्ति। तथा च पराशरेण–

**"शतमेकोत्तरं केतूनां भवति। तेषां षोडश मृत्युनिःश्वासजाः। द्वादशाऽऽदित्यसम्भवाः दश दक्षमखविलयने रुद्रक्रोधजाः। सप्त पैतामहाः। पञ्चदश उद्दालकऋषेः पुत्राः। सप्तदश मरीचिकश्यपललाटजाः। पञ्च प्रजापतिहास्यजाः। त्रयो विभावसुजाः। धूमोद्भवश्चैकः। चतुर्दश मथ्यमानेऽमृते सोमेन सह सम्भूताः। एकस्तु ब्रह्मकोपजः।"**

अपरे अन्ये गर्गादयः सहस्रं केतूनां संख्या वदन्ति। तथा च गर्गः –

**अतीतोदयचाराणामशुभानां च दर्शने।**
**आगन्तूनां सहस्रं स्याद् ग्रहाणां तन्निबोध मे॥**

आचार्यनारदः एवमेव केतुं प्रोक्तवान्। तस्य मते एक एव केतुस्तस्य च बहूनि रुपाणि। स एव दिव्यान्तरिक्षभौमः। तथा च नारदः -



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

**दिव्यान्तरिक्षगो भौम एकः केतुः प्रकीर्तितः।**
**शुभाशुभफलं लोके ददात्यस्तमयोदयैः॥**

केतुचारः (केतोः उदयास्तात् ब्रह्मदण्डकेतुलक्षणं यावत्)

अत्र नारदमहोदयेन दिव्यान्तरिक्षगः भौम एकः केतुः कथितः। अस्मिन् लोके शुभाशुभफलं प्रददाति स्वोदयास्तमयैः।

अत्र वराहमिहिरः सर्वान् मतान्तरान् विचार्य कथितवान् यद् केतुश्चेत् एकः स्यात् बहवः वा तेष्वन्तरं न आयाति। यतो हि अस्य फलादेशः उदयस्य, अस्तमयस्य स्थानस्य स्पर्शस्य वर्णस्य च आधारे कथनीयः।

## १६.६ केतुदर्शनस्य फलपरिपाककालः

अत्र केतुचारे येषां केतूनां नाम निर्दिष्टं कियन्तं कालं यावत्फलपाको भविष्यति स एव फलपरिपाकः।

**यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः।**
**मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः॥**

**अन्वयः** – यावन्ति अहानि दृश्यो तावन्तः मासा एव फलपाकः भवति, यावद्भिः मासैरब्दान् प्रथमात पक्षत्रयात् परतश्च वदेत्।

**प्रतिपदार्थः** – यावन्ति अहानि = दिनानि, दृश्यः = दर्शनपथं गतः, तस्य तावन्तः = तावत्संख्यान् एव, मासाः = मासान्, फलपाकः = फलस्य पाकः, मासैः = माससंख्याभिः, अब्दान् = वर्षाणिञ्च, वदेत् = कथयेत्, प्रथमात् = तस्मात्, पक्षत्रयात् = पञ्च-चत्वारिंशद्दिनात्, परतः = तावत इति।

**व्याख्या** – यावन्ति दिनानि गच्छति दर्शनपथं कः? स केतुः। फलस्य पाकः फलपाक इति पदेन उच्यते। तस्य केतोः दृश्यादिनतुल्यांस्तावत्सङ्ख्यकान् मासान् फलपाकं वदेत्। ~~दृश्यमासानां सङ्ख्यादर्शने~~ मासतुल्यानि वर्षाणि फलपाकस्य कथयेत्। यावत्सङ्ख्यकान् मासान् दृश्यो भवति तावन्ति सङ्ख्यानि वर्षाणि फलपाकं वदेत्। अत्र सर्वेषां केतूनां तु सामान्यनियमोऽस्ति। यावन्ति दिनानि केतुः दृश्यगतस्तस्माद् दर्शनादूर्ध्वं प्रथमं त्रयं पक्षं (पञ्चचत्वारिंशद्दिनानि) यावत् निष्फलमिति। तस्मात् पक्षत्रयात् परतस्तावतो मासान् फलपाकः कथितः। अनन्तरं मासाः दृश्यन्ते तदा तस्मादेव दर्शनात् परतः पक्षत्रयमतिक्रम्य मासतुल्यानि वर्षाणि कथयेत्। अत्र केतोः दर्शनादुर्ध्वं प्रथमं त्रयपक्षं यावन्निष्फलं कथयति।

**आचार्येण गर्गसंहितायामुक्तम् –**

**यावन्त्यहानि दृश्यः स्यात्तावन्मासान् फलं भवेत्।**
**मासांस्तु यावद् दृश्येत् तावोऽब्दांश्च वैकृतम्।**
**त्रिपक्षात्परतः कर्म पच्यतेऽस्य शुभाशुभम्।**

अत्र दिव्यकेतूनाम्, ग्रहकेतूनाम् नक्षत्रकेतूनाञ्च फलं तीव्रं निगदितमाचार्यगर्गेण्। भौमकेतोः फलं तु मध्यमं भवति। बृहत्संहिताकारस्तु फलपाकविषये सफलं निष्फलं वा प्राह।

**समाससंहितायाम् –**

**दिव्यग्रहर्क्षजातास्तीव्रफला मन्दफलकराः भौमाः।**
**प्राणिध्वजदि तुंगेषु चान्तरिक्षा न चान्यशुभाः॥**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १६.७ शुभाशुभकेतुलक्षणं तत्फलञ्च

शुभकेतुरशुभकेतुश्च - केतू द्वौ भवतः।

**शुभकेतोः लक्षणम्**

**मूलपाठः**

**ह्रस्वस्तनुः प्रसन्नः स्निग्धस्त्वृजुरचिरसंस्थितः शुक्लः।**
**उदितोऽथवाभिवृष्टः सुभिक्षसौख्यावहः केतुः॥**

**अन्वयः** – ह्रस्वस्तनुः प्रसन्नः स्निग्धस्त्वृजुरचिरसंस्थितः शुक्लः उदितोऽथवाभिवृष्टः केतुः सुभिक्षसौख्यावहः भवति।

**प्रतिपदार्थः** – ह्रस्वः = दीर्घरहितः, तनुः = शरीरम्। प्रसन्नः = निर्मलमनः। स्निग्धः = सुस्नेहः। ऋजुः = स्पष्टः अकुटिलो वा। अचिरसंस्थितः = शीघ्रमेवादर्शनं गतः। शुक्लः = श्वेतवर्णः। उदितः = उदितकालः। अभिवृष्टः = वृष्टिः। केतुः = शिखिः। सुभिक्षसौख्यावहः सुभिक्षं सौख्यं आवहति करोति वा।

**व्याख्या** – शुभकेतोः लक्षणमत्र प्रतिपादितमिति। लघ्वाकारः, स्थूलशरीरम्, निर्मलः सुस्नेहः स्पष्टः शीघ्रमेवादर्शनं यातश्चास्य लक्षणम्। केतोरुदयकाले सति चेत् शीघ्र-वृष्टिः भवेत् तदेव शुभकेतोः लक्षणमुक्तमाचार्येण । अनेन प्रकारेण दृश्यकेतुः सुभिक्षं सौख्यञ्च ददाति।

### १६.७.१ अशुभकेतोः लक्षणम्

**उक्तविपरीतरुपो न शुभकरो धूमकेतुरुत्पन्नः।**
**इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा॥**

**अन्वयः** – उक्तविपरीतरुपो धूमकेतुरुत्पन्न न शुभकरो भवति। तस्मिन् अपि इन्द्रायुधानुकारी द्वित्रिचूलो वा विशेषतोऽशुभो भवति।

**प्रतिपदार्थः** – ह्रस्वस्तनुः प्रसन्न इत्यस्मादुक्ताद्यो विपरीतरूपः। यः केतुरुत्पन्नः स एव धूमकेतुः। न शुभकरः = अशुभकरः अर्थात् शुभफलं न करोति ददाति वा तथेन्द्रायुधानुकारी - शुक्रायुधकारी तस्य सदृशो न शुभकर एव। द्वित्रिचूलो = द्विशिखस्त्रिशिखश्च विशेषतः शुभा न।

**व्याख्या** – अशुभकेतोः लक्षणं शुभकेतोः विपरीतं भवति। विपरीतरुपलक्षणकारी केतुः एव धूमकेतुः वर्तते तस्य फलं शुभं न भवति। यद्यत्र इन्द्रायुधः अर्थात् इन्द्रधनुषा सादृश्यं भवेत्तदा अपि अशुभकारक एव भवति। द्विशिखस्त्रिशिखश्च विशेषतः न शुभकारक एव।

**समाससंहितायामाह**

**अचिरस्थितोऽभिवृष्टस्त्वृजुः स्मितः स्निग्धमूर्तिरुदगुदितः।**
**ह्रस्वस्तनुः प्रसन्नः केतुर्लोकस्य भावाय॥**

यदि किञ्चित् कालस्य कृते शुभकेतु आगच्छति तदा तु वृष्टिः भवति। अत्र केतुशब्दस्य प्रयोगः कृतः। अयं केतुः लोकस्य कृते कल्याणदायकोऽस्ति। इन्द्रधनुषः आकृतिसादृश्यं केतोश्चेत्स्यात्तर्हि शुभदायको न भवति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**बोधप्रश्नाः**

६. केतोः कति सङ्ख्याः भवन्ति पराशरादिमुनिभिः?

७. गर्गादिमुनिभिः केतोः कति सङ्ख्याः?

८. दृश्यकेतोः किं फलं भवति।

## १६.८ सूर्यपुत्रादिकेतोः पृथक्-पृथक् लक्षणम्

अत्र सूर्यपुत्रादि केतोः पृथक् -पृथक् ज्ञानं भवान् करिष्यति। सूर्यपृत्रादि केतोरारभ्य भूमिपुत्रकेतुं यावत् अध्ययनं भविष्यति। तेषां केतूनां लक्षणं पृथक्-पृथक् पठिष्यति।

अधुना केतुसहस्रस्य लक्षणं सफलं विवक्षुस्तत्रादावेव रविजाः पञ्चविंशतिः केतवः भवन्ति।

### १६.८.१ सूर्यपुत्रस्य केतोः लक्षणम्

**मूलपाठः**

**हारमणिहेमरुपाः किरणाख्याः पञ्चविंशतिः सशिखाः।**
**प्रागपरदिशोर्दृश्या नृपतिविरोधावहा रविजाः॥**

**अन्वयः** – रविजाः हारमणिहेमरुपाः किरणाख्याः पञ्चविंशतिः सशिखाः, प्रागपरदिशोर्दृश्या नृपतिविरोधावहाश्च भवन्ति। अत्र आचार्यः रवेः समुत्पन्नकेतोः कृते किरणशब्दप्रयोगं कृतवान्।

**प्रतिपदार्थः** – हारः = मुक्ताहारः, मणिः = चन्द्रक्रान्तिः, हेमरुपं = सुवर्णम्, किरणाख्याः = किरणसंज्ञकाः, पञ्चविंशतिः = पञ्चविंशतिः केतवः, सशिखाः = सचूलाः, स शिखाः अर्थात् शिखायुक्ताः, प्रागपरदिशोः = पूर्वापरदिशोः, दृश्याः = दृश्यन्ते, नृपतिः = राजा, विरोधावहाः = विरोधप्रदाः, रविजाः = सूर्यपुत्राः।

**व्याख्या** – श्लोकेऽस्मिन् कथितं वर्तते यत् मुक्ताहारः, चन्द्रक्रान्तियुक्तः, सुवर्णम् एतेषां सदृशरुपाः समानवर्णा ये केतवः सन्ति ते किरणसंज्ञाः पठिताः। रवेः समुत्पन्नाः पञ्चविंशतिः किरणसंज्ञकः केतवः भवन्ति। एतेषु प्राचीनग्रन्थेषु सूर्यस्य समुत्पन्नाः केतवः निगदिताः। रेवः ये केतुपुत्रास्ते पूर्वापरदिशोः दृश्यन्ते। एकस्मिन् स्थाने काले वा सूर्यपुत्राः दृश्यमानाः न भवन्ति। एतेषु सूर्यपुत्रेषु एकस्मिन् काल एक एव केतुः दृश्यते। इयं परिभाषा सर्वत्र विद्यते। ते केतवः राज्ञः कृते विरोधदायकाः अर्थात् अनिष्टकारकाः भवन्ति। धूमकेतोः दर्शनं काले-काले गगनमण्डलेऽस्मिन् द्रष्टुं शक्यते। काले-काले केतोः दर्शनं यदि भवति तदा अत्रिष्टकारक इति।

### १६.८.२ अग्निपुत्रकेतोः लक्षणम् - अग्नेः पुत्रः अग्निपुत्रः

**शुकदहनबन्धुजीवकलाक्षाक्षतजोपमा हुताशसुताः।**
**आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिभयदाः॥**

**अन्वयः** – शुकदहनबन्धुजीवकलाक्षाक्षतजोपमा हुताशसुताः आग्नेयां दृश्यन्ते तावन्तस्तेऽपि शिखिभयदाः भवन्ति।

**प्रतिपदार्थः** – अत्र शुकः = पक्षीविशेषः, दहनः = अग्निवर्णः,



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



बन्धुजीवकः = पुष्पविशेषः लाक्षा = वृक्षनिर्यासः, क्षतजम् = रक्तम्, उपमाः = अस्ततुल्यवर्णाः, हुताशसुताः = अग्निपुत्राः, आग्नेय्याम् = पूर्वदक्षिणयोर्मध्ये दृश्यन्ते, तावन्तः = पञ्चविंशतिः, ते च दृष्टाः शिखिभयदाः = अग्निभयप्रदाः भवन्ति।

**व्याख्याः** – अग्नेः सदृशः यः केतुः स अग्निकेतुः तस्य पुत्रः अग्निपुत्रकेतुपदेनोच्यते। अग्निपुत्रकेतोः बिम्बः कुत्रश्चिद् स्थानेऽधिकोऽल्पो वा दृश्यते। अस्य स्थितिः भूमौ अन्तरिक्षे च भवति। श्लोकेऽस्मिन् अग्निपुत्रकेतोरपि पञ्चविंशतिः हुताशसुतसङ्ख्यकाः निगदिताः। तेषां हुताशसुतानां स्वरुपमणि विद्यते। अयम् केतुः पक्षिविशेषोऽस्ति। अस्य वर्णः अग्निवर्णः। अग्निपुत्रकेतवः पुष्पविशेषाः सन्ति। केतुरयं वृक्षनिर्यासोऽस्ति। तथा च रक्तवर्णसंयुक्ते सति, अस्ततुल्यवर्णाः हुताशसुताः भवन्ति । तेषां हुताशसुतानां केतूनां निवासस्थानं आग्नेय्यां (पूर्वदक्षिणयोर्मध्ये) दिशि सन्ति। यदि भूमौ अन्तरिक्षे वा अग्निकेतुः दृश्यः भवेत् तदा अस्य फलमुक्तम् अस्माभिः पूर्वाचार्यैः, अग्निभयप्रदाः भवन्ति।

**यथोक्तं गर्गाचार्येण**

**नानावर्णाग्निसङ्काया दीप्तिमन्त्रतो विचूलिनः।**
**सृजन्त्यग्निमिवाकाशात् सर्वे ज्योतिषनाशनाः।**
**तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभय वेदिनः।**
**आग्नेय्यां दिशि दृश्यन्ते पञ्चविंशत्प्रकीर्तिताः॥**

गर्गाचार्यः वराहमिहिरवशात् पूर्ववर्ति आसीत् तेन गर्गसंहितायाम् अग्निपुत्रकेतोः स्वरूपमत्र प्रतिपादितमिति। अग्निपुत्रकेतवः नानावर्णाग्निसङ्काया दीप्तिमन्त्रतो विचूलिनः भवन्ति। अत्र स्पष्टमेव भवति यत् वराहमिहिर पूर्ववर्तीनां आचार्याणामग्निपुत्रकेतोः स्वरुपं अनुसृत्य नानावर्णसंयुक्ताग्निपुत्रकेतूनां वर्णनं कृतवान्। तेन पूर्ववत्याचार्यरचितसंहिताग्रन्थस्य आधारं मत्वा एव बृहत्संहिताग्रन्थस्य रचना कृता। आग्नेय्यां अग्निपुत्रकेतवः दृश्यन्ते तेषां सङ्ख्या पञ्चविंशतिः निर्धारिताः सन्ति। अत्रापि अग्निपुत्रकेतवः अग्निभयसूचकाः मन्यन्ते।

### १६.८.३ मृत्युपुत्रस्य केतोः लक्षणम्

मृत्युपदस्येयं परिभाषा वर्तते यत् चराचरजीवानामन्तः स एव मृत्युः। मृत्योः पुत्रः मृत्युपुत्रः, तस्य केतुः मृत्युपुत्र केतुः।

**मूलपाठः –**

**वक्रशिखा मृत्युसुता रुक्षाः कृष्णाश्च तेऽपि तावन्तः।**
**दृश्यन्ते याम्यायां जनमरकावेदिनस्ते च॥**

**अन्वयः** – वक्रशिखा मृत्युसुता रुक्षाः कृष्णाश्च तेऽपि तावन्तः याम्यायां ते च जनमरकावेदिनः दृश्यन्ते कथ्यन्ते वा।

**प्रतिपदार्थः** – वक्रशिखाः = स्पष्टचूडारहिताः, मृत्युसुताः = मृत्योः पुत्राः रुक्षाः = कान्तिरहिताः, कृष्णाः = असिताः, तेऽपि तावन्तः पञ्चविंशतिरेव सञ्जाताः, दृश्यन्ते = अवलोकयन्ते, याम्यायाम् = दक्षिणदिशि, जनमरकावेदिनः = जनानां मरकामावेदयन्ति कथयन्ति।

**व्याख्या** – मृत्युपुत्रकेतूनां स्वरूपाः स्पष्टाचूडारहिताः, कान्तिरहिताः असिताश्च भवन्ति। प्राचीनोक्तविधिना पञ्चविंशतिकेतवः मृत्युपुत्रस्य भवन्ति। एतेषां केतूनां याम्यादिशि दर्शनं कर्तुं शक्यन्ते। ते याम्यदिशि उदिता भवन्ति। अत्र उदितस्थानं निर्धारितं वर्तते तेषां याम्यदिशि। उदिते सति एतेषां प्रभावः मानवजीवनेऽपि दृश्यते। तेषां फलमुक्तमत्र



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



यत् मृत्युपुत्रकेतवः याम्यदिशि उदिताः भवति तदा चराचरजीवानां मृत्यवधिकाः भवन्ति इत्यत्र प्रतिपादिताः। इमे केतवः मृत्युसन्देशं प्रददति। गर्गः मृत्युपुत्रकेतुमाह।

**कृष्णा रुक्षा वक्रशिखा दृश्यन्ते याम्यदिक्स्थिताः।**
**पञ्चविंशा मृत्युसुताः प्रजाक्षयकराः स्मृताः॥**

### १६.८.४ भूमिपुत्रस्य केतोः लक्षणम्

भूमेः जातः सः भूमिजः अर्थात् भूमिपुत्रः। भूमिपुत्रस्य केतुः भूमिपुत्रकेतुस्तत्पुरुषसमासयुक्तत्वादत्र लक्षणं प्रतिपादितमिति।

**दर्पणवृत्ताकाराः विशिखाः किरणान्विता धरातनयाः।**
**क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः॥**

**अन्वयः** – दर्पणवृत्ताकारा विशिखाः किरणान्विताः धरातनयाः द्वाविंशतिरैशान्यामम्बुतैलनिभाः क्षुद्भयदाः भवन्ति।

**प्रतिपदार्थः** – दर्पणवद् = दर्पणसादृश्यम्, वृत्तः = परिवर्तुलः येषामाकारो ते दर्पणवृत्तकाराः, विशिखाः = विचूलाः, किरणान्तिवताः = रश्मिसंयुक्ताः, धरातनयाः = भूमिः पुत्राः, द्वाविंशतिः = द्वाविंशतिभूपुत्रकेतवः, ऐशान्याम् = पूर्वोत्तरस्यां, अम्बु = जलम्, तैलम् = प्रसिद्धम्, निभाः = कान्तयः, क्षुद्भयदाः = क्षुधासम्बन्धि-अनिष्टदाः।

**व्याख्याः** – श्लोकेऽस्मिन् भूमिपुत्रकेतूनां सङ्ख्या द्वाविंशतिः कथिताः। तेषां भूमिपुत्रकेतूनां स्वरूपमत्र प्रतिपादितमिति। तेषां स्वरुपं दर्पणसादृश्यं वर्तते। आकाशे वर्तुलाकारोऽस्ति। विशेषशिखायुक्तत्वादत्र प्रकाशकिरणसंयुक्ताः सन्ति। भूमिपुत्रकेतवः पूर्वोत्तरस्यां दिशि दृश्यन्ते। तेषां निवासस्थानमिति। जलस्य तैलस्य वा सादृशः कान्त्यः। एते दृष्टा ऐशान्यां दिशि केतवः भवेयुस्तदा फलमुक्तमिति ते क्षुद्भयदाः भवन्ति।

यथोक्तम् –

**समस्तवृत्ता विशिखा रश्मिभिः परिवारिताः।**
**अम्बुतैलप्रतीकाशा द्वाविंशद् भूसुताः स्मृताः।**
**ऐशान्यां दिशि दृश्यन्ते दुर्भिक्षभयदास्तु ते॥**

गर्गसंहितायां भूमिपुत्रकेतूनां स्वरूपं स्थानं फलञ्च यत् प्रतिपादितं गर्गाचार्येण तत् वराहमिहिरकृतबृहत्संहितायां तथैव वर्णितम्। भूमिपुत्रकेतूनां स्वरुपादिकं साम्यं वर्तते।

**बोधप्रश्नाः**

९. सूर्यपुत्रकेतूनां सङ्ख्या कति सन्ति?

१०. सूर्यपुत्रकेतूनां निवासस्थानं कस्यां दिशि वर्तते?

११. अग्निपुत्रकेतूनां निवासस्थानं कस्यां दिशि अस्ति?

१२. मृत्युपुत्रकेतूनां फलं किम्?

१३. भूमिपुत्रकेतूनां सङ्ख्या कति सन्ति?

१४. भूमिपुत्रकेतूनां निवासस्थानं कस्यां दिशि वर्तते?



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १६.९ चन्द्रपुत्रादिकेतोः लक्षणम्

चन्द्रमसो भवः शशीजः अत्र चन्द्रस्य पुत्रश्चन्द्रः = पुत्रः षष्ठीतत्पुरुषसमासयुक्तत्वाद्, चन्द्रपुत्रादिकेतूनां लक्षणं भवान् पठिष्यति। आकाशे चन्द्रमसः ये पुत्रा सन्ति ते आसन्नवर्तिनः तस्य दृश्यन्ते। शशिनः त्रयः पुत्राः भवन्ति। शशिपुत्रकेतूनां लक्षणं प्रतिपादिमिति।

### १६.९.१ चन्द्रपुत्रकेतोः लक्षणम्

**मूलपाठः -**

**शशिकिरणरजतहिमकुमुदकुन्दकुसुमोपमाः सुता शशिनः।**
**उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः॥**

**अन्वयः** – शशिकिरणरजतहिमकुमुदकुन्दकुसुमोपमाः शशिनः सुताः उत्तरतो त्रयः दृश्यन्ते। ते शिखिनः सुभिक्षावहाः ददति।

**प्रतिपदार्थः** – शशिकिरणाः = चन्द्ररश्मयः, रजतम् = रुप्यम्, हिमम् = तुषारम्, कुमुदकुन्दकुसुमे - पुष्पविशेषेऽतिशुक्लवर्णे, उपमा = तुल्यवर्णाः, सुताः = पुत्राः, शशिनः = चन्द्रमिताः, उत्तरतः = सौम्यदिशि, दृश्यन्ते = विलोक्यन्ते, त्रयः शिखिनः त्रयः केतवः, सुभिक्षावहाः = सुभिक्षमावहन्ति इत्यर्थः।

**व्याख्याः** – अत्र चन्द्रपुत्रकेतवः त्रयः स्वीकृताः। ते शशिरश्मियुक्ता भवन्ति। रजतयुक्ताः हिमसहिताः कुमुदकुन्दकुसुमयुक्ताश्च तेषां केतूनां स्वरुपाः निगदिताः। तेषां निवासस्थानं उत्तरदिशि दृश्यन्ते। सर्वे: केतवः एकस्मिन् स्थाने दृश्यते न तु भिन्न-भिन्नस्थाने। एकस्मिन् स्थाने भूतत्वाद् तेषां स्वरुपा समतुल्याः भवन्ति। चन्द्रपुत्र केतवः ये सन्ति तेषां फलमिताः सुभिक्षाः भवन्ति। गर्गोक्तं यथा –

**चन्द्ररिश्मसवर्णाभा हिमकुन्देन्दुसप्रभाः।**
**त्रयस्ते शशिनः पुत्राः सौम्याशास्थाः शुभावहाः।**

### १६.९.२ ब्रह्मदण्डकेतोः लक्षणम्

**मूलपाठः -**

**ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगान्तकरः।**
**अनियतदिक्सम्प्रभवो विज्ञेयो ब्रह्मदण्डाख्यः॥**

**अन्वयः** – ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगान्तकरः अनियतदिक्-सम्प्रभवो ब्रह्मदण्डाख्यः विज्ञेयः।

**प्रतिपदार्थः** – ब्रह्मसुतः = ब्रह्मणः पुत्रः एक एव, त्रिशिखः =त्रिचूलः, वर्णैः सितादिभिस्त्रिभिरुपलक्षिता स्ताश्च शिखाः, अनियतः = अनिश्चितः, दिक्= दिशि, सम्प्रभवः = उत्पत्तिः, विज्ञेयो = विज्ञातव्यः, ब्रह्मदण्डाख्यो = ब्रह्मदण्डसंज्ञ इति, युगान्तः = युगस्यान्तं करोति, सर्वत्र क्षयकर इत्यर्थः।

**व्याख्या** – अत्र ब्रह्मणः पुत्रः एकः एव वर्तते। सः त्रिचूलयुक्तः। अयं त्रिभिर्वर्णैः सुयुक्तो वर्तते। स तु ब्रह्मदण्डसंज्ञो ज्ञेयः। अस्योत्पत्तेः दिक् अनिश्चिता वर्तते। न निश्चितः, अनिश्चितः नग समासयुक्तोऽत्र वर्तते। तस्य निवासस्थानं कस्यामिपि दिशि भवितुमर्हति। सर्वासु दिक्षु सः दृश्यो भवति। यदि ब्रह्मदण्डकेतुः कस्यां दिशि दृश्यः भवेत् तस्मिन् काले युगस्यान्तो भवति अत्र विद्यते। यथोक्तं गर्गसंहितयाम् -



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

**एको ब्रह्मसुतः क्रूरस्त्रिवर्णस्त्रिशिखान्वितः।**
**सर्वास्वाशासु दृश्यः स्यात् ब्रह्मदण्डः क्षयावहः।**

केतुचारः (केतोः उदयास्तात् ब्रह्मदण्डकेतुलक्षणं यावत्)

अत्रोक्तं वर्तते यत् ब्रह्मदण्डश्चेत् दृश्यः स्यात् तदा स लोकस्य क्षयकारक इति। (यहाँ पर नया मैटर जोड़ना है लेकिन समझ में नही आ पारहा है। कृपया समझाये।)

**बोधप्रश्नाः**

१५. चन्द्रपुत्रकेतवः कति सन्ति?

१६. चन्द्रपुत्रकेतूनां निवासस्थानं कस्यां दिशि वर्तते?

१७. 'रजतम्' इति पदस्यार्थः कः?

१८. ब्रह्मदण्डः उदितो यदि भवेत् तर्हि किं फलमिति?

## १६.१० सारांशः

आचार्यवराहमिहिरकृतवृहत्संहितायाः केतुचाराध्याये केतुचारविषयकज्ञानं प्राप्तमित्यस्मिन् पाठे। केतोः चारः केवलं दिव्ये स्थाने न विद्यते। अन्यस्थानद्वयेऽपि वर्तते। यथा – आन्तरिक्षस्थाने भूमिस्थाने च। अतोत्पत्तिविषये लिखितमिति ये दिव्ये भवा ते दिव्यकेतवः, अन्तरिक्षे भवस्ते आन्तरिक्षकेतवः भूमौ जाताश्च भूमिकेतवः भवन्ति। एतेषां केतूनामुदयास्तविषयेऽपि चर्चा कृता वराहमिहिरेण। अत्र सर्वेषां ग्रहाणां केतवः प्रतिपादिताः सन्ति किन्तु केवलं नवग्रहाणां केतवः न, अन्येऽपि केतवस्तत्र कथिताः सन्ति। यस्मिन् देशे स्थाने वा अग्निः न स्यात् तत्स्थानं अग्निरहितं कथितं तत्स्थाने अग्नेः रुपं दृश्यमाणं भवेत् चेत् तत्केतुस्वरूपं कथ्यते। दिव्यान्तरिक्षभौमकेतूनां लक्षणं पठितमिति। एतेषां केतूनां द्वौ विभागौ कृतौ, शुभकेतुः अशुभकेतुश्च इति नाम्ना विधेयः। शुभकेतुः यदि दृश्यः भवेत् तर्हि तत्फलं शुभमिति। अशुभकेतुश्चेत् दृश्यः स्यात् तदा तत्फलमशुभमुक्तम्। केतूनामत्र सङ्ख्याः पठिताः सन्ति। अध्यायेऽस्मिन् केतवः ये सन्ति तेषां फलं कियत काले भवन्ति। अत्र तेषां कालनिर्देषः दत्तः। ग्रहाणामत्र ये केतवः सन्ति ते पुत्ररूपे विद्यमानाः। तेषां पुत्ररूपविद्यमानकेतूनां लक्षणं यथा क्रमेण प्रतिपादितमत्र। एतेषां ज्ञानाय भवान् इदानीं समर्थोऽस्ति इत्ययम् एवास्य पाठस्य महत्त्वपूर्णांशः साराशंः इति वर्तते।

**मूलपाठः**

**गार्गीयं शिखिचारं पाराशरमसित देवलकृतं च।**
**अन्यांश्च बहून् दृष्ट्वा क्रियतेऽयमना कुलश्चारः॥**

**दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम्।**
**दिव्यान्तरिक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्॥**

**अहुताशेऽनलरुपं यस्मिंस्तत्केतुरुपमेवोक्तम्।**
**खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य॥**

**ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वथान्तरिक्षास्ते।**
**दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः॥**

**शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम्।**
**बहुरुपमेकमेव प्राह मुनिर्नारदः केतुम्॥**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अतीतोदयचाराणामशुभानां च दर्शने।
आगन्तूनां सहस्रं स्याद् ग्रहाणां तन्निबोध मे॥

दिव्यान्तरिक्षगो भौम एकः केतुः प्रकीर्तितः।
शुभाशुभफलं लोके ददात्यस्तमयोदयैः॥

यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः।
मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः॥

यावन्त्यहानि दृश्यः स्यात्तवन्मासान् फलं भवेत्।
मासांस्तु याव् दृश्येत् तावोऽब्दांश्च वैकृतम्।
त्रिपक्षात्परतः कर्म पच्यतेऽस्य शुभाशुभम्।

दिव्यग्रहर्क्षजातास्तीव्रफला मन्दफलकराः भौमाः।
प्राणिध्वजादे तुंगेषु चान्तरिक्षा न चान्यशुभाः॥

ह्रस्वस्तनुः प्रसन्नः स्निग्धस्त्वृजुरचिरसंस्थितः शुक्लः।
उदितोऽथवाभिवृष्टः सुभिक्षसौख्यावहः केतुः॥

उक्तविपरीतरुपो न शुभकरो धूमकेतुरुत्पन्नः।
इन्दायुधानुकारी विशेषतो द्वित्रिचूलो वा॥

हारमणिहेमरुपाः किरणाख्याः पञ्चविंशतिः सशिखाः।
प्रागपरदिशोर्दृश्या नृपतिविरोधावहा रविजाः॥

शुकदहनबन्धुजीवकलाक्षाक्षतजोपमा हुताशसुताः।
आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिभयदाः॥

वक्रशिखा मृत्युसुता रुक्षाः कृष्णाश्च तेऽपि तावन्तः।
दृश्यन्ते याम्यायां जनमरकावेदिनस्ते च॥

दर्पणवृत्ताकाराः विशिखाः किरणान्विता धरातनयाः।
क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः॥

शशिकिरणरजतहिमकुमुदकुन्दकुसुमोपमाः सुता शशिनः।
उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः॥

ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगान्तकरः।
अनियतदिक्सम्प्रभवो विज्ञेयो ब्रह्मदण्डाख्यः॥

## १६.११ शब्दावली

| | | | |
|---|---|---|---|
| १. | गार्गीयं | = | गर्गविरचितम्। |
| २. | शिखिचारम् | = | केतुचारम्। |
| ३. | अनाकुलः | = | निःसन्देहः। |
| ४. | गणितविधिना | = | गणितप्रक्रियया। |
| ५. | अहुताशः | = | अग्निरहितः। |
| ६. | खद्योतः | = | इन्द्रगोपकः। |



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

| | | | | |
|---|---|---|---|---|
| ७. | तरुः | = | वृक्षम्। | केतुचारः (केतोः उदयास्तात् ब्रह्मदण्डकेतुलक्षणं यावत्) |
| ८. | कुञ्जरः | = | हस्ती। | |
| ९. | शिखिनः | = | केतवः। | |
| १०. | पक्षत्रयात् | = | पञ्चचत्वारिंशत्। | |
| ११. | तनुः | = | अस्थूलः। | |
| १२. | प्रसन्नः | = | निर्मलः। | |
| १३. | अचिरम् | = | शीघ्रमेवादर्शनम्। | |
| १४. | द्विचूलः | = | द्विशिखः। | |
| १६. | हेमः | = | सुवर्णम्। | |
| १७. | विरोधावहाः | = | विरोधप्रदाः। | |
| १८. | शुकः | = | पक्षीविशेषः। | |
| १९. | क्षतजम् | = | रक्तम्। | |
| २०. | शिखिभयदा | = | अग्निभयप्रदा। | |
| २१. | वक्रशिखा | = | अस्पष्टचूला। | |
| २२. | रुक्षाः | = | अस्निग्धाः। | |
| २३. | धरातनयः | = | भूमिपुत्राः। | |
| २४. | शशिकिरणाः | = | चन्द्ररश्मयः। | |
| २५. | अनियतः | = | अनिश्चितः। | |
| २६. | सम्प्रभवः | = | उत्पत्तिः। | |

## १६.१२ सन्दर्भग्रन्थः

१. **बृहत्संहिता (भट्टोत्पलटीका)**, व्याख्याकारः - डॉ. सुरकान्त झा, चौखम्भा संस्कृत सीरिज ऑफिस, वाराणसी।

## १६.१३ सहायकग्रन्थाः

१. **संस्कृत-हिन्दीशब्दकोशः**, ले. वामन शिवराम आप्टे, मोतीलाल बनारसीदास पब्लिशर्स प्रा.लि., दिल्ली।

२. **बृहत्संहिता**, व्याख्याकारः डॉ. नागेन्द्रपाण्डेयः, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी।

३. **बृहत्संहिता**, व्याख्याकारः - डॉ. सुरेशचन्द्रमिश्रः, रंजन पब्लिकेशन्स, १६ अंसारी रोड, दरियागंज, नई दिल्ली।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १६.१४ बोधप्रश्नोत्तराणि

१. केतुचारः।

२. त्रयः प्रकाराः।

३. अन्तरिक्षे जाताः केतवः ,आन्तरिक्षकेतवः भवन्ति।

४. अग्निसादृश्यम्।

५. भूमौ जातः यः सः भौमकेतुः।

६. एकाधिकशतम्।

७. सहस्रम्।

८. सुभिक्षं सौख्यञ्च।

९. पञ्चविंशतिः।

१०. पूर्वापरदिशोर्मध्ये।

११. आग्नेय्याम्।

१२. मृत्युसंदेशः।

१३. द्वाविंशतिः।

१४. ऐशान्याम्।

१५. त्रयः पुत्राः।

१६. सौम्यदिशि।

१७. रौप्यम् (चाँदी)।

१८. लोकस्य क्षयकारकः।

## १६.१५ अभ्यासप्रश्नाः

१. केतोः उदयास्तज्ञानं कथं भवति?

२. दिव्यान्तरिक्षभौमकेतुलक्षणं विलेखनीयम्?

३. केतोः सङ्ख्या लिखत्?

४. सूर्यपुत्रकेतोः ज्ञानं कथं क्रियते?

५. ब्रह्मदण्डकेतोः लक्षणं लिखत?

६. अग्निपुत्रकेतोः लक्षणं विलिख्यताम्?

७. शुभकेतोः लक्षणं प्रतिपादनीयम्?

८ केतुदर्शनस्य फलपरिपाककालः प्रदेयः?

९. भूमिपुत्रकेतोः लक्षणं लिखत्?

१०. चन्द्रपुत्रकेतोः लक्षणं प्रतिपाद्यताम्?

—•—



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# सप्तदशः पाठः – केतुचारः (शुक्रपुत्रकेतोः आरभ्य रौद्रकेतुलक्षणं यावत्)

पाठसंरचना

१७.१ प्रस्तावना
१७.२ उद्देश्यम्
१७.३ शुक्रपुत्रकेतोः लक्षणम्
१७.४ शनैश्चरपुत्रकेतोः लक्षणम्
१७.५ बृहस्पतिपुत्रकेतोः लक्षणम्
१७.६ बुधपुत्रकेतोः लक्षणम्
बोधप्रश्नाः
१७.७ मङ्गलपुत्रकेतोः लक्षणम्
१७.८ राहुपुत्रकेतोः लक्षणम्
१७.९ अग्निपुत्रकेतोः लक्षणम्
१७.१०वायुपुत्रकेतोः लक्षणम्
बोधप्रश्नाः
१७.११ प्रजापतिपुत्रकेतोः लक्षणम्
१७.१२ वरुणपुत्रकेतोः लक्षणम्
१७.१३ कालपुत्रकेतोः लक्षणम्
१७.१४ विदिक्पुत्रकेतो : लक्षणम्
बोधप्रश्नाः
१७.१५ वसाकेतोः लक्षणम्
१७.१६ अस्थिशस्त्रकेत्वोः लक्षणम्
१७.१७ कपालकेतोः लक्षणम्
१७.१८ रौद्रकेतोः लक्षणम्
बोधप्रश्नाः
१७.१९ सारांशः
मूलपाठः
१७.२० शब्दावली
१७.२१ सन्दर्भग्रन्थः
१७.२२ सहायकग्रन्थाः
१७.२३ बोधप्रश्नोत्तराणि
१७.२४ अभ्यासप्रश्नाः

## १७.१ प्रस्तावना

आचार्यवराहमिहिररचितबृहत्संहिताया: षष्ठपाठे भवतः स्वागतं वर्तते। पञ्चमे पाठे तु सूर्यपुत्रकेतोः आरभ्य ब्रह्मदण्डकेतुं यावत्, एतेषां सूर्यपुत्रादिकेतूनां लक्षणं यथाक्रमेण पठितवान्। षष्ठपाठे अन्येषां ग्रहपुत्राणां केतवः कति सन्ति? तेषां केतूनां लक्षणं फलं वाऽत्र प्रतिपादितमिति। ग्रहपुत्राणां उपग्रहाणाञ्च ये केतवः विद्यन्ते ते विभिन्नाः सन्ति। पाठेऽस्मिन् धूमकेतूनां लक्षणं फलं वा भवान् पठिष्यति। अत्र केचन् उपग्रहाः स्वीकृताः। तेषामुपग्रहाणां पुत्रकेतवोऽपि विद्यन्ते। पाठेऽस्मिन् शेषकेतूनामपि चर्चा कृता, एतेषां केतूनां संख्याः (८९९) एतावन्मिताः अङ्गीकृताः सन्ति। पूर्वपाठे तु एकशतकेतूनां चर्चा कृता। शुक्रपुत्रकेतोः लक्षणमत्र स्पष्टं कृतं



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



यत् शुक्रपुत्रकेतुश्चेत् उत्तरदिशि ऐशान्यां दृश्यस्तदा तस्य फलमनिष्टकारकमित्युक्तम्। तेषां ग्रहपुत्रकेतूनां उपग्रहकेतूनाञ्च लक्षणं क्रमरूपेणाऽत्र पठिष्यति भवान् । अत्र बृहस्पतिपुत्रकेतोः लक्षणम् बुधपुत्रकेतोर्लक्षणम्, मङ्गलपुत्रकेतोर्लक्षणम्, राहुपुत्रकेतोर्लक्षणम् अग्निपुत्रकेतुर्लक्षणम्, वायुपुत्रकेतुर्लक्षणम्, प्रजापतिपुत्रकेतुलक्षणम्, वरुणपुत्रकेतुलक्षणम् कालपुत्रकेतोलक्षणम् विदिक्पुत्रकेतुर्लक्षणम्, वसा केतोः लक्षणम् कपालकेतोर्लक्षणम् रौद्रकेतोर्लक्षणमिति तेषां ग्रहपुत्रः केतूनां लक्षणं यथा क्रमेण भवान् पठिष्यति।

## १७.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- शुक्रपुत्रकेतोः परिचयं प्राप्स्यति।
- शनैश्चरपुत्रकेतूनां ज्ञानं करिष्यति।
- बृहस्पतिपुत्रकेतूनामध्ययनं भविष्यति।
- अन्येषां ग्रहपुत्राणां लक्षणं प्राप्स्यति।
- कालपुत्रकेतोः परिचयं ज्ञास्यति।
- शस्त्रकेतोः लक्षणं ज्ञास्यति।

## १७.३ शुक्रपुत्रकेतोः लक्षणम्

अत्र ब्रह्मदण्डकेतोरनन्तरं शुक्रपुत्रकेतूनां चर्चा विद्यन्ते। शुक्रपुत्रस्य केतवः चतुरशीत्याख्याः सन्ति। एतेषां शुक्रपुत्रकेतूनां लक्षणं फलञ्चात्र प्रतिपादितमिति।

**सौम्यैशान्योरुदयं शुक्रसुता यान्ति चतुरशीत्याख्याः ।**
**विपुलसिततारकास्ते स्निग्धाश्च भवन्ति तीव्रफलाः ॥**

**अन्वयः** – सौम्यैशान्योरुदयं शुक्रसुताः चतुरशीत्याख्याःयान्ति। विपुलसित तारकास्ते स्निग्धा तीव्रफलाश्च भवन्ति।

**प्रतिपदार्थः** – सौम्या = उत्तरा / ऐषानी = पूर्वोत्तरदिशोर्मध्ये / उदयः = उदितः / शुक्रः = भृगुः / सुताः = पुत्राः / भृगोः पुत्रः भृगुपुत्रः षष्ठीतत्पुरुषसमासयुक्तत्वादत्र प्रोक्त इति। चतुरशीत्याख्याः = चतुरशीतिसंख्याः / यान्ति = गच्छन्ति / विपुला = विस्तीर्णाः / सिताः = शुक्लवर्णाः / तारकाः = प्रकाशपिण्डास्ते / स्निग्धाः = निर्मलदेशाः / तीव्रफलाः = अनिष्टफलप्रदाः भवन्ति।

**व्याख्या** – अत्र शुक्रपुत्रस्य केतवश्चतुरशीत्याः सन्ति। तेषां केतूनां नाम पृथक्-पृथक् वर्तन्ते। एतेषां केतूनां स्वरूपाः विस्तृताः, सितश्वेतवर्णाभ्यां संयुक्ताः प्रकाशपिण्डाः निर्मलदेहाश्च सन्ति। तेषां स्थान -विषये अत्र कथितं वर्तते यत् पूर्वोत्तरदिशयोः मध्ये अर्थात् ईशानकोणे भवन्ति एतेषां निवास स्थानमिति। यदि शुक्रपुत्रकेतवः पूर्वोत्तरदिशोर्मध्ये दृश्याः भवेयुः तदा तत्रैव दृश्यशुक्रपुत्रः केतूनां तीव्रफलाः (अनिष्टफलप्रदाः) भवन्ति। आचार्यगर्गमहोदयेन शुक्रपुत्रकेतूनां ऐशान्य्यां दिश्युदय सति विसर्प इति नाम्ना प्रोक्तः। तेषां फलमिति लोकक्षयकारकं भवन्ति। यथोक्तम् –

**स्थूलैकतारकाः श्वेताः स्नेहवन्तश्च सप्रभाः।**
**आर्चिष्मन्तः प्रसन्नाश्च तीव्रेण वपुषान्विताः॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**एते विसर्पका नाम शुक्रपुत्राः पुरोदयाः।**
**अशीतिश्चतुरश्चैव लोकक्षयकराः स्मृताः॥**

## १७.४ शनैश्चरपुत्रकेतोः लक्षणम्

शनैः शनैश्चरतीति शनैश्चरः। शनैश्चरस्य पुत्रः शनैश्चरपुत्रः। ये तेजोमयपिण्डाः गगनेऽस्मिन् विद्यमानाः सन्ति ते केतवः स्मृताः। शनैश्चरपुत्रस्य केतुः शनैश्चरपुत्रकेतु इति समासयुक्तत्वाद् अत्र शनैश्चरपुत्रः केतवः षष्टिमिताः निगदिताः।

**मूलपाठः –**

**स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः।**
**अतिकष्टफला दृश्याः सर्वत्रेते कनकसंज्ञाः॥**

**अन्वयः –** अत्र स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः कथ्यन्ते। एते दृश्याः स्युस्ते कनकसंज्ञाः प्रदत्ताः। सर्वत्र अत्यधिककष्टफलप्रदाः भवन्ति।

**प्रतिपदार्थः –** स्निग्धाः = निर्मलाः। प्रभा समेताः = क्रान्त्यन्विताः दीप्तिमन्तः। द्विशिखाः = द्विचूडास्ते च षष्टिसंख्याः। शनैश्चराङ्गरुहाः शनैश्चरस्याङ्गैः समुद्भूताः शनैश्चराङ्गरुहाः। एते कनकसंज्ञाः = कनककेतवः। सर्वत्र = सर्वासु दिक्षु। अतिकष्टफलाः = अत्यशुभफलाश्च ते भवन्ति।

**व्याख्या –** शनैश्चरपुत्रकेतोः स्वरुपाः निर्मलाः क्रान्तियुक्ताः द्विचूलाश्च सन्ति। अस्य पुत्रस्य केतवः षष्टिः भवन्ति। आकाशे अग्निसादृश्यप्रकाशपुञ्जाः ये दृश्यन्ते ते शनैश्चरपुत्रकेतव इति। शनैश्चरपुत्र केतुनामुत्पत्तिविषये वराहमिहिरेणात्र प्रतिपादितं यत् ते केतवः शनैश्चरस्याङ्गैः समुद्भूता भवन्ति। एतेषां समुद्भूतकेतूनां नाम कनकसंज्ञाः इति प्रदत्ताः सन्ति। यदि गगने शनैश्चरपुत्रकेतवः दृश्याः भवेयुस्तेषां प्रकाशयुक्तकेतूनां फलाः सर्वेषु स्थानेष्वतिकष्टकारकाः भवन्ति। यत्र यत्र शनैश्चरपुत्रकेतवः दृश्यन्ते तत्र तत्रातिकष्टफलप्रदाः स्मृताः। आचार्यगर्ग महोदयेन शनैश्चरपुत्रकेतूनां सप्ततारकाः स्वीकृताः। किन्तु वराहमिहिरः स्वरचितबृहत्संहितायाः केतुचाराध्याये शनैश्चरपुत्रकेतोः कृते तारकशब्दस्य प्रयोगः न कृतवान्।

यथा गर्गसंहितायामाह –

**सुस्निग्धा रश्मिसंयुक्ता द्विशिखाः सप्ततारकाः।**
**षष्टिस्ते कनकाः घोराः शनैश्चरसुताः ग्रहाः॥**

## १७.५ बृहस्पतिपुत्रकेतोः लक्षणम्

बृहस्पतेः पर्याय गुरुरपि वर्तते। बृहस्पतेः पुत्राः बृहस्पतिपुत्रास्तत्पुरुषसमासयुक्तत्वादत्र विद्यन्ते। बृहस्पतिपुत्रकेतूनां षष्टिः पञ्चभिरधिका एतावन्मिताः प्रोक्ता इति।

**मूलपाठः –**

**विकचा नाम गुरुसुताः सितैकताराः शिखापरित्यक्ताः।**
**षष्टिः पञ्चभिरधिकाः स्निग्धा याम्याश्रिताः पापाः॥**

**अन्वयः –** विकचा नाम गुरुसुताः सितैकताराः शिखापरित्यक्ताः षष्टि पञ्चभिरधिकाः स्निग्धा याम्याश्रिताः पापाः भवन्ति।

**प्रतिपदार्थः –** गुरुसुताः = गुरोः सुताः गुरुसुताः / विकचाः अर्थात् गुरुपुत्रकेतूनां



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



विकचसंज्ञा प्रदत्ता सन्त्यत्र, सितैकताराः = सितः श्वेत एकस्तारका येषां सितैकतारा भवन्ति, शिखापरित्यक्ताः = चूडारहिताः, स्निग्धाः = निर्मलदेहाः, याम्याश्रिताः = दक्षिणदिगाश्रिताः / पापाः = पापफलाः (अनिष्टफलप्रदाः), षष्टिः पञ्चभिरधिकाः = पञ्चषष्टिकेतवः।

**व्याख्या** – गुरुसुतकेतवः श्वेतवर्णयुक्ताः सन्ति। गगनमण्डलेऽस्मिन् एकतारारुपे विद्यमानाः शिखारहिताश्च विद्यन्ते। एतेषां गुरुपुत्रकेतूनां पञ्चषष्टिसंख्याः एतावन्मिताः निगदिताः। अत्र गुरुपुत्रकेतषः दक्षिणस्यां दिशि दृश्याः भवन्ति। आचार्यवराहमिहिरेण तेषां दृश्य-स्थाननिर्धारितमस्ति। अत्र सर्वेषां गुरुपुत्रकेतूनां विकचा इति नाम्ना उद्घोषिताः। अत्र वर्णितदिशि चेत् गुरुपुत्रकेतवः दृश्याः स्युस्तदा तत्र तेषां अनिष्टपापफलाः भवन्ति। आचार्यगर्गरचितगर्गसंहितायां तेषां गुरुपुत्रकेतूनां फला अनिष्टकारकैः सह भयावहाः अपि स्मृताः। यथोक्तं गर्गसंहितायाम्–

**शुक्लाः स्निग्धाः प्रसन्नाश्च महारूपाः प्रभान्विताः।**
**एकतारा वपुष्मन्तो विशिखा रश्मिभिर्वृताः॥**

**एते बृहस्पतेः पुत्राः प्रायशो दक्षिणाश्रयाः।**
**नामतो विकचो घोराः पञ्चषष्टिर्भयावहाः॥**

## १७.६ बुधपुत्रकेतोः लक्षणम्

वुधस्य पुत्रः वुधपुत्रः समासपदयुक्तत्वादत्रेति। बुधस्य पर्यायः सौम्यः। बुधपुत्रकेतव एकपञ्चाशन्मिताः अत्र कथिताः सन्ति। एते केतवः बिम्बरुपविद्यमाना इति।

**मूलपाठः –**

**नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः।**
**बुधजास्तस्करसंज्ञाः पापफलास्त्वेकपञ्चाशत्॥**

**अन्वयः** – नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः बुधजास्तस्करसंज्ञाः पापफलात्वेक पञ्चाशन्मिताः भवन्ति।

**प्रतिपदार्थः** – नातिव्यक्ताः = नातिस्फुटाः / सूक्ष्माः = अल्पदेहाः / दीर्घाः = आयामिनः / शुक्लाः = श्वेतवर्णाः / यथा = येन प्रकारेण / इष्टदिक् = इष्टायाम् / दिक् = दिशि/ प्रभवः = समुद्भूतः (यथेष्टायां दिशि प्रभव उत्पत्तिर्येषाम्। बुधजाः = सौम्यपुत्राः। तस्करसंज्ञाः = तस्करनामानि। एकपञ्चाशत् = पञ्चाशत एकाधिकः। पापफलाः = पापफलदायकाः।

**व्याख्याः** – गगनमण्डलेऽस्मिन् बुधपुत्रकेतूनां स्वरूपाः नीतिस्पष्टाः दृश्यन्ते। एतेषां केतूनामल्पदेहाः दीर्घसहिताः श्वेतवर्णाश्च सन्ति। वुधपुत्रस्य ये केतवस्ते एकपञ्चाशन्मिताः सन्ति। पुत्रकेतवः दर्शनं भवितुं अर्हन्ति। सर्वाषु दिक्षु एते दृश्या भवेयुस्ते तस्करसंज्ञककेतवः इति पदवाच्याः। एते वुधपुत्रकेतवश्चेत् दिशि दृश्यास्ते फलाः अत्र अनिष्टकारका भवन्ति। आचार्यगर्गमहोदयेन बुधपुत्रकेतुविषये स्वरचितसंहितायामुक्तं यत् अयं केतुः अरुन्धती नक्षत्रस्य सादृश्य दृश्यते। तेषां वुधपुत्रकेतूनां सञ्चरणमार्गः अनिश्चितो वर्तते। आचार्य वराहमिहिरः वुधपुत्रकेतूनां भ्रमणमार्गस्य चर्चामत्र न कृतवान्।

गर्गोक्तं यथा –

**अरुन्धतिसमा रुक्षाः केचिदव्यक्ततारकाः।**
**स पाण्डुवर्णाः श्वेताभाः सूक्ष्मा रश्मिभिरावृताः॥**

**एते बुधात्मजा ज्ञेयास्तस्कराख्या भयावहाः।**
**एकाधिकास्ते पञ्चाशदथोत्पथचरा ग्रहाः॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**बोधप्रश्नाः**

१. शुक्रपुत्रकेतवः कति सन्ति?

२. शुक्रपुत्रकेतोः स्थानं कस्यां दिशि वर्तते?

३. शनैश्चरपुत्रकेतोः नाम किम्?

४. शनैश्चरपुत्रकेतोः फलं किम्?

५. गुरुपुत्रकेतवः कति वर्तन्ते?

६. बुधपुत्रकेतोः वर्णः कः?

## १७.७ मङ्गलपुत्रकेतोः लक्षणम्

मङ्गलस्य पुत्रः मङ्गलपुत्रोऽत्र समासपदयुक्तात्वादेति। मङ्गलस्य पर्याय भौमोऽपि भवति। मङ्गलपुत्रकेतवोऽपि गगनमण्डलेऽस्मिन् विद्यन्ते। ते प्रकाशरूपेविद्यमानाः सन्ति। मङ्गलपुत्रकेतवः षष्टिमिताः सन्ति।

**क्षतजानलानुरुपास्त्रिचूलताराः कुजात्मजाः षष्टिः।**
**नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पापाः॥**

**अन्वयः** – क्षतजानलानुरुपास्त्रिचूलताराः कुजात्मजाः षष्टिः नाम्ना च कोङकुमास्ते सौम्याशासंस्थिताः पापाः भवन्ति।

**प्रतिपदार्थः** – क्षतजम् = रक्तम् / अनलः = अग्निः / अनुरुपाः = सदृशाः / त्रिचूलाः = त्रिशिखः / त्रितारकाः = त्रितारायुक्ताः / कुजात्मजाः = भूमिपुत्राः / षष्टिः = षष्टिकेतवः नाम्ना च / कौङ्कुमाः = कौङकुमनामानः, "सौम्याशाः अर्थात् सौम्यादिशि ये संस्थितास्ते सौम्याशासंस्थिताः" उत्तरस्यां दिशि दृश्यन्ते। पापाः = पापफलदायकाः।

**व्याख्याः** – मङ्गलपुत्रकेतोः रक्तवर्णः वर्तते। अस्य अग्नेः सदृशक्रान्तिरस्ति। आकाशे मङ्गलपुत्रकेतूनां त्रिस्रः शिखाः विराजन्ते। तिस्रः तारकाः अपि एतेषां मङ्गलपुत्रकेतूनां सन्ति। ते भौमपुत्रकेतवः गगनमण्डलेऽस्मिन् स्पष्टरूपेण दृश्याः भवन्ति।

इमे उत्तरस्यां दिशि भौमपुत्रकेतवः दृश्यन्ते। एतेषां भौमपुत्राणां केतुसंख्याः वराहमिहिरेण अत्र षष्टिः भौमपुत्रकेतवः स्वीकृताः। आकाशे प्रकाशरुपविद्यमानभौमपुत्रकेत्व उत्तरस्यां दिशि दृश्याः भवेयुस्तेषां केतूनां ये फलाः सन्ति ते पापफलदायकाः भवन्ति। अत्र पापफलदायकशब्देन ग्रहणमिदं कृतं वर्तते यत् सकलचराचरजीवानामनिष्टकारकाः भवन्ति। तेषां भौमपुत्रकेतूनां कोङकुमा इति नाम्ना प्रसिद्धाः सन्ति। आचार्यगर्गमहोदयेन मङ्गलपुत्रकेतवः नित्यदृश्याः सौम्यदिशि इति कथिताः सन्ति स्वरचितसंहितायाम्। गर्गविरचितसंहितायामेतेषां भौमपुत्रदृश्यकेतूनां फला पापदायकास्तेः भवन्ति। किन्त्वत्र केवलं राज्ञां कृते युद्धकारकाः विज्ञेयाः। गर्गसंहितयामाह –

**त्रिशिखाश्च त्रिताराश्च रक्ता लोहितरश्मयः।**
**प्रायशश्चोत्तरामाशां सेवन्ते नित्यमेव ते॥**

**लोहिताङ्गात्मजाः ज्ञेया ग्रहाः षष्टिः समासतः।**
**नामतः कौङकुमा ज्ञेया राज्ञां संग्रामकारकाः॥**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १७.८ राहुपुत्रकेतोः लक्षणम्

राहो पुत्रः राहुपुत्रोऽत्र समासपदयुक्तत्वादेति। तस्य राहुपुत्रस्य ये केतवस्ते राहुपुत्रकेतव इत्युच्यन्ते। स्वर्भानुः राहो : पर्यायोऽस्ति। अस्य राहुपुत्रकेतोः लक्षणमनेन प्रकारेण प्रतिपादितं वर्तते वराहमिहिरेण।

**मूलपाठः –**

**त्रिंशत्यधिका राहोस्ते तामसकीलका इति ख्याताः।**
**रविशशिगा दृश्यन्ते तेषां फलमर्कचारोक्तम्॥**

**अन्वयः** – राहोः त्रिंशत्यधिकास्ते तामसकीलका इति ख्याताः रविशशिगा दृश्यन्ते तेषां फलमर्कचाराध्याये उक्तमिति।

**प्रतिपदार्थः** – राहोः = स्वर्भानोः / त्रिंशत्यधिकाः = त्रयस्त्रिंशद्केतवस्ते तामसकीलकाः = तामस कीलकाः इति नाम्ना प्रख्याताः / रविशशिगाः = सूर्यचन्द्रमण्डलस्थाः / दृश्यन्ते = अवलोक्यते / तेषां = राहुपुत्रेकतूनां / फलम् = शुभाशुभफलम् / अर्कचारः = आदित्यचाराध्यायः / उक्तम् = कथितम्।

**व्याख्या** – राहुपुत्रकेतवः ये सन्ति ते तामसकीलका इति नाम्ना प्रसिद्धाः। एतेषां राहुपुत्रकेतूनां संख्याः त्रयस्त्रिंशन्मिताः मन्यन्ते वराहमिहिरमहोदयेन। राहुपुत्रकेतवः कस्यां दिशि दृश्याः भविष्यन्ति? अत्र दिक्पदस्य प्रयोगः न कृतः। तेनोक्तं वर्तते यदेते राहुपुत्रकेतवः रविमण्डले चन्द्रमण्डले च दृश्यन्ते।

अत्र राहुपुत्रकेतूनां फलन्तु न दत्तवान् आचार्यवराहमिहिरः। श्लोकेऽस्मिन् सूर्यचारशब्दस्य प्रयोगः कृतवानस्ति। अर्थादत्र ज्ञानमिदं करणीयं यत्तेन राहुपुत्रकेतूनां शुभाशुभफलमादित्यचाराध्याये कथितमस्ति। राहुपुत्रकेतूनां स्वरूपादिवर्णनं वराहमिहिरमहोदयेन नाऽत्र दत्तमस्ति परन्तु तेषां राहुपुत्रकेतूनां स्वरूपादिवर्णनं सूर्यचाराध्याये विद्यते। आचार्यगर्गेण राहुपुत्रकेतवः अतिभयदायकाः भवन्तीत्युक्तं स्वसंहितायां यथा –

**कृष्णाभाः कृष्णपर्यन्ताः सङ्कुलाः कृष्णरश्मयः।**
**राहुपुत्रास्त्रयस्त्रिंशत् कीलकाश्चातिदारुणाः।**
**रविमण्डलगाश्चैते दृश्यन्ते चन्द्रगास्तथा।**

तथा च पराशरः –

**अपर्वण्येव दृश्यन्ते ह्यङ्गिरःकाककीलकाः।**
**रवेरेवाङ्गिरा मध्ये ह्युभयो काककीलकौ॥**

**अङ्गिराः सरथो धन्वी दृश्यते पुरुषाकृतिः।**
**काकः कालाकृतिर्घोरस्त्रिकोणो वापि लक्ष्यते।**
**मण्डलं कीलके मध्ये मण्डलस्यासितो ग्रहः।**
**महानृपविरोधाय यस्यर्क्षे तस्य मृत्यवे॥**

अपर्वः अर्थात् पर्वरहितकालोऽपर्वकालः इति। पर्वशब्दोऽत्र ग्रहणवाचको वर्तते। ग्रहणं द्विविधमिति। सूर्यग्रहणं चन्द्रग्रहणञ्चेति। सूर्यग्रहणं अमायां भवति। चन्द्रग्रहणन्तु शराभावे पूर्णिमायामिति। प्रत्येकं पूर्णिमायां अमायाञ्च सूर्यग्रहणं चन्द्रग्रहणञ्च न सम्भवति।

पराशरोक्तं स्वसंहितायां पर्वकालं विनैव अङ्गिरकाककीलककेतवः दृश्यन्ते गगनमण्डले। एते अङ्गिरकाककीलककेतवः येन नक्षत्रेण सह दृश्याः भवेयुस्तदा तस्य नक्षत्रस्य मानवानां कृते मृत्युदायको भवति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १७.९ अग्निपुत्रकेतोः लक्षणम्

अग्नेः पुत्रः अग्निपुत्रोऽत्र समासपदयुक्तत्वादेति। अग्निपुत्रस्य ये केतवः तेऽग्निपुत्रकेतव इत्युच्यन्ते। आकाशे अग्निपुत्रकेतवः प्रकाशरूपविद्यमानाः सन्ति। एतेषां अग्निपुत्रकेतूनां संख्याः १२० एतावन्मिता सन्ति। तेषां अग्निपुत्रकेतूनां लक्षणमत्र प्रतिपादितमस्तीति।

**मूलपाठः –**

**विंशत्याधिकमन्यच्छतमग्नेर्विश्वरूपसंज्ञानाम्।**
**तीव्रानलभयदानां ज्वालामालाकुलतनूनाम्॥**

**अन्वयः** – विंशत्याधिमन्यच्छतमग्नेर्विशव रूपसंज्ञानां ज्वालामालाकुलतनूनां तीव्रानलभयदानामिति।

**प्रतिपदार्थः** – विंशत्याधिकम् = विंशतिसंख्याधिकम्/ अन्यद् = अपरं/ शतम् = शतसंख्याः/ अग्नेः = अग्निपुत्राणाम्/ विश्वसंज्ञानाम् = विश्वरुपनाम्नाम्/ ज्वालामाला = ज्वालायाः मालाभिः/ अकुलाः = व्याप्ताः/ तनवः = मूर्तयः/ तीव्रम् = घोरम्/ अनलः = अग्निः/ भयः = भयदायकः/ इति।

**व्याख्या** – आकाशे तेषां अग्निपुत्रकेतूनां स्थितयः अग्नेः सदृशाः सन्ति। आचार्यगर्गमहोदयेन प्रोक्तमत्र वर्तते यत् अग्निपुत्रकेतूनां प्रभावः लोकेऽस्मिन् भयदायको भवति। यथोक्तं गर्गाचार्येण –

**नानावर्णा हुताशाभा दीप्तिमन्त्रो विचूलिनः।**
**सृजन्त्यग्निमिवाकाशे सर्वे ज्योतिर्विनाशनाः।**
**तेऽग्निपुत्रा ग्रहाः ज्ञेया लोकेऽग्निभयवेदिनः।**
**विंशं ग्रहशतं घोरं विश्वरूपेति नामतः॥**

## १७.१० वायुपुत्रकेतोः लक्षणम्

वायोः पुत्रः वायुपुत्र इति समासपदयुक्तत्वादत्र। वायुपुत्रस्य ये केतवस्ते वायुपुत्रकेतवः इति नाम्ना विज्ञेयाः। एते वायुपुत्रकेतवः आकाशे प्रकाशरूपविद्यमानाः सन्ति। आचार्यवराहमिहिरेण वायुपुत्रकेतूनां सप्तसप्ततिसंख्याः प्रोक्ताः स्वरचितसंहितायाम्।

**मूलपाठः –**

**श्यामारूणा विताराश्चामररूपा विकीर्णदीधितयः।**
**अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः॥**

**अन्वयः** – वायोः श्यामारुणा विताराश्चामररुपा विकीर्णदीधितयः, अरुणाख्याः सप्तसप्ततिः पापदाः परुषाः भवन्ति।

**प्रतिपदार्थः** – वायोः पुत्राः = वायुपुत्राः/ श्यामः = कृष्णवर्णः/ रक्तः = रक्तवर्णः/ कृष्णरक्तवर्णयोः युक्तः कृष्णरक्तमिश्रितवर्णः, विताराः = तारकवर्जिताः/ चामररूपाः = बालव्यजना कृतयः/ विकीर्णदिधितयः = व्याक्षिप्तरश्मयः/ अरुणाख्याः = अरुणसंज्ञाः/ सप्तसप्ततिः = सप्तसप्ततिसंख्याः केतवः/ पापदाः = दुष्टफलदाः/ परुषाः = रुक्षाः।

**व्याख्या** – अत्र वायुपुत्रकेतूनां सप्तसप्ततिसंख्याः सन्ति। तेषां वायुपुत्रकेतूनां स्वरूपाः रक्तमिश्रितवर्णाः, बालव्यंजनाकृतयः व्याक्षिप्तरश्मयश्च युक्ताः सन्ति। अत्र ये



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



केतवः विद्यमानास्ते रूक्षाः सन्ति। आचार्यवराहमिहिरेण एतेषां वायुपुत्रकेतूनामरुणसंज्ञा इति नाम्न अभिहिताः। अत्र येषां वायुपुत्रकेतूनां दिङ्नियमो नास्ति ते अनियतदर्शनाः सर्वासु दिक्षु दृश्यन्ते। आकाशे यदि वायुपुत्रकेतवः दृश्याः स्युस्ते केतवोऽनिष्टफलप्रदायकाः भवन्ति। आचार्यगर्गेणोक्तं यत् वायुपुत्रकेतवः तारकरहिताः, धूमरक्तवर्णसंयुक्ताः, वायोः सादृश्यरुपाश्च एते दृश्याः भवन्ति गगनमण्डलेऽस्मिन्। तेषां वायुपुत्रकेतूनां लोकविध्वंसकारकफलः भवन्ति इत्यत्र प्रतिपादितं वर्तते। गर्गसंहितायामाह यथा –

**अतारुपप्रतिमा धूमरक्तसवर्णिनः।**
**वातरुपा इवाभान्ति शुष्कविस्तीर्णरश्मयः॥**

**सप्ततिः सप्त चैवान्ये वायुपुत्रान् प्रचक्षते।**
**लोकविध्वंसना रुक्षा नामतस्त्वरुणा ग्रहाः॥**

**बोधप्रश्नाः**

७. मङ्गलपुत्रकेतवः कति सन्ति?

८. मङ्गलपुत्रकेतोः फलं किम् ?

९. तामसकीलकाः कति भवन्ति?

१०. राहुपुत्रकेतवः कस्मिन् मण्डले दृश्यन्ते?

११. अग्निपुत्रकेतवः कति सन्ति?

१२. "अनल" इति कस्य पर्यायः?

१३. वायुपुत्रकेतवः कियन्तः सन्ति ?

१४. वायुपुत्रकेतोः कीदृशी आकृतिरस्ति?

## १७.११ प्रजापतिपुत्रकेतोः लक्षणम्

प्रजापतेः पुत्रः प्रजापतिपुत्र इति समासपदयुक्तोऽत्र। प्रजापतेः पर्यायः ब्रह्मा। प्रजापतिपुत्रस्य केतवोऽष्टौऽत्र प्रतिपादिताः वराहमिहिरेण बृहत्संहितायाम्। ब्रह्मपुत्रकेतूनां संख्याः २०४ एतावन्मिताः श्लोकेऽस्मिन् लिखिताः सन्ति। अत्र प्रजापतिपुत्रकेतोः ब्रह्मपुत्रकेतोश्च लक्षणं प्रतिपादितमिति।

**मूलपाठः –**

**तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ।**
**द्वे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः॥**

**अन्वयः** – प्रजापतेरष्टौ गणका नाम तारापुञ्जनिकाशाः, ब्रह्मसन्तानाः च शते चतुरधिके चतुरस्राः भवन्ति।

**प्रतिपदार्थः** – अत्र अष्टौ केतवः गणका नाम प्रजापतेः पुत्राः कथिताः। तारापुञ्जनिकाशास्तारकाणां नक्षत्राणाम्। पुञ्जाः = समूहाः / निकाशाः = तस्काराः / ते पापफलाः = अशुभफलदायिनः तेन प्रकारेण द्वे च शते चतुरधिके च चतुरधिकद्विशतकेतवः भवन्ति। चतुरस्राः = चतुरस्राः आकृतयः ये सन्ति ते चतुरस्राः कथिताः। ब्रह्मसन्तानाः = ब्रह्मणः ये सन्तानास्ते ब्रह्मपुत्रकेतवः संज्ञाता इति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केतुचारः (शुक्रपुत्रकेतोः आरभ्य रौद्रकेतुलक्षणं यावत्)

**व्याख्या** – अत्र प्रजापतिपुत्रस्याष्टौ केतवः सन्ति। आकाशे तारकाणां सदृशप्रजापतिपुत्रकेतवः दृश्याश्चेत् तर्हि ते केतवः गणका इति नाम्ना प्रसिद्धाः सन्ति। प्रजापतिपुत्रकेतवः आकाशे नक्षत्राणां समूहा इव आकृतय सन्ति। यदि ये केतवः दृश्यास्तेऽशुभफलदायकाः भवन्ति। ब्रह्मपुत्रकेतवः २०४ एतावन्मिताः प्रतिपादिताः सन्त्यत्र वराहमिहिराचार्येण । एतेषां ब्रह्मपुत्रकेतूनां स्वरूपाः चतुरस्राः निगदिताः। एतेषां ब्रह्मपुत्रकेतूनां दृश्यस्य निश्चितं स्थानं न निर्धारितमत्र। अनेन ज्ञायते यत्तेषां ब्रह्मपुत्रकेतूनामनियतदिक्सम्प्रभवाः सन्ति। अत्र ब्रह्मपुत्रकेतूनां फलाः अपि पापफलदायकाः कथिताः सन्ति। आचार्यगर्गमहोदयेन श्वेतरश्मिशब्दस्य प्रयोगः कृतोऽस्ति ब्रह्मपुत्रकेतोः कृते। एतेषां ब्रह्मपुत्रकेतूनां स्वरुपाः श्वेतरश्मियुक्ताः सन्ति। एते केतवश्चेत् दृश्याः स्युराकाशे ते भयदायकाः भवन्ति। गर्गसंहितायामाह यथा –

**तारापुञ्जप्रतीकाशास्तारामण्डलसंस्थिताः।**
**प्राजापत्या ग्रहास्त्वष्टौ गणका भयवेदिनः॥**

**त्र्यस्रा वा चतुरस्रा वा सशिखाः श्वेतरश्मयः।**
**द्वे शते चतुरश्चैव ब्रह्मजा भयदाश्च ते॥**

## १७.१२ वरुणपुत्रकेतोः लक्षणम्

वरुणस्य पुत्रः वरुणपुत्रोऽत्र समासपदयुक्तत्वादेति। वरुणपुत्रस्य ये केतवस्ते वरुणपुत्रकेतवः इति नाम्ना ज्ञेयाः। ते वरुणपुत्रकेतवः गगने ज्योतिरूपविद्यमानाः सन्ति। गगनमण्डलेऽस्मिन् ते केतवः वरुणस्यासत्र वर्तिनः सन्ति। आचार्यवराहमिहिरेण वरुणपुत्रस्य द्वात्रिंशत्केतवः बृहत्संहितायां प्रोक्ताः। तेषां वरुणपुत्रकेतूनां लक्षणमत्र प्रतिपादितमिति।

**मूलपाठः** –

**कङ्का नाम वरुणजा द्वात्रिंशद्वंशगुल्मसंस्थानाम्।**
**शशिवत्प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः॥**

**अन्वयः** – वरुणजा केतवः कङ्का नाम द्वात्रिंशद्वंशगुल्मसंस्थानां शशिवत्प्रभास-मेतास्तीव्रफलाः प्रोक्ताः सन्ति।

**प्रतिपदार्थः** – कङ्का नाम = कङ्कानामानः / वरुणादुत्पन्नाः वरुणजाः केतवः / द्वात्रिंशन्मिताः यस्य केतवस्ते वरुणपुत्रकेतव इति / वंशगुल्मसंस्थानाम् = वंशगुल्मवत्संस्थान-माकृतिर्येषाम् / गुल्मः = एकमूलजो (लतासमूहः) / शशिवत् = चन्द्रसादृश्यम् / प्रभा = क्रान्त्या / समेताः = संयुक्ताः / तीव्रफलाः = कष्टप्रदफलाः / प्रोक्ताः = कथिताः / ते केतवश्चानियतदिक्सम्प्रभवा इति।

**व्याख्या** – अत्र "कङ्का" इति शब्दस्य प्रयोगः कृतः आचार्येण अर्थात् वरुणपुत्रकेतवः ये सन्ति तेषां केतूनां कङ्का इति नाम्ना प्रख्याताः सन्ति। वंशगुल्मसदृशास्तेषां वरुणपुत्रकेतूनामाकृतयः सन्ति। अत्र गुल्मशब्दस्य परिभाषा दत्तेति। एकमूलजः लतासमूहः स एव गुल्म इत्युच्यते। श्लोकेऽस्मिन् आचार्योक्तं यच्चेद् वरुणपुत्रस्य ये केतवः आकाशे दृश्यन्ते तेषां केतूनां स्वरुपाश्चन्द्रस्य सदृशाः प्रकाशयुक्तदृश्याः भवन्ति। ते वरुणपुत्रकेतवः फलाः कष्टफलदायकाः प्रोक्ता इत्याचार्येणात्र आचार्यगर्गमहोदयेन वरुणपुत्रेकतूनां स्वरुपाः प्रतिपादिताः सन्ति स्वरचितसंहितायाम्। एतेषां केतूनां स्वरुपाः वंशगुल्मसमूहसदृशाः, पूर्णरश्मिसंयुक्ताः, काकतुण्डनिभैः सदृशाः, सुस्निग्धाः सौम्यदर्शनाश्च प्रोक्ता सन्ति। तेषां केतूनां फलानि कष्टदायकानि कथितानि सन्त्यत्र। यथोक्तम् –



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**वंशगुल्मप्रतीकाशाः महान्तः पूर्णरश्मयः ।**
**काकतुण्डनिभैश्चापि रश्मिभिः केचिदावृताः ॥**

**मूयखानुत्सृजन्तीव सुस्निग्धा सौम्यदर्शनः ।**
**एते कष्टफलाः प्रोक्ता द्वात्रिंशद्वारुणा ग्रहाः ॥**

## १७.१३ कालपुत्रकेतोः लक्षणम्

कालस्य पुत्रः कालपुत्र इति समासपदयुक्तत्वादत्र। तस्य ये केतवस्ते कालपुत्रकेतव इत्युच्यन्ते। कालपुत्रकेतवोऽपि आकाशे प्रकाशरूपे विद्यमानाः सन्ति। ते कालपुत्रकतवः षण्णवति एतावन्मिताः सन्ति। एते कालपुत्रकेतवः कबन्धसंज्ञा इति नाम्ना प्रसिद्धाः सन्ति।

**मूलपाठः –**

**षण्णवतिः कालसुताः कबन्धसंज्ञाः कबन्धसंस्थानाः।**
**पुण्ड्राभयप्रदाः स्युर्विरूपताराश्च ते शिखिनः॥**

**अन्वयः** – कालसुताः षण्णवतिः कबन्धसंज्ञाः कबन्धसंस्थानाः पुण्ड्राभयप्रदास्ते शिखिनः विरूपताराश्च स्युः।

**प्रतिपदार्थः** – कालसुताः = कालपुत्राः / कबन्धसंज्ञाः = कबन्धनामानः / षण्णवतिः = नवतिः षट् / कबन्धसंस्थानाः = कबन्धश्छिन्नशिराः पुरुषस्तद्वत्संस्थानमाकृतिर्येषाम् विरूपताराः = अस्फुटाः तारकाः = नक्षत्राणि / शिखिनः = केतवः / पुण्ड्राः = जनपदस्तेषामभयप्रदाः श्रेयस्करा इति स्युः = भवेयुः / अन्यत्र पुनर्भयदाः / ते केतवोऽनियतदिक्सम्प्रभवाः भवन्ति।

**व्याख्या** – अत्र कालपुत्रस्य केतवः षण्णवतिः सन्ति। तेषां कालपुत्रकेतूनां कबन्ध संज्ञाः इति नाम्ना अपि प्रसिद्धाः सन्ति। ते केतवः गगनमण्डलेऽस्मिन् छिन्नशिरपुरुषसदृशाः आकृतयः सन्ति। एतेषां कालपुत्रकेतूनामस्पष्टाराः कथिताः वराहमिहिरेण। आचार्येण ये कालपुत्रकेतवः कथितास्ते दृश्याश्चेत् भवेयुस्तदा तत्र इमे केतवः पुण्ड्रनामकजनपदस्य कृतेऽभयदायकाः श्रेयस्कराश्च भवन्ति। अन्येषां स्थानानां कृते भयदायकाः सन्ति। एतेषां केतूनां दृश्यस्थानं निर्धारितमत्रेति। तेन अनियतशब्दस्य प्रयोगः कृतोऽस्ति। अनियतशब्दस्तु वराहमिहिरश्लोकेऽस्मिन् न। भट्टोत्पलकृतटीकायां शब्दोऽयं वर्तते दृश्यते वा। गर्गसंहितायां कालपुत्रकेतूनां स्वरुपाः पीतारुणसवर्णाः भस्मकर्पूरश्मियुक्ताः श्वेतप्रकाशसदृशाश्च वर्णिताः सन्ति। चेदिमे केतवः दृश्याः स्युस्ते लोकेऽस्मिन् मृत्युकारकाः, क्रूरास्तथा च पुण्ड्रजनपदस्य कृतेऽभयप्रदायकाः भवन्ति । यथोक्तं गर्गेण –

**तारापुञ्जविरुपाश्च कबन्धाकृतिसंस्थिताः।**
**पीतारुणसवर्णाश्च भस्मकर्पूररश्मयः॥**

**कालपुत्राः कबन्धाश्च नवतिः षट् च ते स्मृताः।**
**लोके मृत्युकरा घोराः पुण्ड्राणामभयप्रदाः॥**

## १७.१४ विदिक्पुत्रकेतोः लक्षणम्

विदिशां पुत्रः विदिक्पुत्रोऽत्र समासपदयुक्तत्वादेति। विदिकपुत्रस्य केतवः विदिक्पुत्रकेतवः इति कथ्यन्ते। विदिक्पुत्रकेतवः प्रकाशरुपविद्यमानाः आकाशे सन्ति। विदिक्पुत्रस्य नवसमुत्पन्नकेतवोऽत्र प्रसिद्धाः सन्ति। तेषां केतूनां लक्षणमत्र प्रतिपादितमिति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**मूलपाठः –**

**शुक्लविपुलैकतारा नव विदिशां केतवः समुत्पन्नाः।**
**एवं केतुसहस्रं विशेषमेषामतो वक्ष्ये॥**

**अन्वयः** – शुक्लविपुलैकतारा विदिशां नवकेतवः समुत्पन्ना सन्ति। एवं केतुसहस्रमतो विशेषमेषां वक्ष्ये।

**प्रतिपदार्थः** – शुक्लः = श्वेतवर्णः / विपुलः = विस्तीर्णः / एकस्तारको येषां शुक्लविपुलैकताराः/ विदिशाम् = दिगन्तरालानां / नवसमुत्पन्नाः केतवः = विदिक्पुत्र केतवः / एवम् = अनेन प्रकारेण / केतुसहस्रम् = पूर्ववर्णितसहस्रकेतवः / विशेषः = विशेषरुपतया / येषाम् = सहस्रकेतूनाम् / वक्ष्ये = कथयामि।

**व्याख्या** – अत्र विदिक्पुत्रकेतूनां स्वरुपाः श्वेतवर्णाः विस्तीर्णाश्च सन्ति। एतेषां केतूनामेकं नक्षत्रमेवं वर्तते। विदिक् अर्थात् दिशां कोणे विदिशां नवकेतवः सन्ति। ते विदिक्पुत्रकेतवः विदिक्षु एव दृश्यन्ते। चेदिमे केतवः दृश्याः भवेयुस्ते पापफलदायकाः भवन्ति।

आचार्यगर्गोक्तं यथा –

**शुक्लैकतारा विपुला विदिक्पुत्रा नव ग्रहाः।**
**विदिक्षु संस्थितास्ते च दृश्यन्ते भयदायकाः॥**

एवमत्र सहस्रकेतूनां चर्चा कृता वर्तते। अतोऽनन्तरमेतेषामेव केतूनां यद्वैशिष्ट्यं वर्तते तेषां केतूनां विशेषलक्षणमत्र प्रतिपादितमाचार्यवराहमिहिरेण । तेन एतेषु केतुषु सर्वे दृश्याः न भवन्ति। आकाशे किञ्चित्केतवः एव दृश्यन्ते। तेषां केतूनां लक्षणं अत्र प्रतिपादितमिति। अत्र शुक्रपुत्रकेतो आरभ्य रौद्रपुत्रकेतुं यावत् ८४+६०+६५+५१+६०+३३+१२०+७७+८+२०४+३२+९६+९ तावन्मिताः केतवः भवन्ति। पूर्वमेव एकाधिकशतकेतूनां चर्चा कृता वर्तते। अनयोः समायोजितास्ते ८९९+१०१ = १००० सहस्रकेतवः भवन्ति।

**बोधप्रश्नाः**

१५. प्रजापतिपुत्रकेतवः कति सन्ति?

१६. ब्रह्मपुत्रकेतोः कीदृशी आकृतिः वर्तते?

१७. ब्रह्मपुत्रकेतोः फलं किम्?

१८. वरुणपुत्रकेतवः कति सन्ति?

१९. वरुणपुत्रकेतूनां नाम किम्?

२०. तीव्रफलमिति पदस्यार्थः कः?

२१. कालपुत्रकेतवः कियन्तो वर्तन्ते?

२२. कालपुत्रकेतोः कीदृशी आकृतिरस्ति?

२३. विदिक्पुत्रकेतवः कति सन्ति?

## १७.१५ वसाकेतोः लक्षणम्

अत्र वसायुक्तः यः केतुः सः वसाकेतु इति पदेनोच्यते। तस्य लक्षणं अत्र प्रतिपदितमाचार्यवराहमिहिरेण।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**मूलपाठः –**

**उदगायतो महान् स्निग्धमूर्तिरपरोदयी वसाकेतुः ।**
**सद्यः करोति मरकं सुभिक्षमप्युत्तमं कुरुते ॥**

**अन्वयः** – अयं वसाकेतुः उदगायतो महान् स्निग्धमूर्तिरपरोदयी सद्यो मरकं करोति उत्तमपि सुभिक्षं च कुरुते।

**प्रतिपदार्थः** – उदग् = सौम्यदिशि / आयतः = दीर्घः / महान् = अतिस्थूलः / स्निग्धः = निर्मूलः / मूर्तिः = तनुः / अपरः = पश्चिमायां दिशि / उदयः = दृश्यः / सद्यः = शीघ्रः / मरकम् = मरणं करोति / उत्तमपि = प्रधानमपि / सुभिक्षम् = शुभं च कुरुते।

**व्याख्या** – वसाकेतोः स्वरूपमत्र प्रतिपादितं वर्तते यदयं वसाकेतुः सौम्यदिशि दीर्घाकारः वर्तते। एषः वसाकेतुरतिस्थूलयुक्तोऽस्ति। तस्य तनुः निर्मलयुक्तत्वाद्, पश्चिमदिशि उदितोऽयं भवति। यदि वसाकेतुः पश्चिमदिशि दृश्यो भवेत् तर्हि शीघ्र एव तस्मिन्नवाहनि मरणं करोत्येव अयं वसाकेतुः मुख्यतया सुभिक्षमपि ददाति।

## १७.१६ अस्थिशस्त्रकेत्वोः लक्षणम्

अस्थिः सदृशः आकरः यस्य स एवास्थिकेतुरस्ति। आकाशेऽस्थिवद् दृश्यते। शस्त्रवदाकारः यस्य सः शस्त्रकेतु इति पदेन कथ्यते। अनयोः केत्वोः लक्षणं प्रतिपादितमत्र वराहमिहिरेण।

**मूलपाठः**

**तल्लक्षणोऽस्थिकेतुः स तु रुक्षः क्षुद्भयावहः प्रोक्तः।**
**स्निग्धस्तादृक् प्राच्यां शस्त्राख्यो डमरमरकाय॥**

**अन्वयः** – तल्लक्षणोऽस्थिकेतुः स तु रुक्षः क्षुद्भयावहः प्रोक्तस्तादृक् शस्त्राख्यः स्निग्धः प्राच्यां डमरमरकाय भवति।

**प्रतिपदार्थः** – अत्र 'तद्' शब्दः वसाकेतुवाचकोऽस्ति / अस्थिकेतुर्नाम / स च रुक्षः = स्नेहरहितः क्षुद्भयावहः = दुर्भिक्षभयावह / प्रोक्तः = कथितः / तादृक् = वसाकेतुसदृशः / स्निग्धः = निर्मलदेहः / शस्त्राख्यः = शस्त्रनामाख्यः , प्राच्यां = पूर्वस्यां दिशि / डमरम् = शस्त्रकलहम् / मरकं = मरणं करोति।

**व्याख्या** – तदित्यनेन वसाकेतोः परामर्शः कृतः। अस्थिकेतुस्वरूपः वसाकेतोः सदृशैर्युक्तो वर्तते। किन्त्वस्थिकेतौ विशेषोऽयं वर्तते। स तु रुक्षो अर्थात् स्नेहरहितो भवति। यदि स अस्थिकेतुः पश्चिमदिशि दृश्यः स्यात्तदा क्षुधाभयः दुर्भिक्षकारकश्च भवति। शस्त्रकेतोः लक्षणमपि तादृशमेव (वसाकेतुसादृश्यम्) वर्तते। अस्य केतोः स्वरुपः स्निग्धः अर्थात् निर्मलदेहयुक्तोऽस्ति। शस्त्रकेतुरयं चेत् प्राच्यां दिशि दृष्टो भवेत् तदा तत्र शस्त्रकलहं मरणञ्च ददाति। आचार्यपराशरेण निगदितमत्र यत् एते षड्विंशतिरुदयोपरान्तैः फलं सूचयन्ति।

तेषां केतूनां रूपतः फलतः कालातश्च वर्णनमत्र कृतमाचार्येण। तत्र त्रयः भार्गवकेतवः दृश्याः भवन्ति। प्रत्येकैकशो वसास्थिशस्त्रकेतवः सन्ति। अत्र वसाकेतुः सिनग्ध, महान् सौम्यदिशि दीर्घशिखश्च (आयतः), त्रिंशद्वर्षशतं प्रोष्य संप्लवनामाख्ये युगे पश्चिमदिश्युदयः स्यात्तदा तत्र शीघ्रः मरणफलः सुभिक्षकारकश्च भवति। आचार्यपराशरेणापि शस्त्रकेतोः स्वरुपः स्नेहरहितः कथितः स्वरचितसंहितायाम्।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



## १७.१७ कपालकेतोः लक्षणम्

यस्य कपालसदृशाकारो वर्तते स एव कपालकेतु इति कथ्यते। अयं कपालकेतुः आकाशे प्रकाशवत् दृश्यते। तस्य लक्षणमत्र प्रतिपादितमाचार्येण।

**मूलपाठः –**

**दृश्योऽमावास्यायां कपालकेतुः सधूम्ररश्मिशिखः।**
**प्राङ्नभसोऽर्द्धविचारी क्षुन्मरकावृष्टिरोगकरः॥**

**अन्वयः** – अयं कपालकेतुरमावास्यायां दृश्यः सधूम्ररश्मिशिखः प्राङ्नभसोऽर्द्धविचारी क्षन्मरकावृष्टिरोगकरो भवति।

**प्रतिपदार्थः** – कपालकेतुः = कपालसदृशकारो यस्य सः कपालकेतुः / अमावास्याम् = कृष्णपञ्चदश्यां तिथौ / दृश्यः = उदयः / धूम्रेण सह सधूम्ररश्मिशिखः = किरणकान्तिर्धूम्रवर्णः / प्राङ् = पूर्वस्यां दिशि / नभसः = गगनस्य / अर्द्धविचारी = अर्धभागे / विचरति = गच्छति / स च क्षुन्मरकावृष्टिरोगकरः / क्षुद्र = दूर्भिक्षम् / मरकम् = जनक्षयम् / अवृष्टिः = अनावृष्टिः / रोगकरः = रोगदायकः।

**व्याख्या** – अस्य कपालकेतोः स्वरुपः किरणकान्तिर्धूमवर्णयुक्तोऽस्ति। कपालकेतुरयं कृष्णपक्ष पञ्चदश्यां तिथौ पूर्वस्यां दिशि दृश्यते। आकाशस्यार्द्धभागे सः कपाल केतुः भ्रमणं करोति। तस्य केतोः फलमत्र प्रतिपादितमाचार्येण। यदि आकाशे भ्रमणं कुर्वन् केतुरयं दृश्यः स्यात् तर्हि तस्य क्षुन्मरकावृष्टिरोगकरा एते फलाः भवन्ति। आचार्यपराशरमहोदयेन अस्य लक्षणं लिखितमिति। यथा –

"अथ आदित्यजानां कपालकेतुरुदयतेऽमावस्यायां पूर्वस्यां दिशि सधूमार्चिशिखो नभसोऽर्द्धचरः दृश्यते। पञ्चविंशवर्षशतं प्रोष्य त्रींश्च पक्षानमृतजस्य कुमुदकेतोश्चारान्ते स दृष्ट एव दूर्भिक्षनावृष्टिव्याधिभयमरणोपद्रवान् सृजति। जगति यावतो दिवसान् दृश्यते तान् मासान् मासैर्वत्सरान् पञ्चप्रस्थं च शारदधान्यार्धं कृत्वा प्रजानामपयुङक्ते।" अत्र पञ्चविंशवर्षशतं त्रींश्च पक्षान् प्रोष्य अमृतपुत्रस्य कुमुदकेतोश्चारस्य अनन्तरं स दृश्यो भवेत्तदा दूर्भिक्षनावृष्टि व्याधिभयमरणोपद्रवान् सृजति।

## १७.१८ रौद्रकेतोः लक्षणम्

रुद्रकोपसदृशः यस्याकारः स एव रौद्रकेतुः वर्तते। केतुरयमपि प्रकाशसदृशो विद्यतेऽऽकाशे। तस्य लक्षणमत्र प्रतिपादतमाचार्येण।

**मूलपाठः –**

**प्राग्वैश्वानरमार्गे शूलाग्रः श्यावरुक्षताम्रार्चिः।**
**नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः॥**

**अन्वयः** – रौद्रः प्राग्वैश्वानरमार्गे शूलाग्रः श्यावरुक्षताम्रार्चिः नभसस्त्रिभागगामी कपालतुल्यफल इति।

**प्रतिपदार्थः** – रौद्रः = रौद्रकेतु इति नामाख्यः / प्राग् = पूर्वस्यां दिशि / वैश्वानरमार्गे = दहनवीथ्याम् / शूलाग्रः = शूलाकृतिरग्रः यस्य केतोः स एव शूलाग्रः / श्यावः = श्यामलवर्णः / रुक्षः = स्नेहरहितः / ताम्रः = ताम्रसदृशः / अर्चिः = तेजः / नभसः = आकाशस्य / त्रिभागगामी = त्रिभागगमनशीलः / कपालतुल्यफलः = कपालकेतोः समानफल इति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्याख्या** – अत्र रौद्रनामकेतुः यो वर्तते सः पूर्वस्यां दिशि दहनवीथ्यां दृश्यो भवति। अस्याभिप्रायोऽयं वर्तते यत् पूर्वाषाढोत्तराषाढनक्षत्रयोः समीपे यः मार्गः स एव वैश्वानरमार्गोऽस्ति। तस्मिन् मार्गे रौद्रकेतुः दृश्यो भवति।

आकाशे कस्य प्रकारस्येति? शूलाग्रः अर्थात् रौद्रकेतोरग्रभागः शूलसदृशो वर्तते। अत्र रौद्रकेतुरयं त्रिशिखयुक्तः, स्नेहरहितः, श्यामलवर्णः, ताम्रकिरणसदृशश्च दृश्यते। गगनमण्डलस्यास्य त्रिषु भागेषु रौद्रकेतुरयं सञ्चरणं करोति। अस्य फलं कपालकेतोः सादृश्यमेव भवति।

पराशरोक्तं यथा –

"अथ दक्षयज्ञरुद्रकोधोद्भवः कलिकेतुस्त्रीणि वर्षशतानि नव च मासान् प्रोष्योदयते पूर्वेण वैश्वानरमार्गे ह्यमृतजस्य मणिकेतोश्चारान्ते श्यावरुक्षताम्राराणां शूलाकारसदृशीं शिखां कृत्वा नभसस्त्रिभागचारी च शस्त्रभयरोगदुर्भिक्षाऽनावृष्टिमरकैः यावन्मासान् दृश्यते तावद्वर्षाणि त्रिभागशेषां प्रजां कृत्वार्धं च शारदाधान्यमाढकमस्तं व्रजति।"

अत्र पराशराचार्यः कथितवान् यत् दक्षप्रजापतेः यज्ञे भगवत्रुद्रकोपाद् जातः कलिकेतुस्त्रीणि शतवर्षाणि नव च मासान् प्रोष्योदयते। अयं केतुः पूर्वस्यां दिशि वैश्वानरमार्गे एव दृश्यो भवति। अस्य मणिकेतोः गमनस्यान्ते श्यामलरुक्षताम्रारुणां शूलाकृतिसदृशीं शिखां कृत्वा गगनस्य त्रिभागचारी स शस्त्रभयरोगदुर्भिक्षाऽनावृष्टिमरकैः यावन्मासान् दृश्यते तावद्वर्षाणि त्रिभागशेषां प्रजां कृत्वार्धं च शत्कालीनधान्यं आढ्कमस्तं व्रजति।

**बोधप्रश्नाः**

२४. वसाकेतुः कस्यां दिशि दृश्यः भवति?

२५. वसाकेतोः फलं किमिति?

२६. वसाकेतोः आकारः कीदृशः?

२७. कपालकेतुः कस्यां तिथौ दृश्यो भवति?

२८. कपालकेतुः आकाशस्य कस्मिन् भागे विचरणं करोति?

२९. "वैश्वानर" इति पदस्यार्थः कः?

## १७.१९ सारांशः

पाठेऽस्मिन् मूख्यरूपेण केतुचाराध्यायस्य शुक्रपुत्रकेत्वादीनां लक्षणानि यथा क्रमेण प्रतिपादितानि सन्ति। शुक्रपुत्रकेतोः स्वरूपं श्वेतवर्णयुक्तं निर्मलदेहश्च वर्तते। सः पूर्वोत्तरयोः मध्ये दृश्यो भवति। तस्य फलमनिष्टमिति। शनैः शनैश्चरतीति शनैश्चरः। अस्य गगनेऽस्मिन् तेजोमयरूपं विद्यमानमस्ति। अस्य केतोः सप्ततारकाः सन्ति। आकाशे यदि दृश्यतेऽयं केतुस्तस्य फलमनिष्टप्रदमिति। बृहस्पतेः पर्यायः गुरुरपि वर्तते। अस्य केतोः देहः निर्मलः वर्तते। तस्य निवासस्थानं दक्षिणदिशि वर्तते। अयं केतुः गगनमण्डले एकतारारूपे विद्यते। बुधपुत्रकेतोः स्वरूपमतिस्पष्टं न दृश्यते। अयं केतुः अरुन्धतीनक्षत्रस्य सादृश्यः दृश्यते। अत्र गर्गमहोदयेन स्पष्टं विहितं स्वरचितसंहितायां यत् मङ्गलपुत्रकेतोः रक्तवर्णः वर्तते। अस्य अग्नेः सदृशक्रान्तिरस्ति। अस्य केतोः तिस्रः शिखाः विराजन्ते। अयं केतुः सौम्यदिशि दृश्यते तस्य फलं अनिष्टदायकमिति। सः केतु राज्ञां कृते युद्धकारको भवति। राहुपुत्रकेतवः तामसकीलका इति नाम्नाः प्रसिद्धाः सन्ति। ते केतवः रविमण्डले चन्द्रमण्डले च दृश्यन्ते। सूर्यचन्द्रमसोर्ग्रहणकाले ते केतवः दृश्यन्ते (तेषां केतूनां फलं शुभाशुभं भवति)। अग्निपुत्रकेतुः



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

केतुचारः (शुक्रपुत्रकेतोः आरभ्य रौद्रकेतुलक्षणं यावत्)

प्रकाशसदृशो वर्तते तेषां अग्निपुत्रकेतूनां स्थितयः अग्नेः सदृशाः सन्ति। यदि अग्निपुत्रकेतवः दृश्याः स्युस्तेषां फलाः घोरानलाभदायकाः प्रोक्ताः आचार्यैः। अस्मिन् पाठे वायुपुत्रकेत्वादीनां लक्षणं यथा क्रमेण प्रतिपादितम्। पाठस्यास्य सारांशोऽयंमेव वर्तते।

## मूलपाठः

सौम्यैशान्योरुदयं शुक्रसुता यान्ति चतुरशीत्याख्याः ।
विपुलसिततारकास्ते स्निग्धाश्च भवन्ति तीव्रफलाः ॥

स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः।
अतिकष्टफला दृश्याः सर्वत्रेते कनकसंज्ञाः॥

विकचा नाम गुरुसुताः सितैकताराः शिखापरित्यक्ताः।
षष्टिः पञ्चभिरधिकाः स्निग्धा याम्याश्रिताः पापाः॥

नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः।
बुधजास्तस्करसंज्ञाः पापफलस्त्वेकपञ्चाशत्॥

क्षतजानलानुरुपास्त्रिचूलताराः कुजात्मजाः षष्टिः।
नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पापाः॥

त्रिंशत्यधिका राहोस्ते तामसकीलका इति ख्याताः।
रविशशिगा दृश्यन्ते तेषां फलमर्कचारोक्तम्॥

विंशत्याधिकमन्यच्छतमग्ने र्विश्वरूपसंज्ञानाम् ।
तीव्रानलभयदानां ज्वालामालाकुलतनूनाम् ॥

श्यामारूणा वितराश्चामररूपा विकीर्णदीधितयः ।
अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः ॥

तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ ।
द्वे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः ॥

कङ्का नाम वरुणजा द्वात्रिंशद्वंशगुल्मसंस्थानाम्।
शशिवत्प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः॥

षण्णवतिः कालसुताः कबन्धसंज्ञाः कबन्धसंस्थानाः।
पुण्ड्राभयप्रदाः स्युर्विरुपताराश्च ते शिखिनः॥

शुक्लविपुलैकतारा नव विदिशां केतवः समुत्पन्नाः।
एवं केतुसहस्रं विशेषमेषामतो वक्ष्ये॥

उदगायतो महान् स्निग्धमूर्तिरपरोदयी वसाकेतुः ।
सद्यः करोति मरकं सुभिक्षमप्युत्तमं कुरुते ॥

तल्लक्षणोऽस्थिकेतुः स तु रुक्षः क्षुद्भयावहः प्रोक्तः।
स्निग्धस्तादृक् प्राच्यां शस्त्राख्यो डमरमकरकाय॥

दृश्योऽमावास्यायां कपालकेतुः सधूम्ररश्मिशिखः ।
प्राङ्नभसोऽर्द्धविचारी क्षुन्मरकावृष्टिरोगकरः ॥



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



प्राग्वैश्वानरमार्गे शूलाग्रः श्यावरुक्षताम्रार्चिः ।
नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः ॥

## १७.२० शब्दावली

| | | | |
|---|---|---|---|
| १. | सौम्यः | = | उत्तरदिशि। |
| २. | ईशान्यः | = | ईशानकोणः। |
| ३. | अशीतिः | = | ८० केतवः। |
| ४. | तीव्रफलः | = | अनिष्टफलः। |
| ५. | विपुलः | = | विस्तृतः। |
| ६. | प्रभासमेता | = | प्रकाशसहिता। |
| ७. | याम्यः | = | दक्षिणदिक्। |
| ८. | सितः | = | श्वेतः। |
| ९. | पापः | = | अनिष्टः। |
| १०. | एकपञ्चाशत् | = | ५१ केतवः। |
| ११. | सूक्ष्माः | = | अल्पदेहाः। |
| १२. | क्षतजः | = | रक्तवर्णः। |
| १३. | अनलसदृशः | = | अग्निसदृशः। |
| १४. | त्रिचूलः | = | त्रिशिखा। |
| १५. | अर्कचारः | = | आदित्यचारः। |
| १६. | अनलभयम् | = | अग्निभयम्। |
| १७. | श्यामवर्णः | = | कृष्णवर्णः। |
| १८. | अरुणः | = | रक्तवर्णः। |
| १९. | चामररुपाः | = | बालव्यजनाकृतयः। |
| २०. | विताराः | = | तारकरहिताः। |
| २१. | परुषाः | = | रुक्षाः। |
| २२. | चतुरस्रः | = | चतुष्कोणः। |
| २३. | वरुणजाः | = | वरुणपुत्राः। |
| २४. | गुल्मः | = | एकमूलजः। |
| २५. | शशिवत् | = | शशिसदृशः। |
| २६. | षण्णवति | = | ९६ केतवः। |
| २७. | कबन्धः | = | छिन्नशिरः। |



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

| | | | | |
|---|---|---|---|---|
| २८. | पुण्ड्राः | = | जनपदाः। | केतुचारः (शुक्रपुत्रकेतोः आरभ्य रौद्रकेतुलक्षणं यावत्) |
| २९. | विदिशाम् | = | दिगन्तरालानाम्। | |
| ३०. | अमावस्याम् | = | अमावस्यातिथौ(सूर्याचन्द्रमसोर्युतिःदर्शकालः)। | |
| ३१. | प्राक् | = | पूर्वदिशि। | |
| ३२. | वैश्वानरः | = | दहनवीथी। | |
| ३३. | अर्चिः | = | तेजसः। | |
| ३४. | नभसः | = | आकाशस्य। | |
| ३५. | श्यावः | = | श्यामलः। | |
| ३६. | ताम्रः | = | ताम्रसदृशः। | |

## १७.२१ सन्दर्भग्रन्थाः

१. **बृहत्संहिता**, आचार्यवराहमिहिरः।

## १७.२२ सहायकग्रन्थाः

१. **बृहत्संहिता**, हिन्दीव्याख्याकरः आचार्यनागेन्द्रपाण्डेयः, (सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी)।

२. **बृहत्संहिता**, व्याख्याकारः, डॉ. सुरेशचन्द्रमिश्रः, रंजन पब्लिकेशन्स १६ अंसारी रोड, दरियागंज, नयी दिल्ली - ११००२।

३. **बृहत्संहिता**, व्याख्याकारः - पं. श्री अच्युदानन्दझा, चौखम्भांसंस्कृतप्रतिष्ठान, वाराणसी।

४. **ज्योतिर्विज्ञानशब्दकोषः**, डॉ. सुरकान्तझा, चौखम्भा कृष्णदास अकादमी, वाराणसी।

## १७.२३ बोधप्रश्नोत्तराणि

१. चतुरशीत्यख्याः ८४ केतवः।

२. उत्तरदिशि ईशानकोणे च।

३. षष्टिः / ६०।

४. अनिष्टकारकः।

५. पञ्चषष्टिः / ६५।

६. श्वेतवर्णः।

७. षष्टिः / ६०।

८. अनिष्टफलम्।

९. त्रयत्रिंशत् (३३)।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



१०. सूर्याचन्द्रमसोर्मण्डले।

११. विंशत्याधिकं शतम् (१२०)।

१२. अग्निः।

१३. सप्तसप्ततिः (७७)।

१४. चामररुपाः।

१५. २०४ केतवः।

१६. चतुरस्राकृति।

१७. पापफलदायकः।

१८. ३२ केतवः।

१९. कङ्कः।

२०. अनिष्टः।

२१. ९६ केतवः।

२२. शीर्षछिन्नः (शिरविहीनः)।

२३. ९ केतवः।

२४. पश्चिमदिशि।

२५. मरणम् सुभिक्षञ्च।

२६. दीर्घः।

२७. अमावस्याम्।

२८. अर्द्धभागे।

२९. दहनवीथि (अग्निमार्गः)।

## १७.२४ अभ्यासप्रश्नाः

१. शुक्रपुत्रकेतोः स्वरूपं विलेखनीम्।

२. बुधपुत्रकेतोः कीदृशं स्वरूपमिति लिखत।

३. यदि राहुपुत्रकेतुः दृश्यः स्यात्तर्हि तस्य किं फलमिति लेखनीयम्।

४. कालपुत्रकेतोः लक्षणं प्रतिपादनीयम् ।

५. वसाकेतोः फलं लिखत।

६. कपालकेतोः लक्षणं लेखनीयम्।

—•—



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



# अष्टादशः पाठः – केतुचाराध्यायः (चलकेतोरारभ्य उल्काताडितकेतुं यावत्)

पाठसंरचना

१८.१ प्रस्तावना
१८.२ उद्देश्यम्
१८.३ चलकेतोः लक्षणं तत्फलञ्च
१८.४ श्वेतकेतोः लक्षणं तत्फलञ्च
१८.५ रश्मिकेतोः लक्षणं तत्फलञ्च
बोधप्रश्नाः
१८.६ ध्रुवकेतोः लक्षणं तत्फलञ्च
१८.७ कुमुदकेतोः लक्षणं तत्फलञ्च
१८.८ मणिकेतोः लक्षणं तत्फलञ्च
१८.९ जलकेतोः लक्षणं तत्फलञ्च
बोधप्रश्नाः
१८.१० भवकेतोः लक्षणं तत्फलञ्च
१८.११ पद्मकेतोः लक्षणं तत्फलञ्च
१८.१२ आवर्तकेतोः लक्षणं तत्फलञ्च
१८.१३ संवर्तकेतोः लक्षणं तत्फलञ्च
बोधप्रश्नाः
१८.१४ नक्षत्रस्पर्शात् फलम्
१८.१५ अश्विन्याद्रोहिणीं यावत् नक्षत्रेषु स्पर्शफलम्
१८.१६ मृगशिरसः पुष्यं यावत् नक्षत्रेषु स्पर्शफलम्
१८.१७ आश्लेषायाः हस्तं यावत् नक्षत्रेषु स्पर्शफलम्
१८.१८ चित्रास्वात्योः स्पर्शफलम्
१८.१९ विशाखानुराधाज्येष्ठानक्षत्रेषु केतुस्पर्शफलम्
१८.२० मूलपूर्वाषाढोत्तराषाढानक्षत्रेषु केतुस्पर्शफलम्
१८.२१ श्रवणादिषट्सु केतुस्पर्शफलम्
१८.२२ उल्काताडितकेतोः फलम्
बोधप्रश्नाः
१८.२३ सारांशः
१८.२४ शब्दावली
१८.२५ सन्दर्भग्रन्थः
१८.२६ सहायकग्रन्थाः
१८.२७ बोधप्रश्नोत्तराणि
१८.२९ अभ्यासप्रश्नाः

## १८.१ प्रस्तावना

बृहत्संहितायाः केतुचाराध्यायस्य सप्तमे पाठे भवतः स्वागतं वर्तते। षष्ठे पाठे शुक्रपुत्रकेतुलक्षणम्, शनैश्चरपुत्रकेतुलक्षणम्, बृहस्पतिपुत्रकेतुलक्षणं बुधकेतोर्लक्षणञ्च ज्ञातवानेव। मङ्गलपुत्रकेतोर्लक्षणम्, वायुपुत्रकेतुलक्षणम्, कालपुत्रकेतुलक्षणम्, वसाकेतोर्लक्षणम्, रौद्रकेतोर्लक्षणम् कपालकेतोर्लक्षणञ्चापि अधीतवान् भवान्। इदानीम् चलकेतोर्लक्षणं तत्फलञ्च, श्वेतकेतोर्लक्षणम्, तत्फलञ्च रश्मिकेतोर्लक्षणं तत्फलञ्च, ध्रुवकेतोर्लक्षणं तत्फलञ्च, कुमुदकेतोर्लक्षणं तत्फलञ्च,



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



मणिकेतोर्लक्षणं तत्फलञ्च, जलकेतोर्लक्षणं तत्फलञ्च पठिष्यति। अनेन प्रकारेण भवकेतुलक्षणं तत्फलञ्च, पद्मकेतुलक्षणं तत्फलञ्च, आवर्तकेतोर्लक्षणं तत्फलञ्च, संवर्तकेतोर्लक्षणं तत्फलञ्चापि ज्ञास्यति भवान्। अन्ते च नक्षत्रस्पर्शात् फलम्, अश्विन्याद्रोहिणीं यावत् नक्षत्रेषु स्पर्शफलम्, मृगशिरसः पुष्यं यावत् नक्षत्रेषु स्पर्शफलम्, आश्लेषायाः हस्तं यावत् नक्षत्रेषु स्पर्शफलम्, चित्रास्वात्योः स्पर्शफलम्, विशाखानुराधाज्येष्ठानक्षत्रेषु केतुस्पर्शफलम्, मूलपूर्वाषाढोत्तराषाढनक्षत्रेषु केतुस्पर्शफलम्, श्रवणादिषट्सु केतुस्पर्शफलञ्चेत्यस्य भवान् अध्ययनम् करिष्यति। आकाशे स्थितप्रकाशपुञ्जकेतवः उल्कयाचेत् तडिताः स्युः तदा तस्याः तडितकेतोः फलमत्र प्रतिपादितमिति। तडितकेतोः फलम् भवान् पठिष्यति। अतोऽत्र उपर्युक्तान् विषयान् भवान् ध्यानेन पठतु।

## १८.२ उद्देश्यम्

अस्य पाठस्य अध्ययनेन भवान् –

- चलकेतोर्लक्षणं श्वेतकेतोर्लक्षणञ्च ज्ञास्यति।
- रश्मि-ध्रुव-कुमुदकेतूनां लक्षणं तत्फलञ्च ज्ञास्यति।
- मणि-जल-भव-पद्मकेतूनां लक्षणं ज्ञास्यति।
- आवर्तसंवर्तकेत्वोः लक्षणं ज्ञास्यति।
- केतुनक्षत्रस्पर्शफलं ज्ञास्यति।
- उल्काताडितकेतोः फलं ज्ञास्यति।

## १८.३ चलकेतोः लक्षणं तत्फलञ्च

यः केतुः स्थिरो न वर्तते स एव चलकेतुरस्ति। अयं चलकेतुः आकाशे सदैव सञ्चरति। अस्य केतोर्लक्षणं वराहमिहिरेण प्रतिपादितमत्रेति।

**मूलपाठः –**

**अपरस्यां चलकेतुः शिखया याम्याग्रयाङ्गुलोच्छ्रितया।**
**गच्छेद्यथा यथोदक तथा तथा दैर्घ्यमायाति॥**

**अन्वयः –** (अयम्) चलकेतुरपरस्यां याम्याग्रयाङ्गुलोच्छ्रितया शिखा = (चूडा) या यथोदक् गच्छेत् तथा तथा दैर्घ्यमायाति।

**प्रतिपदार्थः –** चलकेतुः = अस्थिरकेतुः। अपरस्याम् = पश्चिमायां दिशि। याम्याग्रा = दक्षिणाग्रा। अङ्गुलम् = अङ्गुलप्रमाणम्। उच्छ्रिता = उच्चा। यथा = येन प्रकारेण। उदक् = उत्तरदिशि। गच्छेत् = भवेत्। तथा-तथा = तेन प्रकारेण। दैर्घ्यम् = विस्तृतम्। शिखा = चूडा। आयाति = प्राप्नोति।

**मूलपाठः –**

**सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव च प्रतिनिवृत्तः।**
**नभसोऽर्द्धमात्रमित्वा याम्येनाऽस्तं समुपयाति॥**

**अन्वयः –** सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव च प्रतिनिवृत्तः नभसोऽर्द्धमात्रमित्वा याम्येनाऽस्तं समुपयाति।



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**प्रतिपदार्थः** – सप्तमुनीन् = वसिष्ठादिमुनीन्। संस्पृश्य = संस्पृश्य यः करोति स संस्पृश्य इति (चलकेतुः)। ध्रुवम् = ध्रुवतारकम्। अभिजितञ्च = अभिजितनक्षत्रम्। प्रतिनिवृत्तः = प्रत्यागतः। नभसः = गगनस्य। अर्द्धमात्रम् = अर्द्धभागम्। इत्वा = गत्वा। याम्येन = दक्षिणेन। अस्तम् = अदर्शनम्। समुपयाति = गच्छति।

**मूलपाठः –**

**हन्यात् प्रयागकूलाद्यावदवन्तीं च पुष्करारण्यम्।**
**उदगपि च देविकामपि भूयिष्ठं मध्यदेशाख्यम्॥**

**अन्वयः** – अयं चलकेतुः प्रयागकूलाद्यावदवन्तीं च पुष्करारण्यं हन्याद्। उदगपि च देविकामपि हननं (करोति)। मध्यदेशाख्यं भूयिष्ठमिति।

**प्रतिपदार्थः** – स = चलकेतुः। प्रयागकूलाद् = प्रयागस्थानात्। अवन्तीम् = उज्जयिनीम्। च पुष्करारण्यम् = पुष्करारण्यस्थानम्। उदगपि = उत्तरस्यामपि। देविकाम् = देविकानदीं यावदपि। हन्यात् = विनाशयति।

**मूलपाठः –**

**अन्यानपि च स देशान् क्वचिद् हन्ति रोगदुर्भिक्षैः।**
**दशमासान् फलपाकोऽस्य कैश्चिदष्टदश प्रोक्तः॥**

**अन्वयः** – सः अन्यानपि च देशान् रोगदुर्भिक्षैः क्वचिद् हन्ति। अस्य फलपाकः दशमासान् कैश्चिदष्टादशप्रोक्तः।

**प्रतिपदार्थः** – सः = चलकेतुः। अन्यान् = अपरान् देशानपि च। रोगः = रोगप्रदः। दुर्भिक्षैः = अशुभैः। क्वचिद् = कुत्रचिद्। हन्ति = विनाशयति। अस्य = चलकेतोः। फलपाककालः, दशमासान् = दशमासानाम्। कैश्चित् = गर्गादिभिः। अष्टादशः = अष्टादशमासः। प्रोक्तः = कथितः।

**व्याख्याः** – अयं चलकेतुः पश्चिमायां दिशि दृश्यो भवति। अस्य केतोः शिखायाः अग्रभागः दक्षिणदिशि भवेत् तथा अङ्गुलप्रमाणमुच्चं स्यात्। सः केतुः यथा यथा उत्तरस्यां दिशि गच्छति तथा तथा दीर्घतां प्राप्नोति। यदि चलकेतुः सप्तर्षीणां स्पर्शं कुर्वन् ध्रुवनक्षत्रेण तथा अभिजितनक्षत्रेण प्रत्यावर्तितं भूत्वा गगनस्यार्द्धभागे गत्वा दक्षिणस्यां दिशि अस्तं भवति तदा प्रयागतटतः अवन्तिक्षेत्रं यावत् पुष्करारण्यं चोत्तरस्यां दिशि देविकापर्यन्तं तथा मध्यप्रदेशस्यात्यधिकं हानिं करोति। अन्येषां देशानामपि रोगप्रदं तथा दुर्भिक्ष-द्वारा किञ्चिद् कष्टं प्रददाति। अस्य केतोः फलपाकस्य कालः दशमासानां भवति। केचिदाचार्याश्चाष्टदशमासानां कालः कथयन्ति।

तथा च पराशरः-

**अथ पैतामहश्चलकेतुः पञ्चदशवर्षशतं प्रोष्योदितः पश्चिमे- नाङ्गुलिपर्वमात्रां शिखां दक्षिणाभिगतां कृत्वा जलकेतोश्चारान्ते नभसस्त्रिभागमनुचरन् यथा यथा चोत्तरेण व्रजति तथा शूलाग्राकारां शिखां दर्शयन् ब्रह्मनक्षत्रमुपसृत्य मनाग् ध्रुवं ब्रह्मराशिं सप्तर्षीन् स्पृशन् नभसोऽर्द्धमात्रं दक्षिणमनुक्रम्यास्तं व्रजति। स स्वर्गे दारुणकर्मा। स्वर्गप्राप्तत्वादेव च कृत्स्नमभिहिनस्ति लोकम्। अपि च भूमिं कम्पयित्वा दशमासान्मध्यदेशे भूयिष्ठं जनपदपनवशेषं कुरुते। तेष्वपि क्वचित् क्वचिच्छस्त्रदुर्भिक्षव्याधिमरकभयैः क्लिश्नात्यष्टादशमासानिति।**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अत्र चलकेतोः पूर्वं पितामहशब्दस्य प्रयोगः कृतो वर्तते। अर्थात् पितामहेन उत्पन्नः यः सः पितामहचलकेतुः संजात इति। अयं पितामहचलकेतुः पञ्चदशवर्ष प्रोष्योदितः पश्चिमदिशि भवति। सः केतुः द्युलोके (स्वर्गे) गत्वा समस्तलोकानां संहरति।

तथा च गर्गः –

**क्षुच्छस्त्रमरकव्याधिभयैः सम्पीड्येत् प्रजाः।**
**मासान् दश तथाष्टौ च चलकेतुः सुदारुणः॥**

## १८.४ श्वेतकेतोः लक्षणं तत्फलञ्च

यः केतुः श्वेतसदृशो वर्तते सः श्वेतकेतु इति पदेनोच्यते। तस्य लक्षणं तत्फलञ्च प्रतिपादितमत्र वराहमिहिरेण।

**मूलपाठः –**

**प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च।**
**क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ॥**

**स्निग्धौ सुभिक्षशिवदावथाधिकं दृश्यते कनामा यः।**
**दश वर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतम्॥**

**अन्वयः** – श्वेतकेतुः याम्याग्रः अर्द्धरात्रौ प्राग्दिशि दृश्यः (भवति)। क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ (भवतः)। तौ केतू स्निग्धौ सुभिक्षशिवदौ भवतः। यः कनामा केतुः स च यदि सप्तेभ्यो दिनेभ्योऽधिकं दृश्यते तदा दशवर्षाण्युपतापं शस्त्रप्रकोपकृतं जनयति।

**प्रतिपदार्थः** – श्वेतकेतुर्नाम केतुः। याम्याग्रः = दक्षिणदिक्शिखः। अर्द्धरात्रौ = रात्र्यर्द्धकाले। प्राक्दिशि = पूर्वस्यां दिशि। दृश्यः = विलोक्यः। क = क इति नामा केतुः। युगस्य आकृतिः युगाकृतिः। अपरे = पश्चिमायां दिशि। युगपत्तौ = एककाले तुल्यकाले वा। सप्तदिवसाः = सप्तदिनानि। दृश्यौ = तौ केतू दृश्येते। स्निग्धौ = अतिनिर्मलौ। सुभिक्षम् = सुवृष्ट्यादिजन्यकालः। शिवम् = श्रेयः कल्याणं वा। दशवर्षाणि = दशवर्षाणाम्। उपतापम् = उपद्रवम्। शस्त्रकोपकृतम् = संग्रामजमुपतापमुद्रवम्। जनयति = उत्पादयति।

**व्याख्याः** – अयं श्वेतकेतुः अर्द्धरात्रिकाले पूर्वस्यां दिशि दृश्यो भवति। सः केतुः दक्षिणस्यां दिशि शिखायुक्तः अपरश्च कनामककेतुः पश्चिमदिशि दृश्यते। इमौ केतूः एकस्मिन् एव काले तुल्यकाले वा सप्तदिनं यावत् दृश्येते। तौ केतू आकाशेऽतिनिर्मलौ दृश्यौ भवतस्तयोः फलं सुभिक्षं कल्याणञ्च भवतः। एतौ केतू सप्तदिनं यावत् दृश्यौ भवेताम् तदा तत्र दशवर्षपर्यन्तं युद्धवशात् शस्त्रप्रकोपमुत्पादयतः। तथा च पराशरः –

**अथौद्दालकः श्वेतकेतुर्दशोत्तरं वर्षशतं प्रोष्य भटकेतोश्चारान्ते पूर्वस्यां दिशि दक्षिणाभिनतशिखोऽर्द्धरात्रकाले दृश्यः। तेनैव सह द्वितीयः कः प्रजापतिपुत्रः पश्चिमेन ग्रहकेतोर्यूपसंस्थायी युगपद दृश्यते। तावुभौ सप्तरात्रदृश्यौ दशवर्षाणि प्रजाः पीड्यन्ते। कः प्रजापतिपुत्रो यद्यधिकं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं कुर्यात्तथैव स्नेहवर्णयुक्तौ क्षेमारोग्यसुभिक्षदौ भवतः।**

आचार्यपराशरेणोक्तं यत् उद्दालकेन समुद्भूतकेतुः दशोत्तरं वर्षशतं प्रोष्य भटकेतोः सञ्चरणस्य पूर्वस्यां दिशि याम्यं प्रति नतशिखयुक्तोऽर्द्धरात्रिकाले दृश्यो भवति। तेन सहैवापरः कसंज्ञककेतुः यो प्रजापतिपुत्रोऽस्ति, पश्चिमस्यां दिशि ग्रहकेतुपार्श्वे स्थितः तुल्यकाले



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



दृश्यते। इमौ केतौ सप्तरात्रिं यावत् दृश्यौ भवेताम् तदा दशवर्षाणि प्रजाः पीड्यन्ते। प्रजापतिपुत्र(क)केतुश्चेदधिककालं दृश्यते तदा दारुणतरेण जनानां शस्त्रकोपं भवति।

**मूलपाठः –**

**श्वेत इति जटाकारो रुक्षः श्यावो वियत्रिभागगतः।**
**विनिवर्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते ॥**

**अन्वयः** – श्वेत इति जटाकारो रुक्षः श्यावो वियत्तिभागतोऽपसव्यं विनिवर्तते। प्रजाः त्रिभागशेषाः कुरुते।

**प्रतिपदार्थः** – श्वेतनामा केतुर्जटाकारो जटासदृशः। रुक्षः = परुषः। श्यावः = कृष्णवर्णः। वियत् = आकाशः। त्रिभागगतः = तृतीयांश गमनशीलः। अपसव्यम् = अप्रदक्षिणम् अर्थात् गमनशीलः वामभागे। विनिवर्तते = विनिवृत्तिं करोति। त्रिभागः = तृतीयांशः। शेषाः = अवशेषाः। प्रजां = जनाः। कुरुते = प्रकुरुते।

**व्याख्याः** – अत्र श्वेतकेतुः जटासदृशो वर्तते। अयं केतुः रुक्षसदृशः कृष्णवर्णयुक्तश्च वर्तते। एषः केतुः गगनस्थतृतीयभागं यावत् गच्छति, पुनः अपसव्यं अर्थात् वामभागेन परावर्तितं भवति। तदा प्रजानां तृतीयांशावशेषाः तिष्ठन्ति अर्थात् द्वयोः भागयोः विनाशं करोत्ययं केतुः। तथा च पराशरः –

**अथ काश्यपः श्वेतकेतुः पञ्चदशवर्षशतं प्रोष्यैन्द्रांशः सहजस्य पद्मकेतोश्चारान्ते श्यावरुक्षो नभसस्त्रिभागमाक्रम्याग्रसव्यं निवृत्त्योर्ध्वं प्रदक्षिणजटाकारशिखः। स यावन् मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेश आर्यगणानामौदीच्यैश्च भूयिष्ठं बहुशस्त्रिभागशेषां प्रजामवशेषयति।**

## १८.५ रश्मिकेतोः लक्षणं तत्फलञ्च

धूम्रवर्णसदृशः यः केतुः सः रश्मिकेतुः संजातः। अस्य रश्मिकेतोः लक्षणं तत्फलञ्च प्रतिपादितमत्राचार्येण।

**मूलपाठः –**

**आधूम्रया तु शिखया दर्शनमायाति कृत्तिकासंस्थः।**
**ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते॥**

**अन्वयः** – आधूम्रया तु शिखया कृत्तिकासंस्थो दर्शनमायाति स रश्मिकेतुः ज्ञेयः। सः केतुः श्वेतसमानं फलं धत्ते।

**प्रतिपदार्थः** – आधूम्रया = धूमवर्णयुक्त्या। शिखया = चूडया। दर्शनम् = उदितः। आयाति = आगच्छति। कृतिकाः = कृतिकानक्षत्रम्। संस्थः = स्थितः। ज्ञेयः = विज्ञेयः। रश्मिकेतुर्नाम सः श्वेतसमानम् = श्वेतवत्। फलं = केतोः फलम्। धत्ते = ददाति।

**व्याख्याः** – अयं रश्मिकेतुः धूम्रवर्णया शिखया युक्तः तथा कृत्तिकानक्षत्रे स्थितः अर्थात् तस्य नक्षत्रस्य समीपे दृश्यते तदा सः रश्मिकेतुः विज्ञेयः। सः श्वेतकेतोः सदृशं फलं प्रददाति। तथा च पराशरः –

**अथ रश्मिकेतुर्विभावसुजः प्रोष्य वर्षशतमावर्तकेतोश्चारान्ते उदितः कृत्तिकासु धूम्रशिखः श्वेतकेतोः सदृशफलः।**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अत्र चलकेतोः पूर्वं पितामहशब्दस्य प्रयोगः कृतो वर्तते। अर्थात् पितामहेन उत्पन्नः यः सः पितामहचलकेतुः संजात इति। अयं पितामहचलकेतुः पञ्चदशवर्षं प्रोष्योदितः पश्चिमदिशि भवति। सः केतुः द्युलोके (स्वर्गे) गत्वा समस्तलोकानां संहरति।

तथा च गर्गः –

**क्षुच्छस्त्रमरकव्याधिभयैः सम्पीड्येत् प्रजाः।**
**मासान् दश तथाष्टौ च चलकेतुः सुदारुणः॥**

## १८.४ श्वेतकेतोः लक्षणं तत्फलञ्च

यः केतुः श्वेतसदृशो वर्तते सः श्वेतकेतु इति पदेनोच्यते। तस्य लक्षणं तत्फलञ्च प्रतिपादितमत्र वराहमिहिरेण।

**मूलपाठः –**

**प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च।**
**क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ॥**

**स्निग्धौ सुभिक्षशिवदावथाधिकं दृश्यते कनामा यः।**
**दश वर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतम्॥**

**अन्वयः** – श्वेतकेतुः याम्याग्रः अर्द्धरात्रौ प्राग्दिशि दृश्यः (भवति)। क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ (भवतः)। तौ केतू स्निग्धौ सुभिक्षशिवदौ भवतः। यः कनामा केतुः स च यदि सप्तेभ्यो दिनेभ्योऽधिकं दृश्यते तदा दशवर्षाण्युपतापं शस्त्रप्रकोपकृतं जनयति।

**प्रतिपदार्थः** – श्वेतकेतुर्नाम केतुः। याम्याग्रः = दक्षिणदिक्शिखः। अर्द्धरात्रौ = रात्र्यर्द्धकाले। प्राक्दिशि = पूर्वस्यां दिशि। दृश्यः = विलोक्यः। क = क इति नामा केतुः। युगस्य आकृतिः युगाकृतिः। अपरे = पश्चिमायां दिशि। युगपत्तौ = एककाले तुल्यकाले वा। सप्तदिवसाः = सप्तदिनानि। दृश्यौ = तौ केतू दृश्येते। स्निग्धौ = अतिनिर्मलौ। सुभिक्षम् = सुवृष्ट्यादिजन्यकालः। शिवम् = श्रेयः कल्याणं वा। दशवर्षाणि = दशवर्षाणाम्। उपतापम् = उपद्रवम्। शस्त्रकोपकृतम् = संग्रामजमुपतापमुद्रवम्। जनयति = उत्पादयति।

**व्याख्याः** – अयं श्वेतकेतुः अर्द्धरात्रिकाले पूर्वस्यां दिशि दृश्यो भवति। सः केतुः दक्षिणस्यां दिशि शिखायुक्तः अपरश्च कनामकेतुः पश्चिमदिशि दृश्यते। इमौ केतूः एकस्मिन् एव काले तुल्यकाले वा सप्तदिनं यावत् दृश्येते। तौ केतू आकाशेऽतिनिर्मलौ दृश्यौ भवतस्तयोः फलं सुभिक्षं कल्याणञ्च भवतः। एतौ केतू सप्तदिनं यावत् दृश्यौ भवेताम् तदा तत्र दशवर्षपर्यन्तं युद्धवशात् शस्त्रप्रकोपमुत्पादयतः। तथा च पराशरः –

**अथौद्दालकः श्वेतकेतुर्दशोत्तरं वर्षशतं प्रोष्य भटकेतोश्चारान्ते पूर्वस्यां दिशि दक्षिणाभिनतशिखोऽर्द्धरात्रकाले दृश्यः। तेनैव सह द्वितीयः कः प्रजापतिपुत्रः पश्चिमेन ग्रहकेतोर्यूपसंस्थायी युगपद दृश्यते। तावुभौ सप्तरात्रदृश्यौ दशवर्षाणि प्रजाः पीड्यन्ते। कः प्रजापतिपुत्रो यद्यधिकं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं कुर्यात्तथैव स्नेहवर्णयुक्तौ क्षेमारोग्यसुभिक्षदौ भवतः।**

आचार्यपराशरेणोक्तं यत् उद्दालकेन समुद्भूतकेतुः दशोत्तरं वर्षशतं प्रोष्य भटकेतोः सञ्चरणस्य पूर्वस्यां दिशि याम्यं प्रति नतशिखयुक्तोऽर्द्धरात्रिकाले दृश्यो भवति। तेन सहैवापरः कसंज्ञककेतुः यो प्रजापतिपुत्रोऽस्ति, पश्चिमस्यां दिशि ग्रहकेतुपार्श्वे स्थितः तुल्यकाले



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



दृश्यते। इमौ केतौ सप्तरात्रिं यावत् दृश्यौ भवेताम् तदा दशवर्षाणि प्रजाः पीड्यन्ते। प्रजापतिपुत्र(क)केतुश्चेदधिककालं दृश्यते तदा दारुणतरेण जनानां शस्त्रकोपं भवति।

**मूलपाठः –**

**श्वेत इति जटाकारो रुक्षः श्यावो वियत्रिभागगतः।**
**विनिवर्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते ॥**

**अन्वयः** – श्वेत इति जटाकारो रुक्षः श्यावो वियत्तिभागतोऽपसव्यं विनिवर्तते। प्रजाः त्रिभागशेषाः कुरुते।

**प्रतिपदार्थः** – श्वेतनामा केतुर्जटाकारो जटासदृशः। रुक्षः = परुषः। श्यावः = कृष्णवर्णः। वियत् = आकाशः। त्रिभागगतः = तृतीयांश गमनशीलः। अपसव्यम् = अप्रदक्षिणम् अर्थात् गमनशीलः वामभागे। विनिवर्तते = विनिवृत्तिं करोति। त्रिभागः = तृतीयांशः। शेषाः = अवशेषाः। प्रजां = जनाः। कुरुते = प्रकुरुते।

**व्याख्याः** – अत्र श्वेतकेतुः जटासदृशो वर्तते। अयं केतुः रुक्षसदृशः कृष्णवर्णयुक्तश्च वर्तते। एषः केतुः गगनस्थतृतीयभागं यावत् गच्छति, पुनः अपसव्यं अर्थात् वामभागेन परावर्तितं भवति। तदा प्रजानां तृतीयांशावशेषाः तिष्ठन्ति अर्थात् द्वयोः भागयोः विनाशं करोत्ययं केतुः। तथा च पराशरः –

**अथ काश्यपः श्वेतकेतुः पञ्चदशवर्षशतं प्रोष्यैन्द्रांशः सहजस्य पद्मकेतोश्चारान्ते श्यावरुक्षो नभसस्त्रिभागमाक्रम्याग्रसव्यं निवृत्त्योर्ध्वं प्रदक्षिणजटाकारशिखः। स यावन् मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेश आर्यगणानामौदीच्यैश्च भूयिष्ठं बहुशस्त्रिभागशेषां प्रजामवशेषयति।**

## १८.५ रश्मिकेतोः लक्षणं तत्फलञ्च

धूम्रवर्णसदृशः यः केतुः सः रश्मिकेतुः संजातः। अस्य रश्मिकेतोः लक्षणं तत्फलञ्च प्रतिपादितमत्राचार्येण।

**मूलपाठः –**

**आधूम्रया तु शिखया दर्शनमायाति कृत्तिकासंस्थः।**
**ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते॥**

**अन्वयः** – आधूम्रया तु शिखया कृत्तिकासंस्थो दर्शनमायाति स रश्मिकेतुः ज्ञेयः। सः केतुः श्वेतसमानं फलं धत्ते।

**प्रतिपदार्थः** – आधूम्रया = धूमवर्णयुक्त्या। शिखया = चूडया। दर्शनम् = उदितः। आयाति = आगच्छति। कृतिकाः = कृतिकानक्षत्रम्। संस्थः = स्थितः। ज्ञेयः = विज्ञेयः। रश्मिकेतुर्नाम सः श्वेतसमानम् = श्वेतवत्। फलं = केतोः फलम्। धत्ते = ददाति।

**व्याख्याः** – अयं रश्मिकेतुः धूम्रवर्णया शिखया युक्तः तथा कृत्तिकानक्षत्रे स्थितः अर्थात् तस्य नक्षत्रस्य समीपे दृश्यते तदा सः रश्मिकेतुः विज्ञेयः। सः श्वेतकेतोः सदृशं फलं प्रददाति। तथा च पराशरः –

**अथ रश्मिकेतुर्विभावसुजः प्रोष्य वर्षशतमावर्तकेतोश्चारान्ते उदितः कृत्तिकासु धूम्रशिखः श्वेतकेतोः सदृशफलः।**



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान्।**
**प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम्॥**

**अन्वयः** – मणिकेतुः सकृदेकयामदृश्यः सुसूक्ष्मतारोऽपरेण अस्य शिखा ऋज्वी, स्तनोद्गता क्षीरधारेव शुक्ला (भवति)। असौ उदयन्नेवं चतुरो मासान् सार्द्धान् सुभिक्षं करोति। प्रायः च क्षुद्रजन्तूनाम् प्रादुर्भावं करोति।

**प्रतिपदार्थः** – मणिकेतुर्नाम केतुः। सकृत् = एकवारम्। एकयामः = यामशब्देन रात्रिचतुर्भाग उच्यते। दृश्यः = उदितः। सुसूक्ष्मतारकः = अत्यल्पतारकः। अपरः = पश्चिमदिशि। अस्य = केतोः। शिखा = चूडा। ऋज्वी = स्पष्टा (सरला)। स्तनात् = कुचाद्। उद्गता = निस्सृता। क्षीरधारा = दुग्धधारा। शुक्ला = श्वेतवर्णा। असौ = अयम्। उदयन्नेव = उदितमात्रमेव। चतुरः सार्द्धान् मासान् = अर्द्धपञ्चमान् मासान्। सुभिक्षम् = क्षेमम्। करोति = उत्पादयति। प्रायः = बाहुल्येन। नकुलादीनाम् = क्षुद्रजन्तूनाम्। प्रादुर्भावम् = उत्पत्तिम्। करोति = भवति।

**व्याख्याः** – अयं मणिकेतुः पश्चिमस्यां दिशि दृश्यो भवति। सः केतुः सूक्ष्मतारकः अर्थात् लघुतारकोऽस्ति। एषः केतुः गगने एकस्यां रात्रौ एकवारमेव दृश्यो भवति। अत्र याम्यशब्देन रात्रेः चतुर्भागग्रहणं कृतं वर्तते। अस्य केतोः स्पष्टशिखा श्वेतवर्णस्य दृश्यते। इयं शिखा आकाशे स्तनात् निस्सृतो क्षीरधारा यथा दृश्यते तथा तद्वच्छिखा भवति। अयं केतु उदितमात्रे सत्येव चतुरः सार्द्धान् मासान् यावत् सुभिक्षमुत्पादयति। सः प्रायः नकुलादीनां उत्पत्तिं करोति।

तथा च पराशरः –

**मणिकेतुरपि कपालकेतोश्चारावसाने प्रतीच्यामुदयमुपयाति। सूक्ष्मोऽरुन्धतीतारकामात्रः क्षीरप्रसेककान्त्या पूर्वाभिनतया स्निग्धशिखया शर्वर्यामेकयामदृश्यः। स उदयात् प्रभृत्यर्द्धपञ्चमान् मासान् क्षेमसुभिक्षमुत्पादयति। क्षुद्रजन्तूनां प्रादुर्भावं करोति मात्र अतिकालदृष्टः॥**

## १८.९ जलकेतोः लक्षणं तत्फलञ्च

आचार्यवराहमिहिरे जलकेतोर्लक्षणं तत्फलञ्च प्रतिपादितमेवं स्वविरचित बृहत्संहितायाम्।

**मूलपाठः –**

**जलकेतुरपि च पश्चात् स्निग्धः शिखयापरेण चोन्नतया।**
**नवमासान् स सुभिक्षं करोति शान्तिं च लोकस्य॥**

**अन्वयः** – जलकेतुरपि च पश्चात् स्निग्धः शिखयापरेण चोन्नतया (दृश्यः भवति)। स नवमासान् लोकस्य सुभिक्षं शान्तिञ्च करोति।

**प्रतिपदार्थः** – जलकेतु इति। अपि = पूर्ववत्। पश्चात् = पश्चिमस्यां दिशि। स्निग्धः = निर्मलदेहः। शिखया = चूडया। अपरेण = पश्चिमेन। चोन्नतया = चोच्चया। सः = जलकेतुः। नवमासान् = नवमासान् यावत्। लोकस्य = जनपदस्य। सुभिक्षम् = क्षेमम्। शान्तिः = श्रेयः। करोति = प्रददाति।

**व्याख्याः** – जलकेतुरपि पश्चिमस्यां दिशि दृश्यो भवति। सः स्निग्धः अर्थात् श्वेतबिम्बयुक्तोऽस्ति। अयं जलकेतुः पश्चिमाग्रभागे उन्नतया शिखया युक्तो दृश्यते। यदि केतुरयं पश्चिमस्यां दिशि दृश्यो भवेत् तदा तत्र सः नवमासान् यावत् सुभिक्षफलं शान्तिञ्च



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



लोके प्रददाति। आचार्यपराशरेणोक्तं यदयं जलकेतुः ब्रह्मोत्पन्नचलकेतोः नवमासावशिष्टे सति समुद्भूत इति। स जलकेतुश्च नवमासान् क्षेमसुभिक्षारोग्याणि जनेभ्यः प्रददाति। एषः केतुरन्यैः ग्रहैः समुद्भूताशुभफलानां विनाशको भवति। तथा च पराशरः –

**अथ जलकेतुः पैतामहजस्य चलकेतोर्नवमासावशिष्टे कर्मणि कृतं प्रवर्तयति। पश्चिमेनोदितः स्निग्धः सुजातोऽनुपश्चिमाभिनतशिखः। स च नवमासान् क्षेमसुभिक्षारोग्याणि प्रजाभ्यो धत्ते। अन्यग्रहकृतानां चाशुभानां व्याघातायेति।**

**बोधप्रश्नाः**

८. ध्रुवकेतो कीदृशः वर्णः?

९. ध्रुवकेतोः कति प्रकाराः सन्ति?

१०. ध्रुवकेतुः कस्यां दिशि दृश्यते?

११. कुमुदकेतुः कस्य सदृशः?

१२. मणिकेतोः शिखा कीदृशी वर्तते?

१३. मणिकेतोः शिखा कस्यां दिशि वर्तते?

१४. एकस्यां रात्रौ एकवारमेव दृश्यते, सः कः केतुः?

१५. जलकेतोः रूपं कीदृशं वर्तते?

## १८.१० भवकेतोः लक्षणं तत्फलञ्च

भवकेतोर्लक्षणं तत्फलञ्च एवं प्रतिपादितमात्रचार्यवराहमिहिरेण।

**मूलपाठः –**

**भवकेतुरेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः।**
**हरिलाङ्गूलोपमया प्रदक्षिणावर्तया शिखया॥**

**यावत् एव मुहूर्त्तान् दर्शनमायाति निर्दिशेन् मासान्।**
**तावदतुलं सुभिक्षं रुक्षे प्राणान्तिकान् रोगान्॥**

**अन्वयः** – भवकेतुरेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः हरिलाङ्गूलोपमया प्रदक्षिणावर्तया शिखया (भवति)। यावत् एव मुहूर्त्तान् दर्शनमायाति, तावत् निर्दिशेन्मासान्। अतुलं सुभिक्षं, रुक्षे प्राणान्तिकान् रोगान् भवति।

**प्रतिपदार्थः** – भवकेतु इति। एकरात्रम् = एकनिशाम्। दृश्यः = उदितः। प्राक् = पूर्वस्यां दिशि। सूक्ष्मतारकः = अत्यल्पतारकः। स्निग्धः = निर्मलदेहः। हरिः = सिंहः। लाङ्गुलम् = पुच्छः। उपमया = अकारया। प्रदक्षिणावर्तया = याम्यवर्तया। शिखया = चूडया। यावत् एव मुहूर्त्तान् = यावत् एव क्षणान्। दर्शनम् = दृश्यः। आयाति = आगच्छति। निर्दिशेत् = वदेत्। तावन्मासान्। अतुलम् = असमम्। सुभिक्षम् = क्षेमम्। रुक्षः = स्नेहरहितः। प्राणान्तिकान् = प्राणहरान्। रोगान् = गदानिति।

**व्याख्याः** – अयं भवकेतुः एकस्यां रात्रौ दृश्यते। तस्य स्वरूपे श्वेतवर्णयुक्तत्वाद्, लघुतारारूपे विद्यते इह आकाशे। एषः भवकेतुः हरिलाङ्गूलोपमया प्रदक्षिणावर्तया शिखयोपलक्षितो वर्तते। यावत् मासान् अयं केतुः दृश्यते तावन्मासानत्यधिकं सुभिक्षं करोति। यदि एषः केतुः



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



स्नेहरहितो दृश्यते तदा तत्र प्राणान्तिकान् रोगान् प्रददाति। आचार्यपराशरेण निगदितमत्र यदस्य जलकेतोः समाप्तौ उर्मि-आदितः शीतं यावत् अष्टौ केतवः प्रादुर्भवन्ति। ते केतवः त्रयोदशचतुर्दशाष्टादशवर्षान्तरिन्तरिता दृश्यन्ते। इमे केतवः स्निग्धवर्णस्य सुभिक्षं (क्षेमं) कुर्वन्ति, तस्य च विपरीते रुक्षवर्णयुक्ते सति विपरीतं फलदायकं भवन्ति। तथा च पराशरः—

**अथ जलकेतोः कर्मसमाप्तावूर्म्यादयः शीतान्ता अष्टौ प्रादुर्भवन्ति। ते त्रयोदशचतुर्दशाष्टादशवर्षान्तरिता दृश्यन्ते। स्निग्धाः सुभिक्षक्षेम्या विपर्यया विपरीताः। क्षुद्रजन्तूनां वधाय। तेषामष्टानां कर्मण्यतीते भवकेतुः दृश्यते पूर्वेणैकरात्रम्। या कृतिकानामग्रतमा तारा तत्प्रमाणया स्निग्धयाऽरुक्षाभया सिंहलाङ्गूलसंस्थानया प्रदक्षिणनताग्रया शिखयोदितः। स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षाय। रुक्ष प्राणहराणां रोगाणां प्रादुर्भावायेति।**

## १८.११ पद्मकेतोः लक्षणं तत्फलञ्च

कमलसदृशः यः केतुः सः पद्मकेतु इति पदेन व्यवहियते। आचार्यमिहिरेण अस्य लक्षणं तत्फलञ्चेवं प्रतिपादितमत्रेति।

**मूलपाठः –**

**अपरेण पद्मकेतुर्मृणालगौरो भवेन्निशामेकाम्।**
**सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि॥**

**अन्वयः** – पद्मकेतुः मृणालगौरोऽपरेण निशामेकां (दृश्यः) भवेत्। अयं सप्तवर्षाण्यतिहर्षयुक्तानि सुभिक्षं करोति।

**प्रतिपदार्थः** – अयं = पद्मकेतुः। मृणालगौरः = मृणालवद् गौरः। मृणालं = बिसतन्तु। गौरः = श्वेतः। अपरेण = पश्चिमायां दिशि। निशामेकाम् = रात्रिमेकाम्। भवेत् = दृश्यते। सप्तवर्षाणि यावत् अतिहर्षयुक्तानि = अत्यानन्दयुक्तानि। सुभिक्षम् = क्षेमम्। करोति = प्रददाति।

**व्याख्याः** – अयं पद्मकेतुः मृणालः अर्थात् कमलसदृशः श्वेतवर्णयुक्तः दृश्यते। अस्य पद्मकेतोः नाम्नः केतुः पश्चिमायां दिशि एकस्याः रात्रेः कृते दृश्यतेऽऽकाशे। सः केतु पश्चिमस्यां दिशि दृश्ये सति सप्तवर्षाणि यावत् हर्षयुक्तसुभिक्षं प्रददाति। आचार्यमिहिरेण प्रतिपादितम् श्लोकेऽस्मिन्। आचार्यपराशरेण लिखितं स्वरचितसंहितायां यदयं पद्मकेतुः श्वेतकेतोः प्रभावस्य समाप्तौ पश्चिमस्यां दिशि कुमुदपुष्पक्रान्तियुक्तः, एकस्यां रात्रौ दृश्यते। सः जगतः कृते सप्तवर्षाणि यावत् हर्षं प्रददाति। तथा च पराशरः –

**अथ पद्मकेतुः श्वेतकेतुफलसमाप्तौ पश्चिमेनाह्लादयन्निव मृणालकुमुदाभया शिखयैकरात्रचरः। सप्तवर्षाण्यभ्युच्छ्रितं हर्षमावहति जगतः॥**

## १८.१२ आवर्तकेतोः लक्षणं तत्फलञ्च

आचार्यवराहमिहिरकृतबृहत्संहितायामावर्तकेतोर्लक्षणं तत्फलञ्च अनेन प्रकारेण प्रतिपादितमिति।

**मूलपाठः –**

**आवर्त इति निशार्धे सव्यशिखोऽरुणनिभोऽपरे स्निग्धः।**
**यावल्लक्षणान् स दृश्यस्तावन्मासान् सुभिक्षकरः॥**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**अन्वयः** – आवर्त इति निशार्धेऽपरे सव्यशिखोऽरुणनिभः स्निग्धः दृश्यः सः यावत्क्षणान् तावन्मासान् सुभिक्षकरः भवति।

**प्रतिपदार्थः** – आवर्त इति = आवर्तकेतुः इति। निशार्धे = रात्र्यर्धे। अपरे = पश्चिमस्यां दिशि। सव्यशिखः = दक्षिणदिगाश्रितशिखः। अरुणनिभः = रक्तवर्णः। स्निग्धः = निर्मलवपुः (शरीरः)। दृश्यः = उदितः। सः = केतुः। यावत्क्षणान् = यावत्संख्यकान् मुहूर्त्तान् दृश्यते तावन्मासान्। सुभिक्षम् = क्षेमं करोति।

**व्याख्याः** – अस्यावर्तकेतोः स्वरूपं रक्तवर्णसदृशं निर्मलवपुयुक्तञ्च वर्तते। अयं केतु रात्र्यर्धकाले पश्चिमस्यां दिशि दृश्यते। सः केतुः दक्षिणदिगाश्रितशिखयुक्तोऽस्ति। असौ केतुः यावत् क्षणान् (मुहूर्त्तान्) आकाशे दृश्यते तावन्मासपर्यन्तं सुभिक्षं करोति। आचार्यपराशरकृतसंहितायामपि आह यत् श्वेतकेतोः समाप्तेरनन्तरमावर्तकेतुः पश्चिमस्यां दिशि रात्र्यर्द्धकालेऽयं केतुः शंखसदृशः निर्मलः रक्तवर्णभया प्रदक्षिणनताग्रया शिखयोदितो भवति। सः केतुः यावन् मासान् गगने दृश्यते तावन्मासान् सुभिक्षं ददाति। तथा च पराशरः–

**अथावर्तकेतुः श्वेतकेतोः कर्मण्यतीतेऽपरस्यामर्द्धरात्रे शङ्खावदातो– ऽरुणाभया प्रदक्षिणनताग्रया शिखयोदितः। स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् भवत्यतीव सुभिक्षं नित्ययज्ञोत्सवं जगत्।**

## १८.१३ संवर्तकेतोः लक्षणं तत्फलञ्च

संवर्तकेतोर्लक्षणं तत्फलञ्चाचार्यवराहमिहिरेणेवं प्रतिपादितमत्रेति।

**मूलपाठः –**

**पश्चात् सन्ध्याकाले संवर्तो नाम धूम्रताम्रशिखः।**
**आक्रम्य वियत्त्र्यंशं शूलाग्रावस्थितौ रौद्रः॥**

**यावत एव मुहूर्त्तान् दृश्यो वर्षाणि हन्ति तावन्ति।**
**भूपान् शस्त्रनिपातैरुदयर्क्षं चापि पीडयति॥**

**अन्वयः** – संवर्तो नाम सन्ध्याकाले पश्चाद् धूम्रताम्रशिखो, वियत्त्र्यंशमाक्रम्य शूलाग्रावस्थितो रौद्रः। यावत एव मुहूर्त्तान् दृश्यो तावन्ति वर्षाणि शस्त्रनिपातैर्भूपान्, उदयर्क्षं चापि पीड्यते॥

**प्रतिपदार्थः** – संवर्तो नाम = अयं संवर्तकेतुः। सन्ध्याकाले = सन्ध्यासमये। पश्चात् = पश्चिमस्यां दिशि। ताम्रः = ताम्रसदृशः वर्णः। धूम्रः = धूम्रसदृशवर्णः। शिखा = चूडा। वियत् = आकाशः। त्र्यंशम् = तृतीयभागम्। आक्रम्य = प्राप्य। शूलाग्रावस्थित। शूलम् = त्रिशूलवत्। अग्रम् = अग्रभागे। अवस्थितः = स्थितः। रौद्रः = भयावहः। यावत् मुहूर्त्तान् = यावत् क्षणान्। दृश्यः = उदितः। वर्षाणि = वर्षसंख्यकानि तावन्ति। हन्ति = नाशयति। भूपान् = राज्ञः (नृपान्)। शस्त्रनिपातैः = संग्रामैः। उदयः = दृश्यः। आर्क्षम् = नक्षत्रम्। चापि पीड्यति = उपतापयति।

**व्याख्याः** – संवर्तकेतुः सन्ध्याकाले पश्चिमस्यां दिशि धूम्रताम्रवर्णयुक्तो दृश्यते। सः गगनस्य तृतीयभागं प्राप्य त्रिशूलशिखासदृशः भयावहकृतेः दृश्यो भवति। यदि संवर्तकेतुः यावत् मुहूर्तान् दृश्यते आकाशे तावन्ति वर्षाणि संग्रामैः नृपान् विनाशयति। अयं केतुः यस्मिन् नक्षत्रे उदितो भवति तद् नक्षत्रमपि पीड्यति उपातापयति वा। तथा च पराशरः –



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



अथ संवर्तो वर्षसहस्रमष्टोत्तरं प्रोष्य पश्चिमेनास्तं गते सवितरि सन्ध्यायां दृश्यते तन्वीं ताम्ररुक्षां शूलाभां धूम्रं विमुञ्चन्तीं दारुणां शिखां कृत्वा नभसस्त्रिभागमाक्रम्य। स यावन् मुहूर्तान् निशि तिष्ठति तावद्वर्षाणि परस्परं शस्त्रैर्घ्नन्ति पार्थिवाः। यानि नक्षत्राणि धूपयति यत्र चोदेति तानि दारुणतरं पीडयति। तदाश्रितांश्च देशानिति।।

**बोधप्रश्नाः**

१६. भवकेतोः वर्णः कीदृशः?

१७. भवकेतुः कस्यां दिशि दृश्यते?

१८. पद्मकेतोः फलं किमिति?

१९. 'अपरेण' इति पदस्यार्थः कः?

२०. संवर्तकेतुः कस्मिन् काले दृश्यते?

२१. यदि संवर्तकेतुः नक्षत्रेण सहोदितस्तस्य किं फलं भवति?

## १८.१४ नक्षत्रस्पर्शात् फलम्

अत्र पूर्ववर्णितशुभाशुभकेतुभिः नक्षत्राणां स्पर्शादाधूपनाच्च किं फलं भवति। एतत्विषयेऽऽचार्यवराहमिहिरेणेवमत्र प्रतिपादितमिति। अर्थादत्राधूपनशब्दस्य प्रयोगः कृतो वर्तते। आधूपनशब्दस्यार्थः प्रतिपादितः यद् ये केतवः नक्षत्रैः सह दृश्यन्ते ते केतवः नक्षत्रमाच्छादयन्ति। आच्छादितोऽर्थात् आधूपितः प्रोक्तः।

**मूलपाठः –**

**ये शस्तास्तान् हित्वा केतुभिराधूपितेऽथवा स्पृष्टे।**
**नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान्।।**

**अन्वयः** – ये शस्तास्तान् हित्वा केतुभिराधूपितेऽथवा स्पृष्टे नक्षत्रे भवति, तान् येषां राज्ञां वधो प्रवक्ष्ये।

**प्रतिपदार्थः** – ये = केतवः। शस्ताः = प्रशस्तफलाः, तान् = केतूः। हित्वा = वर्जयित्वा। केतुभिः = शिखिभिः। नक्षत्रे = आर्क्षे। आधूपिते = धूमिलप्रकाशयुक्ते। स्पष्टे = स्पर्शे। भवति = करोति। तान् = नृपान्। येषाम् = तेषाम्। राज्ञाम् = नृपाणाम्। वधः = मारणम्। प्रवक्ष्ये = कथयिष्ये।

**व्याख्याः** – अत्र ये शुभकेतवः सन्ति ते शुभफलदायकास्तान् त्यक्त्वा। अशुभैः केतुभिः यस्मिन् नक्षत्रेऽऽधूपितेऽथवा स्पर्शे एतेषां राज्ञां मरणं भवति। तेषां राज्ञां फलमग्रे कथयिष्ये।

## १८.१५ अश्विन्यादृोहिणीं यावत् नक्षत्रेषु स्पर्शफलम्

आचार्यवराहमिहिरेणाश्विन्यादृोहिणीं यावत् नक्षत्रेषु स्पर्शफलं स्वरचितबृहत्संहितायां प्रतिपादितमिति।

**मूलपाठः –**

**अश्विन्यामश्मकपं भरणीषु किरातपार्थिवं हन्यात्।**
**बहुलासु कलिङ्गेशं रोहिण्यां शूरसेनपतिम्।।**



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**अन्वयः** – अश्विन्यामश्मकपं भरणीषु किरातपार्थिवं बहुलासु कलिङ्गदेशं रोहिण्यां शूरसेनपतिं हन्यात्।

**प्रतिपदार्थः** – अश्विन्याम् = अश्विनीनक्षत्रे। अश्मकपम् = अश्मकराजस्याधिपतिं राजानम्। भरणीषु = भरणीनक्षत्रेषु। किरातपार्थिवम् = किरातराज्यस्य राजानम्। बहुलासु = कृत्तिकानक्षत्रेषु। कलिङ्गेशम् = कलिङ्गदेशस्य राजानम्। रोहिण्याम् = रोहिणीनक्षत्रे। शूरसेनपतिम् = शूरसेनस्य नृपम्। हन्यात् = नाशयेत्।

**व्याख्याः** – यद्ययं केतुः अश्विननक्षत्रे स्पर्शे अथवा आधूपिते सति तदाऽश्मकराज्यस्य नृपम्, भरणीनक्षत्रे च स्पर्शे अथवा आधूपिते तदा किरातराज्यस्य राजानं नाशयेत्। कृत्तिकानक्षत्रे सः केतुः स्पर्शे अथवा आधूपिते सति तदा कलिङ्गदेशस्य राजानम्, रोहिण्यां च स्पर्शेऽथवा आधूपिते सति शूरसेनस्याधिपतिं हन्यात्। सम्प्रति कलिङ्गस्य नामोत्कलो वर्तते। यः उडिशाप्रान्ते विद्यते। अश्मकजनपदस्योल्लेखो वीणावासवदत्तनाटके विद्यते। अयं दक्षिणभारतस्य जनपदेषु विद्यते। भासेनापि शूरसेनजनपदस्योल्लेखो विहितः। शूरसेनजनपदस्य राजधानी मथुरा आसीत्। सम्प्रति उत्तरप्रदेशप्रान्ते विद्यते।

## १८.१६ मृगशिरसः पुष्यं यावत् नक्षत्रेषु स्पर्शफलम्

बृहत्संहितायां आचार्यवराहमिहिरेणेवं मृगशिरसः पुष्यं यावत् नक्षत्रेषु स्पर्शफलं प्रतिपादितं वर्तते।

**मूलपाठः** –

**औशीनरमपि सौम्ये जलजाजीवाधिपं तथार्द्रासु।**
**आदित्येऽश्मकनाथान् पुष्ये मगधाधिपं हन्ति॥**

**अन्वयः** – सौम्ये औशीनरमपि तथार्द्रासु जलजाजीवाधिपम्, आदित्येऽश्मकनाशान् पुष्ये मगधाधिपं हन्ति।

**प्रतिपदार्थः** – सौम्ये = मृगशिरानक्षत्रे। औशीनरमपि = औशीनरराज्यस्य जनानामपि। तथा = तेन प्रकारेण। आर्द्रासु = आर्द्रानक्षत्रेषु। जलजाजीवाधिपम् = जलजा मत्स्यादयस्तैर्ये आजीवन्ति ते च जलजाजीवाः भवन्ति। आदित्ये = पुनर्वसुनक्षत्रे। अश्मकः = अश्मकदेशः। नाथान् = अधिपतीन्। पुष्ये = पुष्यनक्षत्रे। मगधः = मगधराज्यम्। अधिपम् = (स्वामी) नृपम्। हन्ति = नाशयन्ति।

**व्याख्याः** – यद्यशुभकेतुः मृगशिरानक्षत्रे स्पर्शे आधूपिते सति वा भवेत् तदा औशीनरराज्यस्य जनान् हन्ति। आर्द्रानक्षत्रेऽयं केतुः स्पर्शे आधूपिते सति वा तदा जलजाजीवाधिपं नाशयति। पुनर्वसुनक्षत्रे यदि केतुऽयं स्पर्शे आधूपिते च भवेत् तदा अश्मकनाथान् हन्ति। तथा च पुष्यनक्षत्रेऽयं केतुः स्पर्शे आधूपिते वा सति सः मगधाधिपं नाशयति। अश्मकनामकस्थानं इदानीं दक्षिणभारते विद्यते। मगधनामकस्थानं तु सम्प्रति बिहारप्रान्ते वर्तते। मगधजनपदो गङ्गायाः दक्षिणवर्तिषु भूभागेषु दक्षिणविहारेण परिचीयते। अत्र मुख्यरूपेण पटना-गयाजनपदौ सम्मिलितौ स्तः।

## १८.१७ आश्लेषायाः हस्तं यावत् नक्षत्रेषु स्पर्शफलम्

अत्र वराहमिहिराचार्येण आश्लेषायाः हस्तं यावत् नक्षत्रेषु स्पर्शफलं प्रतिपादितमिति।

**मूलपाठः** –



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**असिकेशं भौजङ्गे पित्र्येऽङ्गं पाण्ड्यनाथमपि भाग्ये।**
**औज्जयिनिकमार्यम्णे सावित्रे दण्डकाधिपतिम्॥**

**अन्वयः** – भौजङ्गे असिकेशम्, पित्र्येऽङ्गम्, भाग्ये पाण्ड्यनाथमपि, आर्यम्णे औज्जयिनिकम्, सावित्रे च दण्डकाधिपतिं हन्ति।

**प्रतिपदार्थः** – भौजङ्गे = आश्लेषानक्षत्रे। असिकेशम् = असिकाः जनास्तेषामीशं पतिम्। पित्र्ये = मघानक्षत्रे। अङ्गम् = अङ्गप्रदेशस्तस्याधिपतिं अङ्गम् भवति। भाग्ये = पूर्वाफाल्गुनीनक्षत्रे। पाण्ड्यः = पाण्ड्यदेशः। नाथमपि = अधिपतिमपि। आर्यम्णे = उत्तराफाल्गुनीनक्षत्रे। उज्जयिनिकम् = उज्जयिनीस्थानस्य पतिम् अर्थात् राजानम्। सावित्रे = हस्तनक्षत्रे। दण्डकः = दण्डकारण्यः। अधिपतिम् = नृपतिम्। दण्डकारण्यस्याधिपतिम् = दण्डकारण्यस्य नृपतिम्।

**व्याख्याः** – अयं केतुः आश्लेषानक्षत्रे स्पर्शे आधूपिते सति वा असिकेशराज्यस्य नृपतिम्, मघानक्षत्रे स्पर्शे सति अङ्गप्रदेशस्य राजानम्, पूर्वाफाल्गुनी नक्षत्रे स्पर्शे सति पाण्ड्यदेशस्य नरेशम्, उत्तराफाल्गुनीनक्षत्रे स्पर्शे सति उज्जयिनीपतिम्, हस्तनक्षत्रे च स्पर्शे सति दण्डकारण्यस्य नृपतिं हन्ति। भारतवर्षस्य राजनीतिकसांस्कृतिकेतिहासे उज्जयिनीनगरी विश्वप्रसिद्धा महत्त्वपूर्णा शक्तिशालिनी च प्रथितकीर्तिरासीत्। अस्याः नगर्याः धार्मिकं सांस्कृतिकं राजनीतिकमार्थिकञ्च महत्त्वं सर्वलोकमान्यं वर्तते। सम्प्रति इयं नगरी मध्यप्रदेशप्रान्ते विद्यते। विन्ध्यवनाद् दक्षिणं कृष्णानदीतटपर्यन्तं विस्तृतं भूक्षेत्रं दण्डकारण्यनाम्ना प्रसिद्धमासीत्। भवभूतेरनुसारं चित्रकूटमतिक्रम्य जनस्थानञ्चोल्लङ्घ्य दण्डकारण्ये प्रवेशो भवति। अयं सम्प्रति उत्तरप्रदेशप्रान्ते वर्तते।

## १८.१८ चित्रास्वात्योः स्पर्शफलम्

चित्रास्वात्योः स्पर्शफलमेवाचार्यवराहमिहिरेण बृहत्संहितायां प्रतिपादितमिति।

**मूलपाठः –**

**चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत्तज्ज्ञः।**
**काश्मीरककाम्बोजौ नृपती प्राभञ्जने न स्तः॥**

**अन्वयः** – चित्रासु कुरुक्षेत्राधिपस्य मरणं तज्ज्ञः समादिशेत्। प्राभञ्जने काश्मीरककाम्बोजौ नृपती न स्तः।

**प्रतिपदार्थः** – चित्रासु = चित्रानक्षत्रेषु। कुरुक्षेत्राधिपस्य = कुरुक्षेत्रराज्ञः। मरणम् = मृत्युः। तत् = तस्य। ज्ञः = देवज्ञः। समादिशेत् = वदेत्। प्राभञ्जने = स्वातौ। काश्मीरकाम्बोजौ = काश्मीरश्च काम्बोजश्च। नृपती = राजानौ। न स्तः = न भवतः।

**व्याख्याः** – यदि गगनमण्डलेऽस्मिन् केतुश्चित्रानक्षत्रे स्पर्शे सति तदा तत्र कुरुक्षेत्रस्य नृपं मरणमिति दैवज्ञः वदेत्। स्वातीनक्षत्रे च स्पर्शे सति काश्मीरककाम्बोजौ राजानौ न भवतः, अर्थात्तयोः राज्ञयोः विनाशो भवति। भारतवर्षस्य मध्यवर्तिषु जनपदेषु कुरुजनपदस्य गणना विधीयते। कुरुजनपदस्य त्रयो भागा वर्तन्ते-कुरुदेशः कुरुजाङ्गलः कुरुक्षेत्रञ्च। यमुनायाः पश्चिमप्रदेशः कुरुक्षेत्रं वर्तते। कुरुजनपदस्य राजधानी हस्तिनापुरं गङ्गायाः दक्षिणतटे समवस्थितमासीत्। सम्प्रति हरियाणाप्रान्ते तत्क्षेत्रं विद्यते। जयचन्द्रविद्यालङ्कारेण वर्तमानगान्धारकाश्मीरप्रदेशनामाधुनिकपामीरक्षेत्रं पश्चिमदिशि च बदख्यां क्षेत्रमेव काम्बोजजनपदोऽभिमतः। बृहत्संहितायां काश्मीरकाम्बोजजनपदयोः स्थितिः सहभावेन प्रोक्ता। वर्तमानकालीनं काश्मीरराज्यमेव प्राचीनकालीनः काश्मीरजनपदो आसीत्। पञ्चनदराज्यस्योत्तर-



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



पश्चिमदिग्वर्ती जनपदोऽयमुत्तुङ्गगिरिशृङ्खलाभिः परिवेष्टितः परन्तु वर्तमानकालीनकाश्मीराज्यस्य सीमानः प्राचीनकाश्मीरजनपदापेक्षातोऽतिविस्तीर्णाः सन्ति।

## १८.१९ विशाखानुराधाज्येष्ठानक्षत्रेषु केतुस्पर्शफलम्

बृहत्संहिताकारेण विशाखानुराधाज्येष्ठानक्षत्रेषु केतुस्पर्शफलमत्र प्रतिपादितम्।

**मूलपाठः –**

**इक्ष्वाकुरलकनाथश्च हन्यते यदि भवेद् विशाखासु।**
**मैत्रे पुण्ड्राधिपतिर्ज्येष्ठासु च सार्वभौमवधः॥**

**अन्वयः** – यदि विशाखासु भवेद् तदा इक्ष्वाकुरलकनाथः हन्यते, मैत्रे पुण्ड्राधिपतिः ज्येष्ठासु च सार्वभौमवधः (भवति)।

**प्रतिपदार्थः** – विशाखासु = विशाखातारासु। इक्ष्वाकुः = इक्ष्वाकवः जनाः। अलकनाथः = अलकाधिपतिश्च। हन्यते = नाशयति। मैत्रे = अनुराधायाम्। पुण्ड्राधिपतिः = पुण्ड्रदेशस्य स्वामी। ज्येष्ठासु = ज्येष्ठातारासु च। सार्वभौमस्य = कान्यकुब्जाधिपतेः। वधः = मरणं भवति।

**व्याख्याः** – यदि केतुः विशाखानक्षत्रे स्पर्शो भवेत्तदा सः अलकानाथं इक्ष्वाकुनाथं च नाशयति। अत्र इक्ष्वाकुराज्यस्यालकानामकनगरस्य च राज्ञा तात्पर्यं वर्तते। अनुराधानक्षत्रे स्पर्शो तदाऽयं केतुः पुण्ड्रदेशस्य राजानं हन्ति। तथा च ज्येष्ठानक्षत्रे स्पर्शे सति सार्वभौमः अर्थात् कान्यकुब्जराज्यस्य नृपं नाशयति। यक्षाधिपस्य कुबेरस्य राजधानी कविभिरलकापुरी वर्णिता। अलकनन्देयं गङ्गासरितः प्रधानसहारिका गढवालमण्डले सत्यपथसरसोऽलकापुरी बद्धाच्च प्रभूय देवप्रयागे भागीरथ्यां संविलीयते। सम्प्रति इयं अलकापुरी उत्तराखण्डप्रान्ते विद्यते। कान्यकुब्जनगरमिदं कस्मिंश्चित् समये गाधिपुरनाम्नाऽपि प्रसिद्धमासीत्। प्राचीनकालीनमिदं कान्यकुब्जनगरं वर्तमाने कन्नौजनगरेण परिचीयते। फर्रुखाबादजनपदे नगरमिदं गङ्गाकालीसरितोः सङ्गमस्थलेऽवस्थितं विद्यते।

## १८.२० मूलपूर्वाषाढोत्तराषाढानक्षत्रेषु केतुस्पर्शफलम्

मूलपूर्वाषाढोत्तराषाढनक्षत्रेषु केतुस्पर्शफलं आचार्यवराहमिहिरेणेवं प्रतिपादितं बृहत्संहितायाम्।

**मूलपाठः –**

**मूलेऽन्ध्रमद्रकपती जलदेवे काशिपो मरणमेति।**
**यौधेयकार्जुनायनशिविचैद्यान् वैश्वदेवे च॥**

**अन्वयः** – मूलेऽन्ध्रमद्रकपती जलदेवे काशिपो मरणमेति, वैश्वदेवे च यौधेयकार्जुनायनशिविचैद्यान् (हन्ति)।

**प्रतिपदार्थः** – मूले = मूलनक्षत्रे। अन्ध्रः = आन्ध्रराजस्य पतिम्, आन्ध्रपतिम्। मद्रकपतिम् = मद्रकस्य पतिम्, मद्रपतिम्। जलदेवे = पूर्वाषाढायाम्। काशिपः = काश्याधिपतिः। मरणम् = मृत्युं ददाति। वैश्वदेवे = उत्तराषाढायाम्। यौधेयकः। अर्जुनायनराज्यः। शिविराज्यः। चैद्यराज्यः। एतान् = नृपतीन् हन्ति।



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



**व्याख्याः**- यदि केतुरयं मूलनक्षत्रे स्पर्शे आधूपिते वा सति आन्ध्रस्य मद्रकस्य च नृपं हन्ति। पूर्वाषाढानक्षत्रे एषः केतुः स्पर्शः स्यात् तदा काश्याधिपतेर्मरणं भवति। एवमयं केतु उत्तराषाढायां नक्षत्रे स्पर्शो भवेत्तदा यौधेयकस्य नृपम्, अर्जुनायनस्य राजानम्, शिवेः नरेशम् च हन्ति। आन्ध्रस्थानं तु आन्ध्रप्रदेशे तथा च मद्रकस्थानं तमिलनाडुप्रान्ते सम्प्रति विद्यते। वर्तमानकालीनः काशीजनपद एव प्राचीनकालवर्णितः काशीजनपदो विद्यते। गङ्गातटसमवस्थितेयं नगरी जनपदोऽपि विद्यते। सम्प्रति उत्तरप्रदेशप्रान्ते विद्यते।

## १८.२१ श्रवणादिषट्सु केतुस्पर्शफलम्

अत्र श्रवणादिषट्नक्षत्रेषु केतुस्पर्शफलमेवं बृहत्संहिताकारेण प्रतिपादितम्।

**मूलपाठः –**

**हन्यात् कैकयनाथं पाञ्चनदं सिंहलाधिपं वाङ्गम्।**
**नैमिषनृपं किरातं श्रवणादिषु षट्स्विमान् क्रमशः॥**

**अन्वयः** – श्रवणादिषु षट्स्विमान् क्रमशः कैकयनाथं पाञ्चनदं सिंहलाधिपं वाङ्गम् नैमिषनृपं किरातञ्च हन्यात्।

**प्रतिपदार्थः** – श्रवणादिषु = श्रवणादिषट्नक्षत्रेषु (श्रवण-धनिष्ठा-शतभिषा-पूर्वाभाद्रपद-उत्तराभाद्रपद-रेवतीत्यादिनक्षत्रेषु)। कैकयनाथम् = कैकयजनस्याधिपतिम्। पाञ्चनदम् = पञ्चनदस्याधिपतिम्। सिंहलाधिपम् = सिंहलस्य नृपतिम्। वाङ्गम् = वङ्गप्रदेशस्याधिपतिम्। नैमिषनृपम् = नैमिषारण्यस्याधिपतिम्। किरातम् = किरातप्रदेशस्याधिपतिम्। हन्यात् = हननं करोति।

**व्याख्याः** – यदि केतुः श्रवणनक्षत्रे स्पर्शः स्यात् तदा कैकयजनाधिपं हन्यात्। धनिष्ठानक्षत्रेऽयं केतुस्पर्शे आधूपिते वा भवेत्तदा पञ्चनदाधिपतिम्, शतभिषनक्षत्रे स्पर्शे आधूपिते वा तदा सिंहलाधिपतिम्, पूर्वाभाद्रपदनक्षत्रे स्पर्शे आधूपिते वा वङ्गाधिपतिम्, उत्तरभाद्रपदायां स्पर्शे आधूपिते वा नैमिषारण्याधिपतिं रेवत्याञ्च स्पर्शे आधूपिते वा किराताधिपतिं नाशयति। नैमिषारण्यस्यऽभिज्ञानमसन्दिधमेव। लक्ष्मणपुर (लखनऊ) स्टेशनादुत्तरपश्चिमदिशि नवयोजनमात्रं सीतापुराच्च पञ्चयोजनमात्रं बालामऊमार्गे नैमिषारण्यरेलवेस्टेशनं विद्यते। तन्निकटमेव नैमिषारण्यमतिपवित्रं तीर्थं सकलजनसमादरणीयं जगन्मान्यं वर्तते। वङ्गप्रदेशस्य विषयेऽत्र लिखितं वर्तते यत् पूर्ववङ्गालराज्यं (वर्तमानकाले वङ्गलादेशः) वङ्गजनपदोऽवर्तत। अस्मिन् जनपदे मुख्यरूपेण वर्तमानचटगावमैमनसिंहढाकाजनपदक्षेत्राण्यभूवन। सिंहलप्रदेशः विद्यते श्रीलङ्कायाम्। दशाननस्य रावणस्य राजधानी लङ्कापुरीं प्राचीनभारतीयसाहित्ये महन्महत्त्वं वर्तते। लङ्काजनपदप्रसङ्गेऽस्याः नगर्याः वर्णनमपि विस्तरेणाभवत्। लङ्कादीपस्य राजधानी लङ्कानाम्ना लोके प्रसिद्धा वर्तते।

### बोधप्रश्नाः

२२. भरणीनक्षत्रे यदि केतुः स्पर्शं करोति तर्हि किं फलमिति?

२३. मृगशिरानक्षत्रे यदि केतुराधूपितं करोति तर्हि तस्य किं फलम्?

२४. यदि केतुः स्वातीनक्षत्रे स्पर्शे आधूपिते सति तस्य फलं किम्?

२५. केतोः यदि मूलनक्षत्रे स्पर्शो भवति तर्हि किम् फलम्?

२६. 'उज्जयिनी' कस्मिन् प्रान्ते विद्यते?



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



२७. वर्तमानकाले कलिङ्गजनपदः कस्मिन् प्रान्ते वर्तते?

## १८.२२ उल्काताडितकेतोः फलम्

इह स्वर्गे शुभफलभोगानामनन्तरं मृत्युलोकं प्रति तेषां लोकानां पततां यानि रूपाणि दृश्यन्ते तान्युल्का इति पदेनोच्यन्ते। गर्गादिभिः कथितम्- यथा लोकपाललोकानां शुभाशुभफलसूचनायास्त्रीणि ज्वलितान्युत्सृजन्ति तान्येवोल्काः। ताः अपि प्रकाशरूपविद्यमानाः सन्त्याकाशे। अत्रोल्काः पञ्चधाः धिष्ण्योल्काशनिविद्युत्ताराः सन्ति। उल्कायास्ताडितकेतुः उल्काताडितकेतुः अस्य केतोः फलमत्र प्रतिपादितमाचार्यवराहमिहिरेण।

### मूलपाठः –

**उल्काभिताडितशिखः शिखी शिवः शिवतरोऽतिदृष्टो यः।**
**अशुभः स एव चोलावगाणसितहूणचीनानाम्॥**

**अन्वयः** – यः शिखी उल्काभिताडितशिखः, शिवः, अतिदृष्टः शिवतरः, स एव चोलावगाणसितहूणचीनानामशुभो भवति।

**प्रतिपदार्थः** – यः = सः। शिखी = केतुः। उल्कया = अभिमुख्येन। ताडिता = हता। शिखा = चूडा। शिवः = श्रेयष्करः। अतिदृष्टः = उदितमात्रः। शिवतरः = अतिशयेन शुभप्रदः। चोलानाम् = चोलवंशानाम्। अवगाणानाम् = सितानाम्। हूणानाम् चीनानाञ्च। अशुभः = अश्रेयष्करः।

**व्याख्याः** – यदि केतोः शिखा उल्कापतता ताडिता भवेत्तर्हि स कल्याणकारको भवति। यदि अयं केतुरल्पकालस्य कृते दृष्टः स्यात् तदा अतिशयः शुभदायको भवति। सः एव केतुः चोलवंशानां कृते आवगाणानां कृते, हूणानां कृते चीनानाञ्च कृतेऽशुभो (अश्रेयष्करो) भवति। अत्र सर्वेषां चोलादीनां कृते फलमिदं ज्ञेयम्। पराशरोक्तं यत् अस्य केतोः शिखा यस्यां दिश्यवनता स्यात्, अथवा यस्यां दिशि सः गमनशीलः भवेत्, अथवा यस्य नक्षत्रस्य स्पर्शं कुर्वन् स्यात्, तत्र ये देशा यन्नक्षत्रं स्पृशन्ति तस्य च नक्षत्रस्य ये देशा वक्ष्यमाणास्तान् कथितान् देशान् नरपतिः भुङ्क्ते। यथा गरुडः दिव्यप्रभावनिहतान् परभोगिभोगान् भुङ्क्ते। उत्कृष्टा ये भोगिनः सर्पास्तेषां भोगाः शरीराण्यङ्गानि वा तान्।

### बोधप्रश्नाः

२७. उल्काः कतिधा भवन्ति?

२८. अल्पकालस्य कृते यदि केतुः दृश्यः भवेत्तस्य किं फलम्?

२९. 'शिव' इति पदस्यार्थः कः?

## १८.२३ सारांशः

अस्मिन् पाठे प्रकाशपुञ्जरूपविद्यमानाः ये केतवः सन्ति तेषां केतूनां लक्षणं तत्फलञ्च प्रतिपादितं वर्तते। यः केतुः स्थिरो न वर्तते स एव चलकेतुः वर्तते। सः पश्चिमायां दिशि दृश्यो भवति। अस्य केतोः शिखायाः अग्रभागः दक्षिणदिशि भवेत् तथा अङ्गुलप्रमाणमुच्चं दृश्यते। श्वेतकेतुस्तु अर्द्धरात्रिकाले पूर्वस्यां दिशि दृश्यो भवति। अयं केतुः सप्तदिनं यावत् आकाशे दृश्यते। तस्य फलं शुभं भवति। श्वेतकेतुः जटासदृशो वर्तते। एषः केतुः गगनस्य तृतीयभागं यावत् गच्छति पुनः अपसव्यं अर्थात् वामभागेन परावर्तितः भवति। अयं केतुः



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



द्वयो भागयोः विनाशं करोति। ध्रुवकेतोरनिश्चिता गतिः वर्तते। अयं केतुः सामान्यवर्णः स्थूलः श्वेतकृष्णयुक्तश्चास्ति। तस्य ध्रुवकेतोः त्रय प्रकाराः दिव्यान्तरिक्षभौमादयः सन्ति। केतुरयं सर्वासु दिक्षुभ्रमणं करोति। कुमुदकेतुः कुमुदपुष्पसदृशो वर्तते। अयं केतुः पूर्वाग्रशिखयुक्तत्वाद् एकस्मिन् एव रात्रौऽदृश्यतेऽऽकाशे। सः केतुः पश्चिमदिशि दृश्ये सति दशवर्षाणि यावत् अतिशयसुभिक्षफलं प्रददाति। मणिकेतुः लघुतारारूपेण विद्यते इह गगने। जलकेतुरपि पश्चिमस्यां दिशि दृश्यो भवति। अयं केतुः पश्चिमाग्रभागे उन्नतया शिखयायुक्तो दृश्यते। भवकेतोरारभ्य संवर्तकेतुं यावत् एतेषां केतूनां लक्षणं तत्फलं यथाक्रमेण प्रतिपादितमत्र वर्तते। यदि केतुः नक्षत्रेण सह स्पर्शः आधूपितो वा भवेत् तदा तेषां नक्षत्राणां स्पर्शफलं यथाक्रमरूपतया प्रतिपादितमाचार्येण। पाठेऽस्मिन् उल्काताडितकेतोर्फलमपि विलिखितमिति। अस्य पाठस्य सारांशोऽयं वर्तते।

## १८.२४ शब्दावली

| | | | |
|---|---|---|---|
| १. | उच्छ्रितया | = | उच्चया। |
| 2. | दैर्घ्यम् | = | दीर्घताम्। |
| 3. | सप्तमुनीन् | = | वसिष्ठादीन्। |
| 4. | ध्रुवम् | = | ध्रुवतारकम्। |
| 5. | पुष्करारण्यम् | = | पुष्करारण्यस्थानम्। |
| 6. | युगपत् | = | तुल्यकालम्। |
| 7. | शिवः | = | श्रेयः। |
| 8. | वियत् | = | आकाशः। |
| 9. | अपसव्यम् | = | अप्रदक्षिणम्। |
| 10. | अनियता | = | अनिश्चिता। |
| 11. | विष्वक् | = | समन्ततः। |
| 12. | इष्टफलः | = | शुभफलः। |
| 13. | गृहेषु | = | वेश्मसु। |
| 14. | कुमुदकान्तिः | = | कुमुदाभः। |
| 15. | स्तनोद्गता | = | क्षीरधारः। |
| 16. | उन्नतया | = | उच्चया। |
| 17. | रौद्रः | = | भयावहः। |
| 18. | वधः | = | मृत्युः। |
| 19. | बहुलासु | = | कृत्तिकासु। |
| 20. | सौम्यः | = | मृगशिरा। |
| 21. | आदित्यः | = | पुनर्वसु। |



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



22. भुजङ्गः = आश्लेषा।
23. पित्र्ये = मघायाम्।
24. भाग्ये = पूर्वाफाल्गुनी।
25. आर्यम्णः = उत्तराफाल्गुनी।
26. सावित्रे = हस्ते।
27. प्राभञ्जने = स्वात्यौ।
28. जलदेवे = पूर्वाषाढायाम्।
29. वैश्वदेवे = उत्तराषाढायाम्।
30. ताडितः = हतः।

## १८.२५सन्दर्भग्रन्थः

१. **बृहत्संहिता** – आचार्यवराहमिहिरः।

## १८.२६सहायकग्रन्थाः

१. **बृहत्संहिता**, हिन्दीव्याख्याकारः- आचार्यनागेन्द्रपाण्डेयः, सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी।

२. **बृहत्संहिता**, व्याख्याकारः- डॉ. सुरेशचन्द्रमिश्रः।

३. **बृहत्संहिता**, व्याख्याकारः- पं. श्रीअच्युदानन्दझा, चौखम्बा-संस्कृत-प्रतिष्ठानम्, वाराणसी।

४. **ज्योतिर्विज्ञानशब्दकोशः**, लेखकः- डॉ. सुरकान्तझा, चौखम्बा-कृष्णदास-अकादमी, वाराणसी।

## १८.२७बोधप्रश्नोत्तराणि

१. दक्षिणस्यां दिशि
२. दुर्भिक्षम्
३. पूर्वस्यां दिशि
४. पश्चिमस्यां दिशि
५. सुभिक्षं शिवञ्च
६. कृत्तिकानक्षत्रस्य
७. धूम्रवर्णः
८. सामान्यवर्णः
९. त्रयः प्रकाराः



© मुक्तस्वाध्यायपीठम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २०१५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri



१०. सर्वासु दिक्षु

११. कुमुदपुष्पसदृशः

१२. पश्चिमस्यां दिशि

१३. ऋज्वी (स्पष्टा)

१४. मणिकेतुः

१५. निर्मलः

१६. श्वेतवर्णः

१७. पूर्वस्यां दिशि

१८. सुभिक्षम्

१९. पश्चिमदिशा

२०. सन्ध्याकाले

२१. नक्षत्रपीडितम्

२२. किराताधिपतिं हन्ति

२३. औशीनराधिपतिं हन्ति

२४. काश्मीरकाम्बोजौ राजानौ हतः

२५. आन्ध्रमद्रकपती हतः

२६. मध्यप्रदेशप्रान्ते

२७. पञ्चधाः

२८. अतिकल्याणकारी

२९. कल्याणः।

## १८.२८ अभ्यासप्रश्नाः

१. चलकेतोर्लक्षणं विलेखनीयम्।

२. ध्रुवकेतोर्लक्षणं तत्फलञ्च प्रतिपादनीयम्।

३. भवकेतोर्लक्षणं लिखत।

४. संवर्तकेतुलक्षणं प्रदेयम्।

५. अश्विनीभरणीनक्षत्रयोः स्पर्शफलं लेखनीयम्।

६. उल्काताडितकेतोः फलं प्रतिपादनीयम्।

—•—



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri

## स्वप्नः

संस्कृते पारम्परिक-आधुनिकज्ञानवैदुष्यस्य समन्वयनदृशा संस्कृतशिक्षायाः वैश्विकपरिप्रेक्ष्यस्य उपस्थानम्।

## सङ्कल्पः

- संस्कृतनिष्ठज्ञानसरण्याः उत्तमावबोधस्य सर्जनम्।
- संस्कृतशिक्षान्तर्गतानाम् अभिनवविषयाणां संवर्धनम्।
- आधुनिकसमाजोत्कर्षाय सम्भावनानां प्रकाशनदृष्ट्या संस्कृतभाषायाः तत्साहित्यस्य च प्रासङ्गिकतायाः आविष्करणम्।

Kirtikant Sharma Collection, Najafgarh